स्मारिका

१९८४

मुझे खेद है कि मैं संस्कृत को कम जानता हूं, लेकिन वह मुझे बहुत प्रिय है और मैं समझता हूं कि भारत ने जो हजारों वर्षों से बहुत अच्छे और बड़े कार्य किये हैं और अपने विचारों को प्रकाशित किया और फैलाया, और दुनियाभर में प्रसिद्ध हुआ, इसमें संस्कृत का बड़ा भाग है। हमारा सबसे बड़ा धन या दौलत संस्कृत है और हमको चाहिये कि इसकी रक्षा करें और इसकी उन्नति हो।

जवाहर लाल नेहरू

स्मारिका

द्वितीयोऽङ्कः

सन् १९८४

सम्पादकः
आचार्यकरुणापतित्रिपाठी
अध्यक्षः उत्तरप्रदेशसंस्कृत-अकादम्याः
कुलपतिचरः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

उत्तर प्रदेश संस्कृत अकादमी, लखनऊ

प्रकाशकः
श्रीधर्मनारायणत्रिपाठी
निदेशकः, उत्तरप्रदेशसंस्कृत-अकादमी,
संस्कृतभवनम्, नया हैदराबाद
लखनऊ

प्रकाशनवर्षः
२०४१ वैक्रमाब्दः
१९०६ शकाब्दः
१९८४ खीष्टाब्दः

मुद्रकः
रत्ना प्रिंटिग वर्क्स
बी २१/४२ ए, कमच्छा
वाराणसी २२१ ०१०

सम्पादकीयं निवेदनम्

उत्तरप्रदेशसंस्कृताकादम्याः स्मारिकायाः एतं नूतनमङ्कं सम्पादयन्नहं परं प्रमोदमनुभवामि। अस्याः स्मारिकायाः प्रायः सर्वे निबन्धाः शोधप्रधाना अनुशीलनात्मका वा। मम एष विचारो वर्तते यदियं स्मारिका भविष्यति काले शोधपत्रिकायाः स्वरूपं गृह्णीयात्।

यद्यपि शोधात्मकानां निबन्धानां संकलनं न सुकरं कार्यं विशेषतश्च तासां शोधपत्रिकाणां कृते याः खलु नवीनाः अथ च समुचितवित्तीयसाधनविहीनाः। नूनमेतत्प्रकाशनात्मकं दुष्करं कर्त्तव्यं मम कृते दुष्करतरं साहसिकं चाभवत्। परन्तु एषा उत्तरप्रदेशीयसंस्कृताकादमी वस्तुतः 'अकादमी'-सम्बन्धि-(एकाडेमिक)-शास्त्रीयकार्यक्रमसंलग्ना भवेदिति मनसि संकल्प्य एतस्याः स्मारिकायाः पत्रिकायाः सम्पादनं समारब्धम्। आशासे च यत् नूनमहं अपरो वा यः कश्चिदकादम्यध्यक्षो भविष्यति स एनामकादमीस्मारिकामागामिषु वर्षेषु विशिष्टशोधपत्रिकारूपेण प्रकाशयिष्यति।

विदुषां पुरत उपस्थाप्यमाणामेतस्यां स्मारिकायां ये शोध-समीक्षा-निबन्धाः मुद्रिताः सन्ति तेषां संकलने अतीव आयासः करणीयोऽभवत्। अस्माकं पुनः पुनः क्रियमाणाः प्रार्थना श्रावं श्रावं मम चाग्रहं दर्शं दर्शं विद्याव्यसनिनो विद्वांसः व्यस्तेऽपि स्वकीये कार्यक्रमे स्मारिकार्थं निबन्धान् दत्त्वा मामनुगृहीतवन्तस्तदर्थं ते धन्यवादार्हाः।

तेषामनुग्रहेणात्मानं कृतकृत्यमनुभवामि विश्वसिमि च यत् भविष्यति काले ते सर्वदैवैता-दृशीमहैतुकीमुदारां सारस्वतसाधनासंजुष्टां कृपां कलयन्त आकादम्याः प्रार्थनामाकर्णयन्तः स्वकीय-लेखनीसमुद्भूतसारस्वतामृतं पाययिष्यन्ति।

अस्या स्मारिकायाः मुद्रणे बहुबाधाः समापतिताः। विधानसभानिर्वाचन-होलिकावकाश-दिवसेभ्यः सम्बद्धमुद्रणालये कार्याधिक्याच्च यथानिर्धारितकार्यसम्पादने प्रत्यवायाः सञ्जाताः। त्वरया च सर्वं कार्यं करणीयमभवत्। त्वरावशात् निश्चयमेव अस्या मुद्रणे त्रुटयः सन्ति। अहं खलु स्वकीयं निबन्धं मुद्रापयितुं नाशक्नुवम्। कारणं चात्रास्ति प्रकाशनाय स्मारिकायाः निर्धारिताः पृष्ठसंख्याः समाप्ताः। त्वरावशाच्च मुद्रणसमयस्याप्यभावः संप्राप्तः। यादृशी एषा स्मारिका सज्जिता वर्तते तादृशीमेव अस्मिन् पुरस्कार-वितरणावसरे समुपस्थापयितुं मया एतस्यास्त्वरितसम्पादनं निर्णीतम्। तथा चासौ स्मारिका पाठकानां पुरस्तात् समुपस्थापिता विद्यते।

ख्रीस्ताब्दस्य १९८४ वर्षीयस्य वार्षिकाधिवेशनस्यानन्तरं जातानामुत्तरप्रदेशसंस्कृताकादमी-सम्पादितकार्याणामनुदानादीनाञ्च संक्षिप्तविवरणं संकलितं वर्तते।

एतस्या मुद्रणविधौ ये ये महानुभावाः साहाय्यं दत्तवन्तस्ते सर्वेऽप्यस्माकं साधुवादार्हाः। अमीषु विशेषतः **आचार्यश्रीशारदानन्दस्वामिनः**, सहायकनिदेशकः **डा० चन्द्रकान्तद्विवेदिनः** साधुवादार्हाः। पुनः पुनः प्रूफसंशोधने त्वरितमुद्रणादौ च सर्वविधं यद्यत् श्रमं कृतवान् तदर्थं मुद्रणालयाध्यक्षः **श्रीविनयशंकरपण्ड्यामहोदयः** धन्यवादार्हः।

अत्रत्यानां सर्वासां त्रुटीनां कृते क्षमाप्रदानाय सुधियः पाठका प्रार्थ्यन्ते, सारस्वताश्च जनाः यद्यत्र कश्चन गुणो विद्यते चेत् तमेवादरेण चेतसा ग्रहणाय निवेद्यन्ते।

चैत्रकृष्णप्रतिपद्वसन्तोत्सवः
२०४१ वै०

अहमस्मि विदुषां वशंवदः
करुणापतिस्त्रिपाठी

अनुक्रमणिका

विषयाः	पृष्ठाः
सम्पादकीयं निवेदनम्—आचार्यकरुणापतित्रिपाठी	
१. कलिकालसर्वज्ञप्रणीतशब्दानुशासनसमीक्षा—आचार्यकालिकाप्रसादशुक्लः	१-१४
२. न च शब्दः स्खलद्गतिः—आचार्यकेदारनाथ ओझा	१५-१८
३. जीवनस्य किं लक्ष्यम्—पं० पट्टाभिरामशास्त्री 'पद्मभूषणम्'	१९-२२
४. लोचनकारस्य स्वैरिता—आचार्यचण्डिकाप्रसादशुक्लः	२३-३३
५. ज्ञानस्य स्वतो वेद्यत्वम्—आचार्यप्रभुलालगोस्वामी	३४-४०
६. विज्ञानभिक्षोर्व्यक्तित्वं तत्सिद्धान्तश्च—आचार्यकेदारनाथत्रिपाठी	४१-४८
७. 'अट्कुप्वाङ्नुम्व्यवायेऽपि' अत्र सूत्रे नियमविषयको विचारः—आचार्यरामप्रसादत्रिपाठी	४९-५३
८. मङ्गलवादः—आचार्यरुद्रप्रसादावस्थी	५४-५६
९. पाणिनीयव्याकरणे काशिकायाः महत्त्वम्—आचार्य ओंकारनाथद्विवेदी	५७-६३
१०. सृष्टेर्मूलतत्त्वस्य यौक्तिकी समीक्षा—डा० रामेश्वरप्रसादत्रिपाठी	६४-६७
११. एकं सद्विप्रा बहुधा वदन्ति—प्रो० संगमलालपाण्डेयः	६८-७१
१२. महाभारतदण्डनीतेः कौटिलीयार्थशास्त्रे विकासः—प्रो० अशोकशास्त्री	७२-७५
१३. नाशुभः कोऽपि वासरः—आचार्यहरिहरपाण्डेयः	७६-८४
१४. विश्वेऽस्मिन् संस्कृता द्विधा—आचार्यमधुसूदनशास्त्री	८५-९२
१५. साहित्यशास्त्रस्य वेदमूलकत्वम्—आचार्यगजाननशास्त्री मुसलगाँवकरः	९३-१०१
१६. उत्तर प्रदेश संस्कृत अकादमी द्वारा आयोजित विविध समारोह	१०२-११२
१७. प्रगति-विवरण	११३-१२०

कलिकालसर्वज्ञप्रणीतशब्दानुशासनसमीक्षा

आचार्यकालिकाप्रसादशुक्लः

पूर्वव्याकरणविभागाध्यक्षः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य

अस्मिन् भरतभूवलये सन्त्यनेकानि संस्कृतभाषानिबद्धानि पुराणानि; दर्शनशास्त्राणि अलङ्कारशास्त्राणि; काव्यानि च। नैतावदेव, संस्कृभाषावगमाय तस्याश्च गीर्वाणगिरो मूलान्वेषणाय च प्रायो नव शब्दानुशासनानि मनीषिभिर्निर्मितानि। तेषां यथायथमवगमायाचार्यैरनेकानि वार्तिकानि भाष्याणि च महता प्रयासेन लोकहिताय प्रणीतानि। नीवृति चास्यां परमार्षचक्षुषोऽनेके शाब्दिकशार्दूलाः शब्दविद्यावगमाय विज्ञानसरणिसमन्वितानि भूयांसि शब्दशास्त्राणि प्रणीतवन्त इति समनुभूयते समैरेव शास्त्रपरिशीलननिर्मलशेमुषीकैः शास्त्रविद्भिः। अमीषामेव शब्दानुशासनानां प्रबलेन प्रभावेणेयं सुरगवी भाषान्तरभाषिणां प्रबलप्रहारशतं सोढ्वाद्याप्यमरतां भजति। सुरगवीं सर्वतो भावेन द्रढयितुं नियन्तुं वा प्रातिशाख्यादिषु प्राचीनतमेषु ग्रन्थेषु निर्दिष्टेषु संकेतितेषु सम्प्रति स्वसत्तामासादयत्सु च बहुषु व्याकरणेषु विपुलकलेवरं दोषत्रयशून्यं सर्वाङ्गसम्भृतं हेमशब्दानुशासनमस्ति। यदुद्दिश्येह किञ्चित्प्रस्तोष्यते।

शब्दानुशासनस्यास्य समुद्भवबीजम्

पाणिनीये सर्वाङ्गसज्जिते शब्दानुशासने शब्दशास्त्रसाम्राज्यमधिरोहत्यपि कोविदकुलकैरवकलाधरस्य श्रीभोजराजस्यानवद्यविद्याजनितां कीर्तिकौमुदीमंशतोऽप्यधिगन्तुमभिलषतो गुर्जरनरेशस्य श्रीसिद्धराजस्य महत्त्वाकाङ्क्षापूर्तिरेवास्य शब्दानुशासनस्य रचनाया मूलमितीतिवृत्तपर्यालोचनेन निश्चेतुं शक्यते। यद्यप्येतदितिवृत्तं ज्ञातुं जैनाचार्याणां सन्त्यनेकानि ग्रन्थरत्नानि, तथापि श्रीप्रभाचन्द्रसूरिविरचितं 'प्रभावकचरित्रम्[1]' ऐतिहासिकदृष्ट्या सर्वमतिशेत इत्यत्र नास्ति संशीतिलेशः।

प्रभावकचरित्रविषये सम्पादकोऽपि रचनादृष्ट्यापि ग्रन्थोऽयं कामं महत्त्वमादधाति। अस्य भाषा प्रवाहपूर्णाऽपि प्रभावप्रसन्नास्ति। वर्णनं सुसम्बद्धं सुपरिमितञ्चास्ति। क्वचनाप्यतिशयोक्तिरसम्भवोक्तिर्वाऽक्षिलक्ष्यी न भवति। समग्रेऽपि संस्कृतसाहित्ये महाकवीनां प्रभावशालिनां धर्माचार्याणां चैतिहासिकवर्णनकर्त्ता तादृशोऽन्यो ग्रन्थो नोपलभ्यते[2]' इति स्वाशयं हिन्दीभाषया व्यञ्जन् प्रभावकचरित्रस्यैतिहासिकत्वं सुतरां स्वीकृतवान्।

तत्र हि—यदा महाराजः सिद्धराजो विजित्य मालवमण्डलं स्वराजधानीं पाटनपुरीं प्रविष्टः, तदा धारानगरस्य सकलसम्पदा सह भोजराजस्य ग्रन्थरत्नराशिमपि समानैषीत्। तस्मिन्नेवावसरे विद्वद्वृन्दारकवन्दितेन श्रीहेमचन्द्राचार्येण प्रदत्ताम्—

---

१. रचनाकालः—वि० सं० १३३४, चैत्रशुक्लः, शुक्रवासरः।

२. सिन्धीयजैनग्रन्थमाला, ग्रन्थाङ्कः १३, प्रभावकचरित्रस्य प्रास्ताविकं वक्तव्यम्, पृ० ६।

भूमिं कामगवि स्वगोमयरसैरासिञ्च रत्नाकरा-
मुक्तास्वस्तिकमातनुध्वमुडुप त्वं पूर्णकुम्भो भव ।
धृत्वा कल्पतरोर्दलानि सरलैर्दिग्वारणास्तोरणा-
न्याधत्त स्वकरैर्विजित्य जगतीं नन्वेति सिद्धाधिपः ॥

इत्याशिषं शिरसा गृहीत्वा राजा पुनरागमनाय सम्प्रार्थ्य चाचार्यं विसृष्टवान् । अन्यदा नियुक्तैरवन्तिकोशीयपुस्तकेषु प्रदर्श्यमानेषु लक्षणपुस्तकमेकं समवलोक्य किमेतदिति भूमिपालेन पृष्टास्ते भोजव्याकरणमेतदिति व्यजिज्ञपन् । विशेषतश्च तैर्निवेदितं यदसौ मालवाधीशो विद्वन्मण्डल-मण्डन आसीत् । तेन च शब्दतर्कालङ्कारप्रभृतीन्यनेकानि शास्त्राणि रचितानि सन्ति । सर्वमेतन्नि-शम्य विषीदन् भूमिपालोऽवदत्—'किन्नास्मत्कोशे शास्त्रपद्धतिः, विश्वस्मिन्नपि गुर्जरे देशे कोऽपि विद्वान् नास्ति' इति ।

तदनु निखिला अपि आस्थानपण्डिताः श्रीहेमचन्द्राचार्यं न्यभालयन् । समयज्ञेन भूमिपालेनापि समर्चितप्रार्थितो मुनिर्हेमचन्द्राचार्याः । 'मुने, नवीनमेकं शब्दानुशासनं निर्मायास्मन्मनोरथं सफलय । त्वामन्तरा नान्यः कश्चनात्र कर्मणि कुशलोऽस्ति । सम्प्रति मदीयोऽयं देशः कामं संक्षिप्तं कलापव्या-करणमवमम्बते । भूयो भूयः परिशीलितादपि तस्मात् सम्यक् शब्दव्युत्पत्तिर्न भवति । पाणिनि-व्याकरणं वेदाङ्गमिति ब्राह्मणा अन्यानवमन्यन्ते । अतो मुनिवृन्दारकविश्वविश्वोपकारायाभिनवं व्याकरणं विधेहि । अनेन मदीयं यशः, त्वदीया ख्यातिश्च भविष्यतः' इति प्रवोचत् ।

भोजराजस्य ग्रन्थराशिं पश्यता सिद्धराजेन भोजनामाङ्कितं शब्दशास्त्रग्रन्थं समवलोक्य तस्मादतिरिक्ता अप्यनेके ग्रन्थास्तेन निर्मिता इति श्रुत्वा च विचारितं भवेद् यदहो ! मदीये गुर्जरे देशे वैभवमस्ति, तद् भोक्तुं विलासस्थानानि विलासिनश्चापि सन्ति, सम्पत्सरितोऽबाधगत्या प्रवहन्ति, विद्याधामानि सन्ति, विद्याव्यसनिनोऽपि सन्ति । अथवा किमेकैकप्रदर्शनेन ! सर्वमस्ति, ऋते स्वतन्त्रसाहित्यान् मदीये देशेऽस्मिन् । परकीयं साहित्यमेवादाय वयं जीवामः । अन्यदीयसाहित्य-परम्पराशृङ्खलां छित्त्वा मदीयो देशः स्वकीयसाहित्यप्राणैः प्राणवान् भवेत्, तथा किमप्याचरणीयम् । राजानो गमिष्यन्ति, तेषामधिकारोऽपि परहस्तगतो भविष्यति, राज्याधिकारिणोऽपि नियतिकव-लिता भविष्यन्ति, राज्यनियमा अपि परिवर्तिता भविष्यन्ति । राजवैभवविलासा विलयं प्राप्स्यन्ति, निखिलवस्तुनाशकसाधनानि शान्तिं गमिष्यन्ति । किम्बहुना, सर्वं प्रयास्यति, परन्तु संस्कृतिः साहित्यञ्च शेषं गमिष्यतः । अवशिष्टे ते अतीतकालिकं भव्यमितिहासं निर्माय रमणीयां रचनां विधाय च गुर्जरगौरवं गाययिष्यतः ।

नैतावदेव, अपि तु सूर्यचन्द्रवत् गुर्जरयशस्तेजो दिगन्तव्यापि भविष्यति । गुर्जरनरेशस्येयं महत्त्वाकाङ्क्षा श्रीहेमचन्द्राचार्यस्य मनस्सरसि रचनारसस्य प्रवाहं प्रवर्द्धितवती । स च स एव रसः श्रीसिद्धहेमचन्द्रशब्दानुशासनाभिधमक्षरदेहस्वरूपं धृतवान् ।

अस्या नूतनाया रचनाया भावनया भावितस्य गुर्जरनरेशस्याशयं प्रकटयताऽऽचार्येण ग्रन्था-स्यास्य प्रशस्तौ प्रतिपादितं यत्—

तेनातिविस्तृतदुरागमविप्रकीर्णशब्दानुशासनसमूहकदर्थितेन ।
अभ्यर्थितो निरुपमं विधिवद् व्यधत्त शब्दानुशासनमिदं मुनिहेमचन्द्रः ॥

अत्रायमभिसन्धिः—मालवाधिपतिर्भोजो व्याकरणनिर्माताऽऽसीत्, स्वदेशे स्वमेव व्याकरणं प्रचारयन्नासीत्। भोजव्याकरणमेव विद्याभूमौ गुर्जरे स्वसाम्राज्यं प्रतिष्ठापयदासीदिति कीर्तिकामुको राजा स्वदेशे स्वव्याकरणस्य न्यूनतया व्यथितमना भवेत्। राज्ञोऽयमप्याशयः प्रतीयते यत्-मम ग्रन्थागारे ईदृशी शास्त्ररचना नास्ति। सम्प्रति विभिन्नेषु देशेषु तानि तानि व्याकरणानि तैस्तैः पण्डितै रचितानि सन्ति, तेषामेव च तत्र प्रचारो भवति। अतो मदीयेऽपि देशेऽत्रत्यैर्विपश्चिद्भिर्निबद्धेन सर्वाङ्गसम्भृतेन शास्त्रेण गुर्जरवास्तव्या गौरवं समादधीरन्निति व्यापकव्यथया व्यथितो भवेत्।

मालवदेशो यथा विविधवैभवविभूषित आसीत्, तथैव विशिष्टनिबन्धैः, तद्रचयितृभिरपि सम्भृत आसीत्। किन्तु मदीयो देशः सकलसम्पत्सम्पन्नोऽपि साहित्येन साहित्यनिर्मातृभिश्च समृद्धः कथन्नभवेदित्यभिलाषाकुलितो भवेत्।

विद्यासम्पादनावसरे परकीयसाहित्येन पराधीनतया जीवनं यापयतो गुर्जरान्तेवासिनो विलोक्य, स्वल्पायुषि अतिविस्तृतादपर्याप्तात् सत्यपि परिश्रमेऽपेक्षितावबोधे कृपणाच्च शब्दानुशासनान्तरात् त्रस्यतां छात्रनिवहानां त्रासं समूलमुन्मीलयितुं प्रयतमानोऽवनिपतिर्गुर्जरगौरववर्द्धनभावनान्दोलितो भवेत्। निखिलमिदं रहस्यम् 'कदर्थितेन' इति पदेनोद्भावयितुं शक्यते। नैतावदेव, किन्तु नवीनसाहित्यं निर्मातुं नरेशस्य प्रेरणातो लक्ष्मीसमृद्धां नीवृतं साहित्यसमृद्धां भावयितुं भावनया साकं गुर्जरदेशस्य तन्निवासिनाञ्च गौरवेण जीवननिर्वाहाय विविधानि सत्यानि प्रादुर्भवन्ति। अतो राजाऽनेकधन्यवादार्हः। पूर्वापरसम्बन्धपर्यालोचनेनैतत्पदार्थावध्यानेन महतोऽस्य ग्रन्थस्य परिशीलनेन चोपर्युक्तस्तदतिरिक्तश्चानेक विधोऽर्थो व्यज्यते। किन्तु प्रशस्तिप्रस्तुतान् त्रीन् शेषान् दूरीकर्त्तुमेवास्य शब्दानुशासनस्य निबन्धनमभूत् इत्ययमर्थो विशेषतो लक्ष्यत इत्यत्र नास्ति काचनापि विप्रतिपत्तिः।

सम्प्रति सुलभानि निखिलानि शब्दानुशासनान्यतिविस्तृतविप्रकीर्णदुरागमत्वादिदोषदूषितानि सकलशाखाऽसंभृतानि ततश्चापर्याप्तानि सन्तीति यदि प्रमाणितं भवेत्, तर्हि शब्दानुशासनमिदम् 'सकलस्यापि भारतवर्षस्य प्रधानतमं व्याकरणम्' इति मुक्तकण्ठं प्रतिपादयितुं शक्येत। नैतावदेव, किन्तु विद्वद्भोग्यकृतेरस्याः परां प्रतिष्ठां परिचित्य रचनापरिपाटीपटुताऽऽवर्जितमनोभिः सुमनोभिः 'कलिकालसर्वज्ञ' इति समुचितोपाधिनाऽमुं व्याकरणकर्त्तारं विभूष्य स्वकीया गुणज्ञता प्रकाशिता भवेत्। यतो हि असन्दिग्धं लोकेऽस्मिन्नुच्चैर्निर्भयमुच्यते। शब्दानुशासनस्यास्य त्रिविधदोषराहित्यं श्रीमदमरचन्द्रसूरिणाऽपि स्वकृतायां बृहदवचूर्णौ 'शब्दानुशासनजातमस्ति, तस्माच्च कथमिदं प्रशस्यतरमिति, ? उच्यते—तद्धि अतिविस्तीर्णं विप्रकीर्णञ्च। कातन्त्रं तर्हि साधु भविष्यतीति चेत्; न, तस्य संकीर्णत्वात्। इदन्तु सिद्धहेमचन्द्राभिधानं शब्दानुशासनं नातिविस्तीर्णम्, न विप्रकीर्णं न संकीर्णमिति। अनेनैव शब्दव्युत्पत्तिर्भवति[1], इति प्रतिपादितम्।

शब्दानुशासनान्तरस्य दोषत्रयदूषितत्वम्

यस्मिन् प्रकरणे विषयं विशदयितुं द्वित्रैः सूत्रैः कार्यं निरुह्येत, तत्र सूत्रसमवायसम्पादनं कार्यकौशलं नास्ति। हेमशब्दानुशानं विहायान्यस्मिन् व्याकरणे विषयविभागदृष्ट्यातिविस्तृत्वदोषः स्थानेस्थाने दृष्टिगोचरीभवति। शब्दशास्त्रेऽर्द्धमात्रागौरवं दोषाय कल्पते। अत एव प्रत्येकं वैयाकरणै-

---

१. देवला० जैन पु० निधिद्वारा प्रकाशितम्, ग्रन्थाङ्कः ९२, पृ० ३, पङ्क्तिः १८ तः २०।

रस्माद् दोषात् त्रातुं स्वस्वमत्यनुसारेण प्रयत्नोऽवश्यमेवानुष्ठीयत इति 'अर्द्धमात्रालाघवमपि पुत्रोत्सवाय मन्यन्ते वैयाकरणाः' उक्तिरियं वैयाकरणेषु प्रसिद्धा।

संक्षिप्तवचनपरिकल्पितेन प्रकरणेन परिमिताक्षरनिर्मितेन सूत्रेण च प्रतिपाद्यावर्थविषयौ यदि निश्शेषतयाऽवगन्तुं शक्येयातां विवक्षितञ्च किञ्चिन्नावशिष्येत, तदेव रचना गुणाय कल्पते, अतिविस्तृतत्वदोषञ्चोन्मीलयितुं प्रभवति। दुर्बोधैः संक्षिप्तवचनैः संभृतेन प्रकरणेनातिविस्तृतत्वदोषं दूरीकुर्वतो रचयितुः शिरसि दुरागमकलङ्कपङ्कपतनात् 'अजे निष्कास्यमाने उष्ट्रः प्रविष्टः' लोकोक्तिरियं सार्थिका भवति।

सूत्राणां रचना कठिनशब्दाकुलिता भवेत्, तेषां व्याख्यानं कठिनशब्दै; दुरूहशैल्या च सम्पादितं भवेत्, पुनः पुनश्चिन्त्यमानोऽपि विषयो ज्ञातो न भवेत्, यदि तथाविधो लेखो भवेत्। सूत्राणामर्थबोधनाय वृत्तिर्लिखिताः सा च दुरधिगता स्यात्। यो हि विषयः सरलतया ज्ञातुं शक्यः स्यात्! तमवगन्तुं काठिन्यमनुभूयेत कठिनश्च विषयो व्याख्यातो न स्यात्, इत्येवमादिभिरव्यवस्थाभिर्व्याकरणं दुरूहं भवतीति वक्तुं योग्यमस्ति। दोषस्यास्य निरासाय पठनसमकालमेव यथा बोधो भवेत् तथा पद्धतिः स्वीकृता स्यात् कठिनोऽपि विषयः सरलतया वर्णितो भवेत्, तदा दुरागमदोषमुक्तं शब्दानुशासनं भवितुमर्हेत्।

प्रत्येकं विषयं स्पष्टयितुं सूत्राणि शृङ्खलावयवा इव परस्परं सम्बद्धानि भवेयुः, सूत्रसमन्वयसमये पूर्वसूत्रेभ्योऽनुवृत्तानि अधिक्रियमाणानि वा पदानि विनापि बुद्धिव्यायाममुपस्थितानि स्युः, सूत्रस्थितपदविवरणसम्पादकानि उदाहरणानि भागीरथीप्रवाहवदस्खलितगत्योपस्थाय विषयं प्रकाशयेयुः, सूत्राणामुद्देश्यतावच्छेदकैराक्रान्तानि तावन्त्येव स्थलानि, न तदतिरिक्तानीति निवेदकानि प्रत्युदाहरणानि क्रमेण पदप्रयोजनपारमर्थिकतां निवेदयेयुः, उदाहरणप्रत्युदाहरणज्ञानपूर्वकं साक्षात् परम्परया वा ध्वन्यमानैतिहासिकप्रभृत्यनेकविषयाणां ज्ञानं सम्पादितं भवेत्, नैतावदेव, किन्तु पठनपाठनकाले विना व्याकुलतां विषयः स्पष्टो भवेत्, यावदपेक्षितम्, तावदेव सूक्ष्मेक्षिकया संगृहीतं भवेत्, येन सन्तोषसन्ततिः समुत्पन्ना स्यात्; तदेव शब्दानुशासनस्य शब्दानुशासनत्वम्। सर्वमेतद् विशिष्टतमे शब्दानुशासनेऽस्मिन् पर्याप्तमवलोक्यत इत्यत्र नास्ति मतद्वयस्यावकाशः। यद्येकविषयप्रतिपादनावसरेऽपरविपयप्रतिपादनं पादलेष्टुकायेत, यथा सन्ध्यवसरे तद्विधायकसूत्रस्थाने समासविधायकसूत्रसम्पातो भवेत्, नामप्रकरणावसरे तदुपयोगिसूत्रस्थाने कारकसूत्राणि अन्तर्गडूयेरन्, कारकप्रसङ्गे च षत्वणत्वसमासविधायकसूत्राणां बलात् प्रवेशः स्यात्, तदा विद्यार्थिभिर्महदसौविध्यमनुभूयेतेत्यत्र नास्ति शङ्कापङ्कावकाशः।

सम्प्रति प्रत्येकं शब्दानुशासनेषु उपरितनो दोषः स्वल्पतयाऽधिकतया वा समुपलभ्यत इत्यत्र मनाग् विहङ्गमावलोकनं कर्त्तव्यम्—

पाणिनीये शब्दानुशासनेऽतिविस्तृतत्वदोषः—"उपदेशेऽजनुनासिक इत्" (१।३।२), "हलन्त्यम्" (१।३।३), "अदर्शनं लोपः" (१।१।६०) "तस्य लोपः" (१।३।९) एतैश्चतुर्भिः सूत्रैः पाणिनीये व्याकरणे यत् कार्यं निरुह्यते, तदेव हैमव्याकरणे "अप्रयोगीत्" (१।१।३७) इत्येकेनैव सूत्रेण।

अग्रे कारकप्रकरणे च पाणिनिना "ध्रुवमपायेऽपादानम्" (१।४।२४) इत्यनेन अपादानकारकस्य व्यवस्था कृता। किन्तु सा व्यवस्थाऽपूर्णाऽऽसीदिति वक्ष्यमाणानि सूत्रान्तराण्यपि विरचितानि-

तथापि पूर्तिनं जातेति वार्त्तिककारेण वार्त्तिकं निर्माय सा व्यवस्था पूर्तिं नीता। तानि चेमानि— 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्[१]' (का० वा०) "भीत्रार्थानां भयहेतुः[२]" (पा० सू० १।४।२५), "पराजेरसोढः"[३] (पा० सू० १।४।२६) "वारणार्थानामीप्सितः"[४] (पा० सू० १।५।२७), "अन्तर्धौ येनादर्शनमिच्छति"[५] (पा० सू० १।४।२८) "जनिकर्त्तुः प्रकृतिः"[६] (१।४।३०), "भुवः प्रभवः"[७] (१।४।३१) "पञ्चमी विभक्ते"[८] (पा० सू० २।३।४२) "यतश्चाध्वकालनिर्माणं तत्र पञ्चमी[९]" (का. वा.) अमीषां सर्वेषां सूत्रवार्तिकानां स्थाने हैमशब्दानुशासने "अपायेऽवधिरपादानम्" (२।२।१९) इत्येकेनैव सूत्रेण सर्वकार्यनिर्वाहो भवति।

तथा हि—'अपायश्च कायसंसर्गपूर्वको बुद्धिसंसर्गपूर्वको वा विभाग उच्यते तेन—

बुद्धया समीहितैकत्वान् पञ्चालान् कुरुभिर्यदा।
बुद्धया विभजते वक्ता तदापायः प्रतीयते॥

इत्यत्रापादानत्वं भवति। एवम् अधर्माज्जुगुप्सते, अधर्माद् विरमति, धर्मात् प्रमाद्यति; अत्र यः प्रेक्षापूर्वकारी भवति, स दुःखहेतुमधर्मं प्राप्य नानेन कृत्यमस्ति, इति ततो निवर्तते। नास्तिकस्तु बुद्धया धर्मं प्राप्य नैनं कारिष्यामीति ततो निवर्तत इति निवृत्त्यङ्गेषु जुगुप्साविरामप्रमादेष्वेते धातवो वर्तन्त इति बुद्धिसंसर्गपूर्वकोऽपायः।

तथा चौरेभ्यो बिभेति, चौरेभ्य उद्विजते, चौरेभ्यस्त्रायते, चौरेभ्यो रक्षति; अत्र बुद्धिमान् वधबन्धपरिक्लेशकारिणश्चौरान् बुद्धया प्राप्य तेभ्यो निवर्तते। चौरेभ्यस्त्रायते; इत्यत्रापि कश्चित् सुहृद् यदीमं चौराः पश्येयुः, नूनमस्य धनमहरेयुरिति बुद्धया तं चौरैः संयोज्य तेभ्यो निवर्तयतीत्यपाय एव। अध्ययनात् पराजयते, भोजनात् पराजयते; अत्रापि अध्ययनं भोजनं वाऽसहमानस्ततो निवर्तत इत्यपाय एव।

यवेभ्यो गां रक्षति, यवेभ्यो गां निषेधति, कूपादन्धं वारयति; इहापि गवादेर्यवादिसम्पर्कं बुद्धया समीक्ष्यान्यतरस्य विनाशं पश्यन् गवादीन् यवादिभ्यो निवर्तयतीत्यपाय एव। उपाध्यायादन्तर्धत्ते, उपाध्यायाद् निलीयते; मा मामुपाध्योऽद्राक्षीदिति तिरोभवति। अतोऽत्राप्यपायः। शृङ्गाच्छरो जायते, गोमयाद् वृश्चिको जायते, गोलोमाविलोमभ्यो दूर्वा जायते, बीजादङ्कुरो जायते; अत्र शृङ्गादिभ्यः शरादयो निष्क्रामन्तीति स्फुट एवापायः। यदि निष्क्रामन्ति, किन्नात्यन्ताय निष्क्रामन्ति? संततत्वात्, अन्यान्यप्रादुर्भावाद् वा।

हिमवतो गङ्गा प्रभवति, महाहिमतो रोहिता प्रभवति; अत्राप्यापः संक्रामन्तीत्यपायोऽस्ति। यद्यपक्रामन्ति, किन्नात्यन्तायापक्राम्यन्ति, संततत्वात् अन्यान्यप्रादुर्भावाद्वा।

वलभ्याः शत्रुञ्जयः षड् योजनानि, षट्सु वा योजनेषु भवति; अत्र वलभ्या निःसृत्य गतानि योजनानि, गतेषु वा तेषु भवतीत्यर्थः। कार्तिक्या आग्रहायणी मासे, ततः प्रभृतिमासे गते भवतीत्यर्थः;

---

१. पापाज्जुगुप्सते, पापाद् विरमति, धर्मात् प्रमाद्यति।
२. चौराद् बिभेति, चौरात् त्रायते।
३. अध्ययनात् पराजयते।
४. यवेभ्यो गां वारयति।
५. मातुर्निलीयते कृष्णः।
६. ब्रह्मणः प्रजाः प्रजायन्ते।
७. हिमवतो गङ्गा प्रभवति।
८. माथुराः पाटलिपुत्रकेभ्य आढ्यतराः।
९. वनाद् ग्रामो योजनं योजने वा, कार्त्तिक्या आग्रहायणी मासे। (सिद्धान्तकौमुदी, पृ० १८२–१८६, १९९ बम्बे सं०)

उभयत्राप्यपाय प्रतीयते। चैत्रात् मैत्रः पटुः, अयमस्मादधिकः, अयमस्मादूनः, माथुराः पाटलिपुत्रकेभ्य आढ्यतराः; अत्र मैत्रादयः पुंस्त्वादिना संसृष्टाः, पटुत्वादिधर्मेण ततो विभक्ताः प्रतीयन्त इति सर्वत्राप्यपायविवक्षा....."।

मन्ये, भावनेयं पाणिनिसूत्राणां पातञ्जलभाष्यदर्शनादुदिता भवेदाचार्यस्य श्रीहेमचन्द्रस्य। तथा हि भाष्यम्—"ध्रुवमपायेऽपादानम्" इत्येकेन सूत्रेण पूर्वोक्तानां सूत्रवार्तिकानामुदाहरणानि व्यवस्थाप्य प्रत्याख्यानं कृतं भगवता पतञ्जलिना। तथाहि—"जुगुप्साविरामप्रमादार्थानामुपसंख्यानं कर्त्तव्यम्। जुगुप्सा अधर्माज्जुगुप्सते, अधर्माद्-बीभत्सते, धर्माद् विरमति, धर्मान्निवर्तते, धर्मात् प्रमाद्यति, धर्मान्मुह्यति, इदञ्चोपसंख्यानं कर्त्तव्यम्—साङ्काश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति। तत्तर्हीदं बहु वक्तव्यम्। न वक्तव्यम्, इह तावधर्माज्जुगुप्सते, अधर्माद् बीभत्सत इति। य एव मनुष्यः प्रेक्षापूर्वकारी भवति, स पश्यति दुःखोऽधर्मः, नानेन कृत्यमस्तीति स बुद्ध्या संप्राप्य निवर्तते। तत्र "ध्रुवमपायेऽपादानम्" इत्येव सिद्धम्। इह च धर्माद् विरमति, धर्मान्निवर्तत इति, धर्मात् प्रमाद्यति, धर्मान् मुह्यतीति, य एष मनुष्यः संभिन्नबुद्धिर्भवति, स पश्यति—नेदं किञ्चिद् धर्मो नाम, नैनं करिष्यामीति स बुद्ध्या संप्राप्य निवर्तते। तत्र "ध्रुवमपाये"इत्येव सिद्धम्। इह च सांकाश्यकेभ्यः पाटलिपुत्रकाक्तु अभिरूपतरा इति यस्तैः साम्यं गतवान् भवति, स एतत् प्रयुङ्क्ते[1]।

अयं योगः शक्योऽवक्तम्, कथं बृकेभ्यो बिभेति, दस्युभ्यो बिभेति, य एष मनुष्यः प्रेक्षापूर्वकारी भवति, स पश्यति 'यदि मां बृकाः पश्यन्ति, ध्रुवो मे मृत्युरिति। स बुद्ध्या संप्राप्य निवर्तते। तत्र 'ध्रुवमपाये' इत्येव सिद्धम्। इह चौरेभ्यः त्रायते, दस्युभ्यस्त्रायत इति। य एष मनुष्यः प्रेक्षापूर्वकारी सुहृद् भवति, स पश्यति—यदीमं चौराः पश्यन्ति, ध्रुवमस्य वधबन्धनादिपरिक्लेश इति। स बुद्ध्या संप्राप्य निवर्तयति। तत्रापि तेनैव सिद्धम्[2]। एवमेवान्यत्रापि बोद्धव्यम्[3]।

'ध्रुवमपायेऽपादानम्' इत्येव सिद्धम्[4]। अयमपि योगः शक्योऽवक्तुम्। कथम्? उपाध्यायादन्तर्धत्ते इति। पश्यत्ययं 'यदि मामुपाध्यायः पश्यति, ध्रुवं मे प्रेषणमुपालम्भो वा' इति, स बुद्ध्या सम्प्राप्य निवर्तते, तत्र 'ध्रुवमपायेऽपादानम्' इत्येव सिद्धम्[5]। अयमपि योगः शक्योऽवक्तुम्। कथं गोमयाद् वृश्चिको जायते, गोलोमाविलोमभ्यो दूर्वा जायन्त इति। अपक्रामन्ति तास्तेभ्यः। यद्यपक्रामन्ति किं नात्यन्तायापक्रामन्ति। सन्ततत्वात्। अथवान्याश्चान्याश्च[6] प्रादुर्भवन्ति। अयमपि योगः शक्योऽवक्तुम्। कथं हिमवतो गङ्गा प्रभवतीति। अपक्रामन्ति तस्मादापः। यद्यपक्रामन्ति किं नात्यन्तायापक्रामन्ति। सन्ततत्वात्। अथवा अन्याश्चान्याश्च प्रादुर्भवन्ति[7]।

मन्ये हेमचन्द्राचार्येण महाभाष्यं सम्यगालोचितं भवेत्। यतो हि पूर्वोक्तसूत्राणां प्रत्याख्याने य एव पन्था महाभाष्यकारेण निर्मितोऽस्ति स एव पन्थाः सूत्राणां लाघवे हेमचन्द्राचार्येणाश्रितो वर्तत इति द्वयोस्तोलनेन रहस्यमुद्घाटितं भविष्यति। यदि हेमचन्द्राचार्येण भाष्यं नावलोकितमभविष्यत्तदेदं लाघवमपि दुष्करमभविष्यत्। तदा पाणिनीयव्याकरणस्य महती प्रतिष्ठा महाँश्च प्रचारः आस्तामित्यत्र नास्ति मतद्वयस्यावकाशः। परवर्तिभिः पूर्ववर्तिनोऽनुस्रियन्त इत्यत्रापि नास्ति संशीतिलेशः। अतः व्याकरणस्य आचार्यस्य तथाकरणं न्यायादपेतं नास्ति, किन्तु पूर्वोक्तेषु स्थलेष्वनुस्रियमाणोऽपि भाष्यकारः

---

१. महाभाष्यम्, १।४।२। (पा० सू०)। २. १।४।२५। पा० सू०। ३. १।४।२६ (पा० स०)
४. १।४।२७ (पा० सू०) ५. १।४।२८ (पा० सू०) ६. १।४।३० (पा० सू०) ७. १।४।३१ (पा० सू०)

"आख्यातोपयोगे। १।४।२९। (पा० सू०) इत्यत्राचार्येण नानुसृतः। "अयमपि योगः शक्योऽवक्तुम्। कथमुपाध्यायादधीत इति। अपक्रामति तस्मात्तदध्ययनम्। यद्यपक्रामति, किं नात्यन्तायापक्रामति। सन्ततत्वात्। अथवा ज्योतिर्वज्ज्ञानानि भवन्ति"[1] इति भाष्यं पर्यवेक्षमाणोऽपि हेमचन्द्राचार्यः "आख्यातर्युपयोगे" २।२।७३ इति सूत्रयित्वा—"अपादानत्वेनैव सिद्धे उपयोग एव यथा स्यादित्येवमर्थं वचनम्" इति वृत्तिं तस्य लिखितवान्।

इदमत्राचार्यस्याकूतं भवेद् यत् 'नटस्य शृणोति' इत्यत्रोपयोगादिविक्षायां सत्यामपि च बुद्धिकृतापायविवक्षायां पञ्चमी मा भूदित्येतदर्थं सूत्रमावश्यकम्। किन्त्वनभिधानादेव तत्र तादृशी विवक्षा नैव स्यादिति सूत्रं मन्दप्रयोजनम्, अन्यथा पूर्वोक्तेष्वपि सूत्रेषु तादृशी काचन कल्पना कर्तुं दुश्शका नासीदित्याचार्येण कथङ्कारं न विभावितमिति सुधियो विभावयन्तु।

हेमशब्दानुशासनस्यादर्शभूतं शब्दानुशासनम्

व्याकरणं भाषाया व्यवस्थापकं नियामकं चास्ति। तत्र यद्येकस्या भाषाया अनेकानि सन्ति व्याकरणानि तर्हि तेषु पूर्वापेक्षया परेषु शब्दसिद्धिः समानैव समवलोक्यते। तत्र काचन नवीनता नैव निभाल्यते, किन्तु रचनापद्धतौ स्वीकृता सरलता कठिनता वा, सर्वदेशीयता एकदेशीयता वा, विशेषता नवीनता वा, प्रत्येकं व्याकरणेष्वंशतः पूर्णतो वा उपलभ्यत इति नापरोक्षं प्रेक्षावताम्।

यद्यपि सूत्रवृत्तिपर्यालोचनेन स्पष्टमिदं प्रतीयते यत् शाकटायनव्याकरणमेवादर्शं[1] आसीत्, तथापि जैनेन्द्रव्याकरणस्यापि तत्र तत्र परिलक्ष्यमाणः प्रभावः केन तिरोधातुं शक्येत। शाकटायनव्याकरणं केन प्रभावितमस्तीति निवेदयितुमवसरो नास्तीति नात्र निवेद्यते। शाकटायनशब्दानुशासनमुपजीव्यप्रवर्तमानोऽप्याचार्यो महाभाष्यस्य शाकटायनस्य च विस्तृतविषयानपि स्वल्पैः शब्दैस्तथा कौशलेन सूत्रवृत्तौ समावेशितवान्, यथा तदवगमे मनागपि मन्दता नानुभूयते। किम्बहुना, नवनीतमिव गहनविषयस्य तत्त्वं निष्कृष्य स्वल्पैः शब्दैर्निबध्नन् सूत्रवृत्तिरचनायामतिविस्तृतत्त्वदोषमपास्यंश्चाचार्यो नूतनरचनागौरवमावहतीव। शाकटायनव्याकरणस्य प्रथमाध्यायस्य प्रथमपादस्य विंशतिसूत्राण्यविकलान्येव शब्दानुशासनेऽस्मिन् संगृहीतानि सन्ति—

	[2]शा० सू०	सि० सू०		शा० सू०	सि० सू०
(१) अप्रयोगीत्	१।१।५	१।१।३७	(८) तिरोऽन्तर्धौ	१।१।३१	३।१।९
(२) आसन्नः	१।१।७	७।४।१२०	(९) स्वाम्येऽधिः	१।१।३४	३।१।१३
(३) सम्बन्धिनां सम्बन्धे	१।१।८	७।४।१२१	(१०) प्राध्वं बन्धे	१।१।३८	३।१।१६
(४) बहुगुणं भेदे	१।१।१०	१।१।४०	(११) परः	१।१।४४	७।४।११८
(५) कसमासेऽध्यर्धः	१।१।११	१।१।४१	(१२) स्पर्धे	१।१।४६	७।४।११९
(६) क्रियार्थो धातुः	१।१।२२	३।३।३	(१३) नं क्ये	१।१।६३	१।१।२८
(७) गत्यर्थवदोच्छः	१।१।३०	३।१।८	(१४) मनुर्नमोऽङ्गिरो वति	१।१।६७	१।१।२४

१. १।४।२९ (पा० सू०) २. शाकटायनसूत्राङ्काः सिद्धहेमचन्द्रसूत्राङ्काः।

(१५) स्वैरस्वैर्यक्षौहिण्याम्	१।१।८४	१।१।१५	(१८) सम्राट्	१।१।११३	१।३।१६
(१६) वौष्ठौती समासे	१।१।८८	१।२।१७	(१९) सुचो वा	१।१।१७०	२।३।१०
(१७) इन्द्रे	१।१।९७	१।२।३०	(२०) समासेऽसमस्तस्य	१।१।१७३	२।१।१३

यदि परिवर्तितमात्राक्षराणि सूत्राणि पर्यालोच्येरन् तर्हि प्रथमाध्यायस्य द्वितीयपादस्य अनेकानि सूत्राप्युपलभ्येरन् । यदि शाकटायनस्य चतुर्णामध्यायानां षोडश पादा अवलोक्येरन् तदा तोलनात्मकः कश्चन ग्रन्थ आत्मलाभं लभेत, किन्तु दिङ्मात्रमिह दर्शितम् ।

सूत्रसाम्ये तद्वृत्तिसाम्यमपि निश्चितमेवास्तीति सिद्धहेमचन्द्रशब्दानुशासनस्य तत्त्वप्रकाशिका-वृत्तिः, शाकटायनस्य अमोघा वृत्तिश्च परस्परं बहुत्र साम्यमाधत्त इति नापरोक्षं प्रेक्षावताम् । द्वित्राणि स्थलानि समुदाह्रियन्तेऽत्र । अमोघा वृत्तिः—इह शास्त्रे उपदिश्यमानो वर्णः समुदायो वा लौकिकशब्द-प्रयोगे न स इत्संज्ञो भवति । अत एव चास्य प्रयोगाभावः सिद्धः । उपदेशस्तु कार्यार्थः । एधि-एधते शा० सू० १।१।५ ।

तत्त्व० वृत्तिः—इह शास्त्रे उपदिश्यमानो वर्णस्तत्समुदायो वा यो लौकिके शब्दप्रयोगे न दृश्यते स एति अपगच्छतीति इत्संज्ञो भवति । अप्रयोगित्वानुवादेनेत्संज्ञाविधानाच्चास्य प्रयोगा-भावः सिद्धः । उपदेशस्तु धातुनामप्रत्ययविकारागमेषु कार्यार्थः । धातौ एधि एधते । है० सू० १।१।३७ ।

अमो० वृत्तिः—बहुगण इत्येतौ शब्दौ भेदे वर्तमानौ संख्यावद्भवतः । भेदो नानात्वम्—एकत्व-प्रतियोगि-बहुकः, बहुधा, बहुकृत्वः । भेदे किम् ? वैपुल्ये सङ्घे च संख्याकार्यं मा भूत् । बहुगणना-ऽत्यन्ताय संचक्षते इति वचनम् । अत एव भूर्यादीति निवृत्तिः । शा० सू० १।१।१० ।

तत्त्व० वृत्तिः—बहुगुण इत्येतौ शब्दौ भेदे वर्तमानौ संख्यावद्भवतः । भेदो नानात्वमेकत्व-प्रतियोगि । बहुकः, बहुधा, बहुकृत्वः । भेद इति किम् ? वैपुल्ये सङ्घे च संख्याकार्यं माभूत् । बहुगणौ न नियतावधिभेदाभिधायकाविति संख्याप्रसिद्धेरभावाद् वचनम् । अत एव भूर्यादि निवृत्तिः । है० सू० १।१।४० ।

इत्थं सूत्राणां साम्ये सत्यपि वृत्तिविवरणे आचार्यस्य कौशलनिगूहनं पाणितलेन तरणितिरो-धानायेत । एवं पूर्वाचार्याणामविकलान्यपि तानि वचांस्यादायामुना परिष्कृत्य तथा निबद्धानि यथा नूतनानीव प्रतिभान्ति । विनाऽऽयासमर्थावगमाय किञ्चिद् परिवर्त्य कानिचित् शाकटायनसूत्राणि गृहीतानि सन्ति । अक्षरपरिवर्तनेन स्थानपरिवर्तनेन चार्थपरिवर्त्तनं न जातमित्येव कौशलमा-चार्यस्य[१] ।

प्रकरणविभागः

व्याकरणेऽस्मिन्नष्टावध्यायाः सन्ति । तत्र प्रथमे उणादिसहितः सप्ताध्यायाः संस्कृतभाषां व्यवस्थापयन्ति । अष्टमश्चाध्यायः प्राकृतापभ्रंशादिभाषानियमान् निदर्शयति । सप्ताध्यायानां सूत्रेषु स्वोपज्ञं वृत्तिद्वयम् । (१) लघुवृत्तिः (२) बृहद्वृत्तिः तत्त्वप्रकाशिका चास्ति । अनयोः पद्धतिः साम्यं न विजहाति ।

सहैव संस्कृतप्राकृतादिव्याकरणलेखनपरिपाटी हेमचन्द्रेणैव प्रचालिता । वररुचिभामहप्रभृति-

वैयाकरणविरचितप्राकृतव्याकरणस्य हेमचन्द्राचार्यविरचितप्राकृतव्याकरणस्य रचनायां च महान् भेदो लक्ष्यते। प्राकृतापभ्रंशादिभाषानिरूपणे आचार्यस्य विशिष्टं स्थानमस्तीत्यत्र नास्ति मतद्वयस्यावकाश इत्यलमप्रस्तुतप्रशंसया।

अनयोर्वृत्त्योरियानेव भेदोऽस्ति यत् लघुवृत्तौ मतान्तराणां चर्चाया अवकाशो नास्ति, आकृतिगणस्योल्लेखो नास्ति, सूत्राणां वृत्तिविस्तरेण निरूपिता नास्ति, किन्तु परिगणितान्युदाहरणानि तदुपयोगिन्यो वृत्तयश्च निरूपितानि सन्तीति लघुपदमन्वर्थतां भजते। बृहद्वृत्तौ च सूत्राणां विस्तरेण

शा. सू.		सि. सू.	
प्रादिर्ना प्रत्यये	१।१।२४	न प्रादिरप्रत्ययः	३।३।४
कणे मनः श्रद्धोच्छेदे	१।१।२८	कणे मनस्तृप्तौ	३।१।६
नित्यं हस्ते प्राणौ स्वीकृतौ	१।१।३६	नित्यं हस्ते पाणावुद्वाहे	३।१।५
ह्रस्वो वाऽपदे	१।१।७४	ह्रस्वोऽपदे वा	१।२।२२
प्रस्योढोढ्यूहैषैष्ये	१।१।८४	प्रस्यैषैष्योढोढ्यूहे स्वरेण	१।२।१४
एवेऽनियोगे	१।१।८७	अनियोगे लुगेवे	१।२।१६
चादेरचोऽनाङः	१।१।१०१	चादिः स्वरोऽनाङ्	१।२।३६
सौ वेतौ	१।१।१०३	सौ नवेतौ	१।२।३८
अब्धौ चोदन्वान्	१।२।९९	उदन्वानब्धौ च	२।१।९८

वृत्तिः, पूर्वापरसम्बन्धः, बहुवचनादिपदानां प्रयोजनम्, मतान्तरोल्लेखः, प्रत्येकपदयथार्थतासूचकान्युदाहरणप्रत्युदाहरणानीति संस्कृतभाषामहासरितः पारप्राप्तये यावदपेक्षितं तावत्सर्वं समावेशितमस्तीति नाविदितचरं विदुषाम्।

अस्य व्याकरणस्य प्रथमः सप्ताध्यायात्मको महाविभागश्चतुर्भिर्विभागैर्विभक्तोऽस्ति (१) चतुष्कवृत्तिः (२) आख्यातवृत्तिः (३) कृद्वृत्तिः (४) तद्धितवृत्तिश्चेति।

१. चतुष्कवृत्तिः

सन्धिः, नाम, कारकम्, समासश्चेति चतुष्कवृत्तिः। चतुष्कवृत्तेश्चत्वारो विभागा निम्ननिर्दिष्टाः सन्ति।

अध्यायः	पादः	सूत्रसंख्या	प्रकरणम्	विभागः
प्रथमः	प्रथमः	४२	संज्ञा	प्रथमो भागः
,,	द्वितीयः	४१	स्वरादिसंधिः	
,,	तृतीयः	६५	व्यञ्जनसन्धिः	
,,	चतुर्थः	९३	नामप्रकरणम्	द्वि० भागः
द्वितीयः	प्रथमः	११८		
,,	द्वि०	१२४	कारकम्	—तृ० भागः
,,	तृ०	१०५	षत्वणत्वे	चतुर्थो भागः
,,	चतु०	११३	स्त्रीप्रत्ययश्च	
तृतायः	प्र०	१६३	समाससामान्यनियमः	
,,	द्वि०	१५६	समासविशेषनियमः	

२. आख्यातवृत्तिः

अत्र दशप्रकारकाः प्रत्ययाः भावकर्मप्रक्रिया, ण्यन्तसन्नन्तयङऽन्तनामधातवः सेडनिड्धातुविमर्शश्च समावेशिताः सन्ति। अस्मिन् द्वितीयस्मिन् विभागे निम्नलिखितानि सूत्राणि अध्यायाः, पादाश्च सन्ति—

तृ०	तृ०	१०८
,,	च०	९४
च०	प्र०	१२१
,,	द्वि०	१२३
,,	तृ०	११५
,,	च०	१२२
		६८३

३. कृद्वृत्तिः

अत्र कृत्प्रत्ययसम्बन्धिनो नियमा निर्दिष्टाः सन्ति। पञ्चमाध्यायस्य द्वितीयपादस्यान्तिमं सूत्रं "उणादयः ५।२।९३" अस्य पूर्तये वृत्तिसहितानि १००६ संख्याकानि उणादिसूत्राणि पृथग् निर्मितानि सन्ति। तृतीयस्मिन्नस्मिन् विभागेऽधोनिर्दिष्टानि सूत्रपादादीनि सन्ति—

प्रपञ्चमः	प्र०	१७४
,,	द्वि०	९३
,,	तृ०	१४१
,,	च०	९०
		४९८

४. तद्धितवृत्तिः

अत्र तद्धितप्रत्ययाः, समासान्ताः, प्लुतविवेचनम्, न्यायसूत्राणि तेषां विस्तरेण विवेचनं च साधु निरुपितमस्ति। चतुर्थस्य अस्य विभागस्य सूत्रादीनि—

षष्ठः	प्र०	१४३
,,	द्वि०	१४५
,,	तृ०	२१९
,,	च०	१८५
स०	प्र०	१९७
	द्वि०	१७२
	तृ०	१८२
	च०	१२२
		१३६५

अस्याष्टमोऽध्यायो द्वितीयमहाविभागत्वेन प्रसिद्धोऽस्ति। अस्यापि चत्वारः पादाः सन्ति, चतुर्षु पादेषु १११९ सूत्राणि सन्ति। अनेनाध्यायेन केवलप्राकृतादिभाषाशब्दानुशासनं भवति। चतुर्थे पादे शौरसेनीभाषार्थं सप्तविंशतिः, मागधीभाषार्थं षोडश, पैशाची भाषार्थं द्वाविंशतिः चूलिका-पैशाचीभाषार्थं चत्वारि, अपभ्रंशभाषार्थं विंशत्युत्तरशतम् प्राकृतभाषार्थं ९३० सूत्राणि सन्ति संस्कृतभाषायाः प्राकृतादिषण्णां भाषाणां च ज्ञानायेदमेकमपि शब्दानुशासनं कामं पर्याप्तमस्तीति सुधियः स्वयमेव विभावयिष्यन्ति।

स्याद्वादसिद्धान्तो हैमशब्दानुशासनञ्च

अस्य व्याकरणस्य कस्यापि विभागस्य प्रकरणस्य प्रयोगस्य च विचारावसरे "सिद्धिः स्याद्-वादात्" (है० १।१।२) इत्यधिकारसूत्रन्तूपस्थितमेव दृश्यते, यतो हि सकलेऽपि शब्दानुशासने सूत्रमिदं स्वाधिकारव्यापकतया प्रत्याययति।

इदमत्राकूतम्—"गम्ययपः कर्माधारे" (२।२।७४) इत्यनेन स्याद्वादपदात् पञ्चमी, तेन स्याद्-वादमाश्रित्येत्यर्थः, शब्दानुशासनस्य प्रक्रान्तत्वेन शब्दानामित्यध्याहारो बोध्यः सिद्धिः शब्दानित्यत्व-वादिमते निष्पत्तिः, शब्दनित्यत्ववादिमते ज्ञप्तिः, स्याद्वादमते चोभयथाप्यदोषः। एवञ्च स्याद्वादमाश्रित्य शब्दानां निष्पत्तिर्ज्ञप्तिर्वा बोध्येति सूत्रार्थः। स्याद्वादपदार्थश्च स्याद्रूपो वादः स्याद्वाद इति समासे वादशब्दोऽनेकान्तबोधकः, स्याच्छब्दस्तु अनेकान्तद्योतकः। स्यादित्येतस्य वाद इति समासे च स्यादित्यव्ययं वाचकत्वेनानेकान्तद्योतकमिति द्विधा स्याद्वादपदार्थो निरूपितस्तेषु तेषु निबन्धेषु।

स्यादित्यव्ययस्य वाचकत्वे तु तेनैव सकलार्थबोधे स्यादस्त्येवेत्यादिप्रयोगेषु अस्त्येवादिप्रयोग-स्यानर्थक्यं पौनरुक्त्यं वा भवेदित्यनेकान्तद्योतकत्वमेवाङ्गीकार्यम्। ननु यदि निपातानां द्योतकत्व-पक्षाभिप्रायेण गुणभावेनानेकान्तस्य द्योतकत्वं स्यादित्यव्ययस्योररीक्रियते, तदाऽनेकान्तवाचकपदस्य गुणभावेनैव वाचकत्वं स्वीकार्यम्, 'येनैव रूपेण वाचकं पदमभिधत्ते तेनैव रूपेण निपातो द्योतयति' इति सिद्धान्तात्। यदि च स्यादित्यव्ययं केनाप्युक्तमनेकान्तं द्योतयतीत्युच्यते तर्हि तच्छब्दप्रयोगबलेन तदर्थ-विज्ञानात्तस्य तद्वाचकत्वमेवापद्येतेति गुणभावेन तस्यानेकान्तद्योतकत्वासंभवः। एवमेव प्रधानभावेन स्यादित्यव्ययमनेकान्तद्योतकमित्यसमञ्जसम्, प्रधानभावेनास्तीत्यादिशब्दैरस्तित्वाद्यर्थावगतौ स्यादि-त्यनेन प्रधानभावेन तदर्थद्योतननिष्फलत्वात्। यदि च तन्नास्तित्वाद्यर्थंद्योतकं स्यादित्युच्येत, तर्हि न कुत्राप्यनभिहितद्योतनदर्शनं भवति। अपि च अस्तिपदं प्रधानतया आस्तित्वमभिधत्ते, स्यादिति च गुणरूपेण नास्तित्वाद्यभिधत्ते। इत्थञ्च समुपपन्नं स्याच्छब्दस्य प्रधानगुणभावेनानेकान्तद्योतकत्वमित्यपि अपसिद्धान्तः, यथा स्यादित्यनेनानभिहितनास्तित्वाद्यर्थावगतिस्तथा तेन सर्वार्थाभिधानं कर्त्तुं शक्यम्। न चान्ययोगव्यवच्छेदार्थकैवशब्दात् सर्वार्थव्यावर्तनेन् न तेषां द्योतकत्वं स्यादित्यस्य तुल्ययुक्त्या यथा एवकारेण सर्वार्थव्यावर्तनं तथा कथन्न सर्वार्थान्तर्वर्तिनास्तित्वादिव्यावर्त्तनमिति समायातं स्याच्छब्दस्यानेकान्ताद्योतकत्वमिति चेत्, न, यथा अस्तीत्यादिपदानि प्रधानगुणभावेनास्तित्वाद्यर्था-नभिदधते, तथा स्याच्छब्दोऽपि प्रधानगुणभावेन तदर्थान् द्योतयतीति सिद्धान्तात्।

अयमभिप्रायः—द्रव्यरूपेण अस्तित्वं पर्यायरूपेण च नास्तित्वमिति द्रव्यार्थिकनयापेक्षया अस्तित्वस्य मुख्यत्वम्, तस्य च तद्विनाऽनवस्थितस्यास्तित्वसापेक्षस्यैव संभव इति। अस्मिन्नयेऽस्तित्वस्य गौणत्वमिति द्रव्यार्थिकपर्यायार्थिकनयापेक्षप्रधानगुणभावेन स्याच्छब्दस्यानेकान्तद्योतकत्वं तदितरस्य

च वाचकत्वं सिद्धम्। जीवाजीवाश्रव-बन्ध-संवरनिर्जरा-मोक्षाख्यतत्त्वेषु भावाभावनित्यत्वानित्यत्व-भेदाद्यनन्तधर्मसहितैकरूपत्वमनेकान्तत्वम्, एकस्यैकानेकस्वरूपत्वमनेकान्तत्वमिति यावत्। निखिलमपि वस्तुद्रव्यरूपेण नित्यम् पर्यायरूपेणानित्यं तथा तदेव स्वरूपेण सत्, अन्यरूपेणासत्, एवं सकलाश्वव्यक्त्यनुगतत्वात् समान्यं सत्तापेक्षया च विशेषः। शर्करादीनां माधुर्यं शब्दवाच्यत्वेनाभिलाप्यं तन्न्यूनाधिक्यस्य च शब्दावाच्यत्वेनानभिलाप्यम्। एवञ्चैकस्यैव वर्णस्य ह्रस्वत्वादिकं स्याद्वाद-मन्तरेण नोपपद्येत, एवमेकस्यैवानेककारकसन्निपातः, सामानाधिकरण्यम्, विशेष्यविशेषण-भावादयः स्थान्यादेशप्रकृतिविकृतिनिमित्तनिमित्तिभावादयो नोपपद्येरन् स्याद्वादमन्तरेण, यतो हि वर्णानां नित्यत्वपक्षे यस्य वर्णस्य ह्रस्वत्वं विधीयते तस्यैव दीर्घत्वं तत्पक्षे न सिद्ध्येत, ह्रस्वत्वादेः पूर्वधर्म-निवृत्तिपूर्वकधर्मकत्वात्।

वर्णनामनित्यत्वपक्षे वर्णानां विनाशादेकस्यैव ह्रस्वत्वादिविधिरित्यनुपपन्नम्। स्याद्वादसिद्धांत-स्वीकारे वर्णरूपतया शब्दानां नित्यत्वं ह्रस्वादिरूपतया त्वनित्यत्वमिति ह्रस्वदीर्घादिविधानोपपत्तिः सिद्ध्यति। एवम् 'पीयमानं मधु मदयति' इत्यादौ मधुनि पीयमानापेक्षया कर्मकारकत्वम्; मदयतीत्य पेक्षया कर्तृत्वमित्येकस्यैवानेककारकसंनिपातः स्याद्वादनये सिद्ध्यति। तदस्वीकारे तु नित्यत्वे एकरूपा-वृत्तित्वद्रूपान्तरानुपपत्तेर्न घटेत कारकसन्निपातः। तथैवैकान्तवादिनये भिन्नप्रवृत्तिनिमित्तयोरेकत्रार्थे वृत्तिरूपसामानाधिकरण्यं घटपटयोरिव सर्वथैव भेदे भवितुं नार्हति। सर्वथा भेदेऽपि सामानाधिक-रण्यं न घटते, सामानाधिकरण्यस्य भेदनिबन्धनत्वात्। यथा नीलमुत्पलमित्यत्र भेदरूपैकान्तपक्षेऽभेद-रूपैकान्तपक्षे वा सामानाधिकरण्यं न सम्भवतीति कथञ्चिद् भेदः, कथञ्चिदभेद् इत्येवंरूपः स्याद्वादः स्वीकर्त्तव्य एव। एकान्तवादिनये विशेष्यविशेषणभावोऽपि न घटते। तथाहि––विशेष्यविशेषणयो-र्नितान्तं भेदाङ्गीकारे घटपटयोरिव विशेष्यविशेषणभावो न स्यात्। एवं तयोर्नितान्तमभेदाङ्गीकारे घटो घट इत्यादिवद्विशेष्यविशेषणभावो न स्यात्, तस्य भेदाभेदनिमित्तकत्वादिति कथञ्चिद्विशेष्यत्वं कथञ्चिद्विशेषणत्वमित्येवंरूपः स्याद्वादः समाश्रयणीयः।

एवञ्च शब्दानुशासनस्य सर्वसाधारण्यं स्याद्वादनये एव सिद्ध्येत्, न शब्दनित्यत्वे नापि शब्दानित्यत्वे, तयोरेकान्तत्वेन सकलग्राह्यत्वाभावात्। तथा चोक्तं स्वयं ग्रन्थकृता—'स्यादित्य-व्ययमनेकान्तद्योतकम्। ततः स्याद्वादोऽनेकान्तवादः, नित्यानित्याद्यनेकधर्मशबलैकवस्त्वभ्युपगम इति यावत्। ततः सिद्धिर्निष्पत्तिर्ज्ञप्तिर्वा प्रकृतानां शब्दानां वेदितव्या। एकस्यैव हि ह्रस्वदीर्घादिविधयो-ऽनेककारकसन्निपातः सामानाधिकरण्यं विशेषणविशेष्यभावादयश्च स्याद्वादमन्तरेण नोपपद्यन्ते। सर्वपार्षदत्वाच्च शब्दानुशासनस्य सकलदर्शनसमूहात्मक स्याद्वादसमाश्रयणमतिरमणीयम्। यदवोचाम् स्तुतिषु—

> अन्योन्यपक्षप्रतिपक्षभावाद्
> यथा परे मत्सरिणः प्रवादाः।
> नयानशेषानविशेषमिच्छन्न
> पक्षपाती समयस्तथा ते॥[१]

---

१. अन्ययोगव्यवच्छेदे श्लोक ३०। अयं भावः—साध्यधर्मविशिष्टधर्मिणः पक्षाः 'शब्दोऽनित्य' इत्यादयः। अन्योन्यं परस्परं पक्षप्रतिपक्षाः, तेषां भावः परस्परविरुद्धधर्मोपन्यासः, तस्माद्धेतोः यथा येन प्रकारेण, परे जिन-

स्तुतिकारोऽप्याह—

नयास्तव स्यात्पदलाञ्छना इमे रसोपविद्धा इव लोहधातवः ।
भवन्त्यभिप्रेतफला यतस्ततो भवन्तमार्याः प्रणता हितैषिणः ॥[1]"

अनभिप्रेतस्याद्वादानां त्विदमाकूतं यदेकस्मिन् धर्मिणि परमार्थसति परमार्थसतां युगपत्सत्त्वादीनां धर्माणां परस्परपरिहारस्वरूपाणां समावेशो न संभवति । अयमाशयः—सत्यं यदस्ति वस्तुतस्तत् सर्वथा सर्वदा सर्वत्र सर्वात्मना निर्वचनीयेन रूपेणास्त्येव, न नास्ति, यथा प्रत्यगात्मा । यच्च क्वचित् कथञ्चित् कदाचित् केनचिदात्मनाऽस्तीत्युच्यते, यथा प्रपञ्चः, तद्व्यवहारतो न तु परमार्थतः तस्य विचारासहत्वात् । नहि प्रत्ययमात्रं वास्तवत्वं व्यवस्थापयति, शुक्तिमरुमरीचिकादिषु रजततोयादेरपि वास्तवत्वप्रसङ्गात्, लौकिकानामबाधेन तु तद्व्यवस्थायां देहात्माभिमानस्याप्यबाधेन तात्त्विकत्त्वे सति लोकायतमतापातेन नास्तिकत्वप्रसङ्गात् । पण्डितरूपाणां तु देहात्माभिमानस्य विचारतो बाधनं प्रपञ्चस्याप्यनैकान्तस्य तुल्यमिति ।

अपि च सदसत्त्वयोः परस्परविरुद्धत्वेन समुच्चयाभावे विकल्पः । न च वस्तुनि विकल्पः संभवति । तस्मात् स्थाणुर्वा पुरुषो वेति ज्ञानवत् सप्तत्वपञ्चत्वनिर्धारणस्य फलस्य निर्धारयितुश्च प्रमातुस्तत्करणस्य प्रमाणस्य च तत्प्रमेयस्य च सप्तत्वपञ्चत्वस्य च सदसत्त्वसंशये किं कृतं स्यात्तार्थंकरेणेत्यलमप्रस्तुतप्रसङ्गेन ।

जैनसम्प्रदाये श्रीहेमचन्द्राचार्यात् प्रागपि श्रीगौतमस्वामिश्रीसुधर्मस्वामिप्रभृतयो गणधराः श्रीभद्रबाहुप्रभृतयः श्रुतकेवलिनः श्रीसिद्धसेनदिवाकरः चतुश्चत्वारिंशदधिकचतुर्दशशतग्रन्थप्रणेता हरिभद्रसूरिः जैनसिद्धान्तस्य सारभूतसूत्रसंग्रहकारस्तत्त्वार्थाधिगमसूत्रप्रणेता च उमास्वातिः जैनागमादीनां पुस्तकस्वरूपकर्त्तारो देवर्धिगणिक्षमा श्रमणादयोऽनेके पूर्वधराः, प्रौढगीतार्था महाप्रभावकाः समभूवन, तथापि जैनेतरदर्शनेषु विदुषोऽस्य साहित्यस्यास्य च यादृशं विशिष्टं स्थानमस्ति न तादृशमन्येषाम् । जैनेतरदर्शनाचार्याणां केनापि हेतुना जैनदर्शनेन साकं कस्यचन सम्बन्धस्यावसरे प्राप्ते सर्वतः प्रथमं तेषां दृष्टिरस्य महामहिमशालिनः साहित्ये पतति । द्वादशशतकादारभ्य अद्य यावत्

शासनबहिर्भूताः, प्रवादाः प्रकर्षेण स्वाभ्युपगतार्थप्रतिपादनशीलाः सिद्धान्ताः, मत्सरिणोऽतिशयेनाक्षमावन्तः तथा तेन प्रकारेण ते तव हे भगवन् भवतोऽशेषान् नयान् नैगम-संग्रह-व्यवहार-ऋजुसूत्र-शब्दसमभिरूढरूपान्, अविशेषं समम्, इच्छन् मन्यमानः, पक्षपाती पक्षं पातयतीत्येवं शीलः, अर्थाद्रागेण स्वीकृतस्य पक्षविशेषस्य विनाशेन शोभमानः, समयः स्यात्पदलाञ्छनः स्याद्वादसिद्धान्त इत्यर्थः न मत्सरी मत्सराभाववानिति ।

१. स्वयम्भू स्तोत्रे, श्लोकः ६५ । अस्यार्थः हे भगवन् ! तव स्यात्पदलाञ्छनाः स्याद्रूपं लाञ्छनं येषां ते स्यात्पदालाञ्छनाः स्यात्पदचिह्नाः इमे प्रसिद्धाः नयाः निरवधारणाः अभिप्रायविशेषाः पूर्वोक्ताः सप्त, रसोपविद्धाः रसेन पारदेनोपविद्धा मिश्रिता लोह इवाभिप्रेतफला अभिप्रेतं फलं येभ्यस्ते । यथा पारदसंमिश्रो लोहादिधातुरभीप्सितफलप्रदो भवति, तथा सप्त नया अपि वाञ्छितफलप्रदा इति यतो यस्मात् कारणाद् भवन्ति ततः तस्माद्धेतोः हितैषिणः आत्महितेच्छवः आर्या मोक्षपथसमीपयाता जना भवन्तं केवलज्ञानभास्वद्विभूषितदेहं प्रणताः प्रणन्तुमारब्धाः ।

समुद्भूतानां सर्वश्रेष्ठानां साहित्याकाराणां गणनाप्रसङ्गेऽस्य महाविदुषो नाम प्रथम गणितं भविष्यतीति नास्ति मतद्वयस्यावकाशः।

एतादृशमहापुरुषविरचितं सर्वाङ्गसुन्दरं व्याकरणमिदं केषां धन्यानां मुदे न कल्पेत। विद्वानयं च केषां श्रद्धास्पदं नास्ति। अत एव सोमेश्वरेण कविनोक्तम्—

"वैदुष्यं विगताश्रयं श्रितवति श्रीहेमचन्द्रे दिवम्" इति

अपेक्षितयावत्सामग्रीसंभृतोऽस्य शब्दानुशासनस्य मत्सररहिता विपश्चिदपश्चिमा अवगाहनं करिष्यन्तीति शम्।

न च शब्दः स्खलद्गतिः

आचार्य केदारनाथ ओझाः

श्यामं गौरवहं तु गौरमगमच्छ्यामत्वमह्ना शुभम्
सादृश्यातिशयस्तिरोगमयते भेदं बलं तत्क्षणे।
राधा कुत्र मुरारिरत्र न हि किं कोलाहले जागृते
राधागौरघनद्युतिश्रितपयोऽद्वैतं वरं सम्भ्रमः॥

शीर्षकोऽयं काव्यप्रकाशीयषोडशकारिकान्तिमोंऽशः प्रसिद्धो नानाव्याख्यानविभूषिते-मुख्य-सिद्धान्तस्य व्यञ्जनासाधकस्य स्थापनपरः। मुख्यसिद्धान्ततां साधयितुमेवास्य पुनर्व्याख्याने मम प्रवृत्तिः। अयमेव व्यञ्जनासाधनस्य परमउपायः। दर्शनपरिशीलिनो विद्वांसोऽपि सहृदयाः काव्य-कौशलं परिचिन्वन्ति व्यङ्ग्यार्थभावनापटवश्चेतसि चमत्कृतिं साक्षात्कुर्वन्ति च। परं शक्तिलक्षणा-व्यापारपर्यन्तं शब्दस्य व्यापारं मन्यमानाः अभिधेयलक्ष्यार्थबोधे एव शाब्दबोधत्वं शाब्दत्वं वा स्वीकुर्वन्तो व्यङ्ग्यार्थबोधेऽनुमितित्वं मानसप्रत्यक्षत्वं वा मन्वते। तत्रानुमितित्वस्य खण्डनमण्डनयोः पाण्डित्यप्रकर्षमधुनाऽपि लिखिता ग्रन्थनिबन्धाश्च प्रदर्शयन्ति अग्रेऽपि सूक्ष्मतां वैशिष्ट्यं वा कथायां सम्पादयिष्यन्ति, किन्तु आलङ्कारिकदार्शनिकयोर्मानसव्यापारेऽदसीये विशेषविश्लेषणस्य युक्तत्वायुक्त-त्वविवेचनस्य वा नाद्यावधि किमपि यन्त्रं निकषं वा अनादौ संसारे देशे विदेशे वा समुत्पन्नं प्राप्नुवन् पण्डिताः, अन्तत आलङ्कारिकाणां गेहे शाब्दयामीत्यनुव्यवसायो दार्शनिकानाञ्च मनसा पश्यामि अवगच्छामि वेति वादयोः किं खण्डनं मण्डनं वा? तथा च मतद्वयं स्थास्यति एव। व्याप्तिप्रभृत्युप-करणसम्पादनेऽनुमायां पदपदार्थादिपरिचये शाब्दबोधे वक्तृबोद्धव्यव्यादिवैशिष्ट्यादिभिर्व्यञ्जनाया उल्लासे च सर्वत्र मनसो विलासः। तत्र च शीर्षकः शिक्षयति यदभिधालक्षणाव्यापारानन्तरमपि काव्यार्थभावनायां व्याप्त्यादिज्ञानेऽपि प्रचलतो मनसो व्यापारेऽपि मूलभूतः शब्दः शब्दज्ञानं वा न स्खलति, किन्तु अभिधेयलक्ष्यार्थानुभवे यथा सुचलति तथा तदनन्तरमपि मानसव्यापारस्य प्रयोजकं सहकारि वा शब्दज्ञानम्। मानवानां मानसं परमं स्वतन्त्रम्, न स्वव्यापारे सर्वेश्वरसमीहां वेदाज्ञाधिकारं वा गवेषयति, किन्तु प्राक्सम्पन्नां तदानीञ्चोपस्थितां सामग्रीमादाय प्रचलत्येव। तथा च अभिधेयादिबोध-समये मनोव्यापारः शब्दं शब्दज्ञानं वा समालिङ्गति तदनन्तरञ्च परित्यजति इति कथं विश्वसनीयम्। एवञ्च प्रचलतः शब्दज्ञानस्य गतिर्ज्ञानान्तरधाराणामिव बलीयोविषयान्तरसञ्चारव्यासङ्गसुषुप्तिप्रभृत्य-ननुगतावरोधका फलानुभावावरोधका वेत्यवसेयम्। अग्र च प्रचलतः शब्दस्य व्यापारो व्यञ्जनेति ग्रन्थे आयात्येव।

एष एवैतादृशो वा 'न चैवाक्षं स्खलद्गति' इत्यभिप्रायको दार्शनिकानां महान् सिद्धान्तो विजृम्भते। एतादृशः शब्दो न तत्र परमर्थस्तु एष एव। तर्कसंग्रहमुक्तावल्यादौ सविकल्पकनिर्विकल्पक-प्रत्यक्षयोर्वर्तते वर्णनम्। सविकल्पके सप्रकारकज्ञाने विशेषणज्ञानस्य कारणतया अतीन्द्रियं निष्प्रकारकं निर्विकल्पकज्ञानं कल्प्यते। तथा च विषयसाक्षात्काराय संलग्नमिन्द्रियं प्रथमं निर्विकल्पकं प्रत्यक्षं समुत्पाद्य सविकल्पकं प्रत्यक्षं प्रसूते। सविकल्पकमेव प्रत्यक्षं प्रवृत्तिनिवृत्तिप्रभृत्तिकार्यकारि, निर्वि-कल्पकञ्च सविकल्पककारणमात्रं न कार्यान्तरोपयोगि। बौद्धनये च निर्विकल्पकं प्रत्यक्षशब्देन सवि-कल्पकञ्च विकल्पशब्देन व्यवहरन्ति उपयोगस्तु प्रायस्तादृश एव। न प्रत्यक्षमन्तरा विकल्पः समुदेति,

न च विकल्पमन्तरा प्रत्यक्षं प्रवृत्तिप्रभृतिव्यवहारे उपयुङ्क्ते। निर्विकल्पकं प्रमाणमिन्द्रियजत्वात्। विकल्पस्येन्द्रियजत्वे प्रामाण्यापत्तिः, अप्रमाणादेव विकल्पात् सर्वे व्यवहाराः। आस्तिकनये तु विकल्पोऽपीन्द्रियजः प्रमाणं प्रमाणाभासो वा। सर्वो व्यवहारः प्रमाणमूलकः, क्वचिदप्रामाण्यन्तु परत इत्यादि। तत्र आस्तिका ब्रुवते—विकल्पोऽपि इन्द्रियज एव प्रत्यक्षम् इन्द्रियव्यापारस्यानुपरमात्। विदन्ति चैतदात्मतत्वविवेकविमर्शनशीला विद्वांसः। तादृशास्तिकदर्शनसिद्धान्तः 'न चैवाक्षं स्खलद्गति' इति शब्देन सूचितः 'न च शब्दः स्खलद्गतिः' इत्यनेन पूर्णं सादृश्यं बिभर्ति। एतादृशं प्राधान्यमस्य सिद्धान्तस्य द्योतयितुमेवायं मम प्रयासः। तदनुसारमेव कारिकांशव्याख्यानं प्रारभे। तत्रापि वृत्त्यनुसरणं नावश्यकं मन्ये, वृत्तेः स्वोपज्ञतास्वीकारेऽपि कारिकावृत्त्योः सहनिर्माणं न सर्वेभ्यो रोचते। तथा कारिकामुखेन प्रवृत्तस्य काव्यप्रदीपस्य स्वतन्त्रग्रन्थता न काव्यप्रकाशटीकेति व्यवहारः यद्यपि वृत्तिमपि व्याख्याति, तत्कौशालान्तरं ग्रन्थस्य। तथैव ममापि कारिकांशे स्वतन्त्रविचारेऽधिकारः। व्यञ्जनाया वृत्तेर्वा सिद्धान्तस्य विरोधो दोष एवेत्यङ्गीकरोमि।

ननु मुक्तावलीप्रभृतिग्रन्थेषु आकाशात्मनोः साधर्म्यनिरूपणे शब्दमेवादाय क्षणिकविशेषगुणवत्वमुक्तम्, तृतीयक्षणध्वंसप्रतियोगित्वञ्च व्याख्यातम्। तथा च शब्दस्य क्षणद्वयमेवावस्थितिः, शाब्दबोधसम्पादनाय शब्दश्रवणं वृत्तेरनुसन्धानं पदार्थोपस्थितिराकाङ्क्षायोग्यतादेरनुसन्धानं सर्वत्रापेक्ष्यन्ते, क्षणद्वयादधिकक्षणानाम् आवश्यकता, लक्ष्यार्थबोधे च मुख्यार्थबाधस्य प्रयोजनस्य चानुसन्धाने पूर्वापेक्षया क्षणद्वयं वर्द्धते। तथा च कतिपयक्षणेभ्यः प्राग्विनष्टाच्छब्दात्कथं शाब्दबोधोदयः? शाब्दबोधात्प्राक्क्षणपर्यन्तं शब्दस्तिष्ठतीति वक्तुं न शक्यते श्रवणापत्तेः। यस्य शाब्दबोधस्तस्य कृते शब्दस्तिष्ठेत् श्रवणमपि भवतु इति वक्तुमपि न युज्यते, बहिरिन्द्रियविषयाणां साधारण्यात्, यद्रूपमेकः पश्यति तदपरो नावलोकयेदिति न संभवति, तथैवोत्पन्नमभिव्यक्तं वा शब्दं शाब्दबोधकर्तैव शृणुयान्नापर इति न संभवः, तेन च शब्दस्य क्षणद्वयावस्थितिरनिवार्या तृतीयक्षणे विनाशो ध्रुवः। तथा च नानाक्षणविलम्बेन संभवन् शाब्दबोधः कथं समुदियादिति शङ्कामपनेतुं प्रसरति न च शब्दः स्खलद्गतिरिति। शब्दस्य श्रवणद्वारा बुद्धौ गमनं न स्खलतीत्यर्थः। अस्योपपादनार्थं लघुमञ्जूषा निहिता श्रीनागेशभट्टवर्णिता आन्तरस्याखण्डस्य पदस्य वाक्यस्य च स्फोटस्य स्फोटनप्रक्रिया मननीया। वर्णानां तृतीयक्षणे विनाशित्वे महतः पदस्य वाक्यस्य च प्रत्यक्षं न स्यात्तथा च पदवाक्यादीनां ज्ञानाभावेन शाब्दबोधो न स्यात्, तेन सापेक्षेण क्रमिकवर्णश्रवणेन बुद्धावखण्डं पदं वाक्यञ्च स्फुटति, स च स्फुटितः शब्दः शाब्दबोधायापेक्षितो यावच्छाब्दबोधो नोदेति शाब्दबोधसँल्लग्नञ्च मनो यावद्वलीयो विषयान्तरे च न सञ्चरति तावद्विकसति। चमत्कारकारिणा व्यञ्जनोल्लासेन च सहचरितं चेतः शब्दार्थबोधे लक्ष्यार्थबोधे च सम्पन्नेऽपि व्यङ्ग्यार्थबोधाय जातं बुद्धौ पदवाक्यविकासं समग्रेऽपि सञ्चारयति।

व्यञ्जनोल्लासिका च बुद्धौ पदवाक्यादिविकासेन विकसन्ती वक्तृबोद्धव्यादिवैशिष्ट्यविज्ञानसध्रीचीना प्रतिव्यक्तिविभिन्ना विलक्षणा आन्तरशक्तिः सहृदयता नाम।

अथवा गतिर्ज्ञानम्, यस्य ज्ञानं स्खलति तादृशः शब्दो नेत्यर्थः। भवन्तु नाम शब्दास्तृतीयक्षणविनाशिनः किन्तु सहकारिसम्पन्नं शब्दज्ञानं फलपर्यन्तं चिरस्थायि। शब्दज्ञानादेव शाब्दबोधादीनि फलानि न तु शब्दात्। ननु मुक्तावल्यादौ शब्दस्येव ज्ञानस्यापि क्षणिकविशेषगुणता प्रतिपादिता तृतीयक्षणध्वंसप्रतियोगिता च व्याख्याता, तेन क्षणद्वयस्थायिनो ज्ञानस्य कथं चिरस्थितिरिति चेत् नैकान्तमिदम्। मुक्तावल्यामेव द्वित्वप्रत्यक्षायापेक्षाबुधेस्तृतीयक्षणस्थायिताऽङ्गीकृता, तत्र द्वित्व-

प्रत्यक्षस्य पृथक्पृथगेकत्वबुद्धेरपेक्षा तृतीयक्षणस्थायित्वेनैव सफलोपशाम्यति तथा शब्दज्ञानस्य फलतया शाब्दबोधस्यापेक्षा शाब्दबोधस्यापि कारणतया शब्दज्ञानस्यापेक्षा फलसिद्धिपर्यन्तं स्थायितां साधयिष्यति। एषा च नैयायिकापेक्षाबुद्धेर्दृष्टान्तस्य सहायेन मम नूतना कल्पना व्याख्या च। दर्शनान्तरे वेदान्तपरिभाषादौ धारावाहिकबुद्धित्वेन व्यवहार्यमाणस्य ज्ञानस्य तावत्कालमेकमेव ज्ञानमित्यादि-कथनद्वारा ज्ञानस्य चिरस्थायित्वं वर्णितम्। बौद्धाश्च सविकल्पकत्वव्यापकाच्छब्दविषयकत्वाद्धिभ्यतः प्रत्यक्षलक्षणे अभिलापासंसर्गित्वं निवेशयन्ति, सर्वोऽहि विकल्पः शब्दविषयक इति तेषां मतम्। आलङ्कारिकनयेऽपि विविधाः प्रकाराः शब्दज्ञानस्यायान्ति।

रसगङ्गाधरे 'उदेति सविता ताम्र' इत्यादि पद्यप्रसङ्गे 'न सोऽस्ति प्रत्ययो' प्रभृतिप्रसिद्ध-कारिकामुद्धृत्य कार्यकारणभावोऽपि दर्शितस्तेन सर्वसविकल्पकानां शब्दविषयकत्वमङ्गीकृतम्। श्रीमण्डनमिश्रो ब्रह्मसिद्धौ ग्रन्थे आत्मविशेषणतया समायातस्य कारिकाघटकस्याक्षरशब्दस्यैवं संक्षेपेण शब्दरूपतां व्याख्याति येन स्वयंप्रकाशचैतन्यरूपता शब्दस्यायाति तथापि प्रसिद्धवेदान्तिनो न तदनुसरन्ति, केचन शब्दरूपताया विरोधमप्याचरन्ति। न्यायादिदर्शनानां सविकल्पकत्वव्यापकत्वं शब्दविषयकत्वस्येति सिद्धान्तो नास्ति तथाऽपि ज्ञानलक्षणासन्निकर्षाद्युपायैरुपनीतभानात्मकं शब्द-विषयकं प्रत्यक्षं क्वचन जायत एव। परं लौकिकसन्निकर्षजन्यविपरीतप्रत्यक्षप्रतिबद्धतया न सर्वत्र कार्यकारि। तथापि मानसप्रत्यक्षसहाया नैयायिकसहृदया आरोपपरम्पराप्रसूतम् आलङ्कारिकचम-त्कारं सुखेन स्वदन्ते। आलङ्कारिका अपि व्यञ्जनाविजृम्भितं शाब्दबोधं प्रमाणान्तरप्रतिपत्तिभिर-प्रतिबध्यं ब्रुवते एव। आरोपस्वभावगालीप्रदानादिव्यवहारा अन्यदा क्लेशकरा अपि सन्तु परं तादृश्यैव श्यालकाबूतकथया प्रणयः पुष्यतीति मन्यते व्यवहारनिपुणैः। एवञ्च शब्दश्रवणवृत्त्यनु-सन्धानादिसामग्रीसम्भूता ज्ञानपरम्परा शब्दविषयणी सती चिरस्थायिनी बलीयोविषयान्तरसञ्चारेण सुषुप्त्यादिनैव च स्खलति। संलक्ष्यक्रमध्वनिनिरूपणप्रकरणे रसगङ्गाधरे 'शक्यतावच्छेदकस्येव शब्दस्य भानमित्यादि' वर्तते, तस्यापि सर्वस्मिन् शाब्दज्ञाने शब्दो विषयोऽत्रैव पर्यवसानम्। अभिधेयलक्ष्य-व्यङ्ग्येषु अभिधायकशब्दस्य विशेषणतया भानन्तदर्थः। बोधकः अभिधायक एव सर्वत्र विभिन्न व्यापारेण लक्षकतां व्यञ्जकताञ्चोपाधि वहति। शक्यतावच्छेदकस्यारोपरूपत्वे लक्षणाया लक्ष्यार्थविशेषण-तया आरोपितः शक्यतावच्छेदक इव शक्तः शब्द एव प्रयोजनादिव्यङ्ग्यबोधकः। एतावता ज्ञाने शब्दस्य स्खलनं न शब्दज्ञानस्य वा स्खलनं न भवतीति सिद्धान्तदिशा शीर्षकस्य व्याख्यानमवसेयम्।

संलक्ष्य क्रमध्वनिप्रकरण एव रसगङ्गाधरे 'प्रथमार्थप्रतीतिर्व्यापारस्य सत्त्वाददोष इत्येके' इत्ययाति। प्रथमशब्दज्ञानस्यैकं शाब्दबोधं जनयित्वा विनाशे द्वितीयः शाब्दः कथं समुदियादिति प्रश्नस्योत्तरे समाधानग्रन्थोऽयम्। शब्दज्ञानस्य व्यापारिणः शान्तावपि तस्य व्यापारः प्रथमशाब्द-बोधो वर्तते तेन द्वितीयस्य द्वितीयबोधव्यापारेण तृतीयादेरपि शाब्दबुद्धौ न शब्दज्ञानस्य व्यभिचारो दोष-इति तात्पर्यम्। अयमपि सिद्धान्तः प्रसिद्धः। मुक्तावलीप्रभृतिपठने पाठकाः प्रायो न व्यापारेण व्यापा-रिणोऽन्यथासिद्धिरिति पाठयन्ति। दण्डश्चक्रभ्रमिजन्यभ्रमिव्यापारद्वारा घटाधिकरणे कपाले वर्तमानो घटस्य कारणं भवति, अत एव चक्रभ्रमिं सम्पाद्य त्रुटिते विनष्टे वा दण्डे वेगवशाद्यावच्चक्रभ्रमिस्ता-वत्घटोत्पादनकार्यं प्रचलदद्रष्टुं संशक्यते दण्डकारणता च न व्यभिचरति। कार्यस्याव्यवहितक्षणेऽधि-करणे यो यस्य व्यापारो वा तिष्ठति स कारणमिति कारणलक्षणमपि बोधयन्ति। स्वर्गकामो यजेतेति विधिवाक्यादवगता स्वर्गकारता यागस्य निवर्हति। क्रियात्मको हि याग आशु विनश्यति फलं स्वर्गाश्चरेण मरणानन्तरं शरीरान्तरेण भुङ्क्ते। यागजन्योऽपूर्वो धर्मो व्यापारः स्वर्गं समुत्पाद्य विनश्यति। तत्र

धर्मव्यापारस्यैवाव्यवहितपूर्ववृत्तिता न यागस्य। तथैव शब्दज्ञाने शाब्दबोधकारणे एकं कार्यं समुत्पाद्य विनष्टेऽपि तत्कृतः शाब्दबोध एव द्वितीयादिशाब्दबोधजनने व्यापारो भवति। शब्दश्रवणमपि ज्ञानत्वेनैव कारणं न श्रवणत्वेन, लिप्यादिना स्मरणेनानुमित्या वा व्यभिचारात्। तथा च शीर्षके शब्दपदं शब्दज्ञाने लाक्षणिकम्, गतिपदं च व्यापारपरम्। तथा च यस्य गतिर्व्यापारः स्खलति तद्भिन्नं शब्दज्ञानमिति शीर्षकार्थः फलति। अथवा यस्य बोध इति शेषं कृत्वा व्याख्येयम्। एक आग्रहिल इव पक्षः—उच्चरित एव शब्दः प्रत्यायको भवति नानुच्चरित इति प्रसिद्धो वर्तते, तद्रीत्या अत्रैव रसगङ्गाधरे 'भावृत्त्या वा' इति तृतीयपक्षः सूचितः। तत्र सूक्ष्ममुच्चारणं मानसप्रत्यक्षप्रयोजकं शब्दज्ञान एव पर्यबसेयम्।

ननु शब्दः शब्दज्ञानं वा एकस्य व्यापारस्य कार्यं कृत्वा व्यापारे विरते स्वयं विरमति कथमत्र मुख्यार्थबाधादिवशादभिधायां विरतायां लक्षणया बोधः, तदनन्तरं व्यञ्जनया बोधश्च। यतो हि शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इति न्यायो जागर्ति, ततश्च शीर्षकमवतरति। यावद् व्यापाराणां सहकारिवशात्समुल्लासस्तावच्छब्दज्ञानं न स्खलति नूतनव्यापारवशात्कार्यान्तिरं विधत्ते कृतकार्याणां व्यापाराणामेव विरामोऽभावः।

ननु वक्तुर्व्यङ्ग्यार्थे सर्वत्र तात्पर्याभावात् सहकारिकारणमन्तरा कथं शब्दज्ञानं न स्खलतीति शङ्कायामपि शीर्षकं शिक्षयति—यच्छब्दज्ञानादेव सहृदयेषु व्यञ्जनोल्लासस्तदा व्यञ्जनया सहचरितं शब्दज्ञानं कथं स्खलेत्। अतएव क्वचित्कविकृतौ द्वितीयार्थबोधस्यापरिहाराद् श्लीलतादोषः।

ननु रूढिर्योगापहारिणीति न्यायस्य विद्यमानतया रूढ्यर्थबोधानन्तरं कथं व्यञ्जनया योगार्थबोध इत्याशङ्कायामपि शीर्षकं ब्रूते—यदा सहृदयहृदये सामग्रीवशाद्बलवतीव्यञ्जनाव्यापारो शब्दज्ञानस्य जागर्ति तदा व्यापारव्यसनि शब्दज्ञानं कथं स्खलेत्। तथा च व्यञ्जनादिविरह एव रूढ्यर्थबोधः स्वजनकं शब्दज्ञानं स्खलयतीति। उदाहरणन्तु—

अबलानां श्रियं हृत्वा वारिवाहैः सहानिशम्।
तिष्ठन्ति चपला यत्र सकालः समुपस्थितः॥

इत्यादि रसगङ्गाधरे प्रसिद्धमेवेति विस्तराद्विरमति विदुषामनुकम्पनीयः

●

जीवनस्य किं लक्ष्यम्

पं० पट्टाभिरामशास्त्री 'पद्मभूषणम्'

'जन्तूनां नरजन्म दुर्लभम्' इति भगवत्पादानां श्रीशङ्कराचार्याणामुक्त्या प्राणिषु मानवं जन्म सुकृतविशेषेण प्राप्तं भवति, अथ च श्रेष्ठतमं तदिति प्रतीमः। सृष्टिकर्ता परमैश्वर्यसम्पन्नश्चतुर्मुखः प्राणिनस्सृजन् स्वस्वात्मरक्षायै साधनान्यपि सृष्ट्वा तेभ्यः प्रददाति। तानि च साधनानि शृङ्गाः दन्ता नखा रोमाणीत्यादीनि भवन्ति। सिंह-व्याघ्र-वराह-वृक-हरिण-भल्लूकप्रभृतयः स्वस्वात्मरक्षायै तानि साधनानि यथाधिकारं परिगृह्य जीवन्ति। क्षुद्रा मशका मक्षिकाः पिपीलिकाः वृश्चिकास्सरीसृपा अपि स्वस्वात्मार्थं भगवता कल्पितानि साधनान्यादाय लोकयात्रां यथायथं विदधति। तत्र मानवानां कृते तादृशसाधनानामभावेऽपि आत्मरक्षायै मानवेभ्यो विवेकः साधनं भगवता प्रादायि। विवेकेन मानव आत्मरक्षां करोति। आत्मशब्दः कदाचिच्छरीरे प्रयुज्यते कदाचिच्च शरीरेन्द्रियमनोबुद्ध्यहङ्कारादिभ्योऽतिरिक्ते चेतने प्रयुज्यते। विवेकेन शरीररक्षापि भवति चेतनरक्षापि। मानवातिरिक्तप्राणिनामपि विवेको वर्तत एव, किन्तु ते शरीररक्षायै विवेकमुपयुञ्जते। मानवेष्वपि केचन शरीराद्यतिरिक्तमात्मानमस्वीकुर्वन्तः शरीररक्षायै केवलं विवेकमुपयुञ्जते, शरीरमेव सर्वं मन्यमाना इमे पुण्यं पापं जन्मान्तरं लोकान्तरञ्चानभ्युपगच्छन्तः पशुपक्ष्यादिभिस्समाना भवन्ति। अत एव शङ्करभगवत्पादाः 'पश्वादिभिश्चाविशेषात्' इतीमान् निर्दिशन्ति। ये मानवाः पुण्यं पापं लोकान्तरं जन्मान्तरं शुध्यशुद्धी भक्ष्याभक्ष्ये गम्यागम्ये कर्तव्याकर्तव्ये इत्यादीनि विवेकेन न विचारयन्ति ते कथमिव पश्वादयो न भवेयुः। एतादृशं मानवं कश्चन 'त्वं पशुरसि' इति यदि वदेत् तर्हि सः क्रुध्यति, कञ्चन पशुं विलोक्य 'त्वं मानवोऽसि' इति कथयेद्यदि तर्हि स आनन्दितो न भवति। एकत्र क्रोधोऽपरत्रानन्दाभाव इत्यत्र केनचन कारणेन भवितव्यम्। किं तत्कारणं भवितुमर्हति ऋते विवेक-तदभावाभ्याम्। पश्वादिषु विवेकाभाव एवेति न निश्चेतुं शक्यते, यतो हि हरिततृणघासादिकं हस्तेनादायाह्वानावसरे पशवः पुच्छानुन्नमय्यागच्छन्ति, दण्डमादाय तत्सकाशं गमनावसरे ते धावन्ति। इदं कार्यद्वयं विवेकमन्तरा न भवितुमर्हतीति पश्वादीनामपि विवेकोऽस्तीत्येष्टव्यम्। यद्येतावानेव विवेको मानवेष्वपि स्यात् तर्हि पशूनां मानवानाञ्च भेदः को वा परिलक्ष्येत ? अन्ततो विचार्यमाणे मानवेभ्यः पश्वादय एव विशिष्टाः प्रतीयन्ते। मानवास्तु पशून् विवेकहीनान् प्रतिपद्यन्ते, किन्तु तेभ्यो मानवैः शिक्षणीया गुणा अनेके वर्तन्ते ये च प्रकृत्यैव तेषु कल्पिता विद्यन्ते। वृषभः तादृशीं गामाघ्रायापगच्छति या चान्तर्वत्नी। वृषभो महिषीं न गच्छति महिषो वा गाम्। तेषामत्र 'इयं गम्या इयमगम्या' इति विवेकः परिलक्ष्यते। कतिपयेषु मानवेषु नायं विवेकः परिदृश्यते। गवादयश्शाकाहारिणः नामिषभोजिनः, अलर्कादयो मांसभोजिनः न तृणं घासं वा अदन्ति इत्येवं भक्ष्याभक्ष्यविवेकं तेषु पश्यामः, मानवेषु च नेमं विवेकमनुभवामः। यद्यपीमे मानवाः कतिपय एव न सर्वे, तथापि पशुषु यादृशो जातिभेदो वा वर्गभेदो वा दृश्यते, न तादृशो मानवेषु दृश्यते। मानवा एव खलु सर्वे। 'एकः करोति पापानि फलं भुङ्क्ते महाजनः' इति रीत्या दोषोऽयं मानवेषु समागच्छति। पशुषु च न तथा, तत्र जातिभेदं वा वर्गभेदं वा पश्यामः। अस्ति च मानवेष्वप्ययं भेदस्तथापि जातिभेदं वर्गभेदञ्चोल्लङ्घ्य गन्तुं मानवास्समीहन्ते किन्तु पशुष्वेकस्यां जातौ वर्तमानाः स्वीयां परम्परामाहारव्यवहारादिषु नातिक्रमन्ति। यौनसम्बन्ध-

व्यतिक्रमन्तु पशुषु न विलोकयामः। यद्यपि तेषु कनिष्ठज्येष्ठविवेको नास्ति तथापि यौनसम्बन्धस्तु व्यवस्थितो दृश्यते।

किञ्च-पक्षिषु काकः मलीमसः, अनियताहारः, अस्पृश्य इत्यादिभिर्दोषैर्भूयिष्ठस्तथापि बलिरूपेण दत्तस्यान्नस्य ग्रहणमेकाकी न करोति, स्वयं बुभुक्षया पीडितोऽपि स्वीयान् बान्धवान् समाहूयैव भुङ्क्ते। अयमेको महान् गुणस्तस्य। तदिदं मानवो विवेकेन विवेचयति यत् काकाः बलिरूपेण दत्त–मन्नं विषमिश्रितं स्यादिति मत्वा परीक्षणार्थं बान्धवानाह्वयन्ति, नतु सद्बुध्येति। एवं विवेचने बुद्धिं व्ययीकरोति न दीनेभ्योऽन्नवितरणे। दोषोद्घाटने मानव आत्मनः कौशलं निर्द्धारयति, न तु स्वगतं दोषमवगच्छति। 'मोघमन्नं विन्दते अप्रचेताः' इति निर्दिशन् वेदः मानवेषु विद्यमानं दौर्बल्यं प्रकटयति।

जीवनस्य पवित्रं लक्ष्यं निर्द्धार्य तत्र विवेको विनियोक्तव्यो मानवेन। मनसश्शान्तिप्रदेष्वेव कर्मसु विवेकस्य प्रसारणं मानवेनावलम्बनीयम्। यथा हि प्रकृतेर्वशीकरणं प्रकृत्यनुसरणञ्च भवेत् तथा विवेक उपयोक्तव्यः, न तु प्रकृतेः परिवर्तने। प्रकृतिर्बलीयसी भवति, मानवबुद्धिस्तु लघीयसी। स्वबुद्ध्या विवेकेन वा नूतनानि वस्तून्याविष्कर्तुं मानवश्चेष्टते, तत्र च साफल्यं काममनुभवति। आविष्कृतैः पदार्थैः महावृष्टि झञ्झावातं सौर्येण तेजसा भविष्यति काले जायमानं प्रकोपं वा पूर्वानुमानेन निश्चेतुं प्रभवति मानवः किन्तु जल-वाताग्निषु प्रकुपितेषु तच्छमनाय साधनविहीनो भवति। तेषां प्रकोपेन यत्कष्टमनुभवितव्यं तदनुभूयत एव मानवैः। 'हेयं दुःखमनागतम्' इत्यत्र विवेक उपयोक्तव्यः। तेनैव लोकानां मनसः शान्तिरुदियात्। स्वबुद्धिबलेनाविष्कृतेषु पदार्थेषु सातिशयत्वमेव तिष्ठति। अन्य इतोऽपि प्रबलशक्तिमतां पदार्थानामाविष्करणव्यापारे प्रवर्ततैव। परिणामः कः मनसोऽशान्तेः ऋते। भौतिकपदार्थाविष्करणावसरे मनसः स्थिरता तु परिलक्ष्येत, परं सातिशयत्वात् शान्तिर्न लभ्येत। विवेकस्य लक्ष्यं तादृशं स्थिरीकर्तव्यं येन च निरतिशयं फलं प्राप्नुयात्। तदेव जीवनस्य लक्ष्यं परिपूर्णं स्यात्—

नित्यानित्यविवेकस्सर्वेषां घटघटत्वयोरास्ते।
स विवेको यश्शान्तिकृत् अविवेकोऽन्यस्समस्तोऽपि॥

इति खलु विवेकस्य स्वरूपम्। दैवानुग्रहेण प्राप्तमिदं चैतन्ययुक्तं शरीराख्यं नाम यन्त्रं मानवैः। मानवाश्च विवेकेन भगवता दत्तेन साधनेन उच्चावचानि चैतन्यरहितानि यन्त्राणि निर्मान्ति। विविधेषु प्रयोजनेषु तानि मानवाः प्रयुञ्जते च। तथैव भगवन्निर्मितस्य चैतन्यजुषः शरीराख्ययन्त्रस्य किमपि विशिष्टं प्रयोजनं स्यादिति विवेकेनान्वेषणीयं तन्मानवैः। तदिदमन्विष्य मृगो हरिणोऽस्मभ्यमुपदिशति—

यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून् मृषा
नैषां गर्ववचः शृणोषि न च तान् प्रत्याशया धावसि।
काले बालतृणानि खादसि परं निद्रासि निद्रागमे
तन्मे ब्रूहि कुरङ्ग कुत्र भवता किं नाम तप्तं तपः॥

कुरङ्गवृत्त्यनुसारेण मानवानां विवेकस्य जीवनस्य च परमं लक्ष्यं शान्तिप्रदस्य वस्तुनः प्राप्तिरेव। स एव चरमः पुरुषार्थं इत्यभिधीयते। तदवाप्तये मानवं जन्मैव साधनम्। विवेकसहायेनानेन साधनेन चरमपुरुषार्थावाप्तये सन्ति षडरयः कामः क्रोधो लोभो मोहो मदो मात्सर्यञ्चेति। षण्णामरीणां विवे-

केन निग्रहं विधाय जितारिषड्वर्गो यदा भवति मानवस्तदा परमस्य लक्ष्यस्यावाप्तये सोऽधिकारी सम्पत्स्यते। षडपीमेऽरयः कामं प्रबलाः, इमान् जेतुमेव विवेकः कल्पितो भगवता। विवेकेनैषां जयो नासाध्यः, किन्तु दुस्साध्यः। एतेषामरीणामाश्रयौ द्वितीयतृतीयपुरुषार्थावर्थकामौ भवतः। द्वितीयपुरुषार्थाधीना तृतीयपुरुषार्थसिद्धिः। तत्र यदि प्रत्यूह उपस्थितो भवेत् तदा क्रोधादीनां प्रसरः। एवं तर्हि अर्थकामयोः कथं पुरुषार्थत्वम्, विघटनकार्यकारित्वात्तयोरिति प्रश्न उदियात्। प्रश्नस्य समाधानायैव विवेक आवश्यकः। अर्थं कामञ्च सर्वपुरुषार्थरत्नाकरेण धर्मेण संमिश्रितौ यदि विदध्महे तर्हि अर्थकामयोर्विघटनकार्यकारित्वं न स्यात्। असञ्जातविरोधित्वन्यायेनार्थेन कामेन च धर्मस्य सम्बन्धो भवितुमर्हति। धर्मसम्बन्धाभावादेवार्थिकी स्थितिः राष्ट्रस्य दयनीयानुभूयते। भ्रष्टाचारस्य व्यभिचारस्य चाधिक्यं किंप्रयुक्तमित्यत्र कारणे विविच्यमाने इदमेव वक्तव्यं भवति—यल्लोका अर्थं कामञ्च प्राधान्येन स्वीकृत्यार्थोपार्जने कामोपभोगे च प्रवृत्ता इति। यदि धर्मसंवलितमर्थं कामञ्च परिगृह्यार्थोपार्जने कामोपभोगे च प्रवृत्तास्स्युस्तर्हि न भ्रष्टाचारस्य व्यभिचारस्य च प्रसक्तिः। धर्मसंवलितावर्थकामौ पुरुषैरर्थ्येते यदि, तदा तयोः पुरुषार्थत्वे कः प्रत्यूहः? कथं तयोर्विघटनकार्यप्रवर्तकत्वम्? मानवजीवनस्य लक्ष्यमर्थोपार्जनेऽयुक्तमिति न ब्रूमः, किन्तु तदेव लक्ष्यमिति न निर्द्धारयितव्यमिति बदामः। यावदुपार्जनेन लोकयात्राया निर्वाहः तावतैव सन्तोष्टव्यम्। मितव्यये दृष्टिं निक्षिप्य तदनुसारेण द्रव्योपार्जने न कश्चन दोषः। परम्परया धनाढ्याः केचन भवेयुः, तेऽपि ततोऽप्यधिकधनार्जने प्रवर्तेरन् यदि तर्हि धनराशिरेकत्रितस्स्यात्। तेन च धनहीनाः चोरपश्यतोहरादयोऽनुचितव्यापारेषु संलग्ना भवेयुः। अत्रैव धनाढ्यैर्धर्मबुद्धिरवलम्बनीया। प्रभूतधनसङ्ग्रहेण न खलु मनसश्शान्तिर्भवेत्। प्रत्युत—

अन्नं धान्यं वसु वसुमतीत्युत्तरेणोत्तरेण
व्यामुह्यन्ते परमकृपणाः पामरा यद्गदित्थम्।
भूमिः खं दौर्द्रुहिणपुरभित्युत्तरेणोत्तरेण
व्याकृष्यन्ते विमलमतयोऽप्यस्थिरेणैव धाम्ना॥

इत्युक्तप्रकारेण भूयसा व्यामोहेनाक्रान्ता भवेयुः। अतो द्वितीयः तृतीयश्च पुरुषार्थौ जीवनलक्ष्यतया न स्वीकारार्हौ। अर्थशब्देन कामशब्देन च धनं स्त्र्युपभोग एव नोच्येते। किन्तु सर्वविधा अपि सांसारिकपदार्थाः धनधान्यारामक्षेत्रनिकेतनप्रभृतयः, तैश्च सम्पाद्यमानाः कामाश्चाभिधीयन्ते। धर्मबुद्ध्या अर्जिता अपीमे मनसश्शान्तिं नापादयन्ति। एभिश्च सम्पाद्यमाना अपि कामाः न तृप्तिं जनयन्ति। यदि शान्तिः तृप्तिर्वा न जायते, तर्हि को लाभो जीवनस्य। विविधानि जन्मान्यवाप्य नैकविधार्थोपार्जनेनापि तृप्तिर्न जायते, किं तेनार्थेन कामेन वा। शरीरपातानन्तरमिमे नानुगच्छन्तीमं मानवम्। साधूक्तं केनचन कविना—

नानोपायैर्दिशि दिशि धनान्यर्जयित्वा व्ययित्वा।
सम्यक्सम्पादितमिदमहो स्थौल्यमेकं शरीरे॥ इति।

मानवो विवेकेन सकृदपि चिन्तयेत्-यदयं देहबन्धस्सावधिक इति। मलमूत्रादिभिः प्रदूषितं गर्भं प्रविश्य पुनः पुनर्जन्म मरणञ्चावाप्य किं साधितं मानवेन? कृमिकीटपतङ्गादयोऽपि जीवा जायन्ते म्रियन्ते च। विवेकी मानवोऽपि कृमिकीटादिसादृश्यमनुसरेद्यदि को लाभः? यावच्च मानवो विवेकसाहाय्येन 'अयन्तु परमो धर्मः यद्योगेनात्मदर्शनम्' इति स्मृत्युक्तदिशा लोकेष्वात्मवद्दर्शनम्,

आत्मनो दर्शनं वा विधातुं न चेष्टते तावन्मानवो जन्मनस्साफल्यं नावाप्नुयात्। इदमेव जीवनस्य परमं लक्ष्यम्—यत्सर्वत्रात्मवद्दर्शनम्, आत्मनो दर्शनं वा। एतादृशं लक्ष्यमवाप्तुं विहितानि कर्माण्याचरणीयानि निषिद्धानि च त्यक्तव्यानि मानवेन। एवञ्च स्वस्याप्युद्धारः, भ्रष्टाचाराणां दुराचाराणाञ्च देशेऽनुभूयमानानां निवृत्तिश्च स्याताम्। साधूक्तं नीलकण्ठदीक्षितैः—

नाहं याचे पदमुडुपतेर्नाधिकारं मघोनः
नापि ब्राह्मीं भुवनगुरुतां का कथान्यप्रपञ्चे।
अन्यस्यान्यः श्रियमभिलषन्नस्तु कस्तस्य लोकः
मह्यं शम्भो! दिश मसृणितं मामकानन्दमेव॥

भरतभूनिवासिभिरेषा चेद्रीतिराश्रीयेत, नूनं भारतदेशो देशान्तराणामुपदेशकपदमवाप्नुयात्। स्वतन्त्रभारतस्य शासनसूत्रधारिभिरस्माभिरियमेव रीतिराश्रयणीया, येन च राष्ट्रसमुन्नतिः सम्पादिता भवेत्।

•

लोचनकारस्य स्वैरिता

आचार्यचण्डिकाप्रसादशुक्लः डी० लिट्,

भूतपूर्वप्रोफेसर एवं अध्यक्षः (संस्कृत-विभागे इलाहाबादविश्वविद्यालयस्य)

अथ साम्प्रतम् अभिनवकृतलोचनाख्यस्य ध्वन्यालोकव्याख्यानस्य सर्वथा ध्वनितन्त्रस्वतन्त्र-स्वरूपस्य यत्किञ्चित् प्रदर्शनम् अत्र क्रियते। अभिनवगुप्तस्येदं ध्वन्यालोकव्याख्यानं लोचनं नाम असामान्यप्रतिष्ठास्पदमवर्तत। ध्वन्यालोको हि लोचनाख्येन व्याख्यानमण्डपेन मण्डित एव सुतरां सम्मानभाजनं भवति। ध्वनिसिद्धान्तस्य विगतवर्षसहस्रस्येतिहासो वस्तुतोऽभिनवगुप्तस्यैव व्याख्यान-पटिष्ठतायाः कथा अभूत्। एतस्मिन् दीर्घदीर्घे कालान्तराले ध्वन्यालोकार्थी जनो लोचनमेवावालम्बत यथोक्तम्—'किं लोचनं विनाऽऽलोको भाति' (लो०) इति। ज्ञाते लोचने तु ध्वन्यालोकः स्वत एव गृहीततत्त्व इति विदुषां मान्यता भवति। पाणिनीयव्याकरणे पातञ्जलमहाभाष्यमिव, वेदान्तदर्शने च ब्रह्मसूत्रशाङ्करभाष्यमिव साहित्यशास्त्रे आभिनवं लोचनमेतत् प्रतिष्ठाप्यते। किं च लोचनमीदृक् प्रौढं मन्यते यत् सामान्यव्युत्पत्तिमतो जनस्य तत्र बुद्धिप्रवेशोऽपि दुष्करो भवति यथोक्तम्—'प्रौढं क्व लोचनं क्वाहं मन्दधीरिति' (बालप्रियाटीका)। वस्तुतस्तु ध्वन्यालोकः सुतरां विशदो निर्मलः प्रसन्नगम्भीरो गाङ्गं पय इव पावनः प्रभातकालिकी सूर्यप्रभेव बुद्धिवैशद्यकारको भवति, लोचनेन केवलं दुरूहो दुष्प्रवेशो दुर्व्यूहश्च विहितः। इह कतिपयानि तानि स्थलानि प्रदर्श्यन्ते यत्र लोचनमुत्सूत्र-मिव ब्रुवाणं प्रतिभाति यथा—

१. ध्वनिकारो ध्वन्यालोकस्य प्रतिज्ञावाक्यरूपायाः प्रथमोद्योतस्य प्रथमकारिकाया अनन्तरं ध्वनेर्लक्षणं तावत् प्रथमं न कृत्वा तद्भूमिकारूपेण वाच्यात् पृथक् प्रतीयमानस्यार्थस्य परिचयं (प्रत्यभिज्ञानं) ददाति। प्रतीयमानोऽर्थ एव तस्य वक्ष्यमाणध्वनिकाव्यस्य जीवितसर्वस्वम् आत्माऽस्ति। काव्ये तस्यार्थस्य बोधस्तु अनादिकालपरम्परातः सर्वेषां सहृदयानां भवत्येव किन्त्वसावर्थः प्रतीयमान एव पूर्वप्रसिद्धाद् वाच्याल्लक्ष्याद् वा सर्वथा पृथगेवेति चेतरूपेण तस्य परिचयः कस्यापि नास्ति–यतो व्याकरणन्यायमीमांसादिषु शास्त्रेषु वाच्यलक्ष्ययोर्द्वयोरेवार्थयोः प्रसिद्धिरभूत्। मुख्योऽर्थो वाच्य इत्युच्यते तदितरः सर्वोऽपि गौणोऽर्थो लक्ष्य इति। सर्वेषु शास्त्रेष्वियमेव पद्धतिः। किन्तु काव्येषु मुख्याल्लक्ष्याच्चार्थाद् व्यतिरिक्त एकोऽन्योऽप्यर्थो भवति यो हि कविप्रतिभायाः सहजः प्रसवः यस्यैव योजना च कवेर्वास्तविकं कवित्वम् इतिकर्तव्यता चास्ति, यच्च काव्यस्यात्मतत्त्वं भवति। स चायमर्थः केवलं काव्येषु दृश्यते शास्त्रेषु तस्य सद्भावो नापेक्ष्यते। तस्य सम्पर्केण तस्य व्यञ्जकत्वेन स्थितो वाच्योऽपि देदीप्यतेतराम् अग्निसम्पर्केण लौहखण्ड इव। अत एव प्रथमोद्योतस्य द्वितीयस्याः कारि-कायाः प्रागेव ध्वनिकारः स्पष्टैः शब्दैरुद्घोषयति––"तत्र ध्वनेरेव लक्षयितुमारब्धस्य भूमिकां रचयितु-मिदमुच्यते" (ध्व०) इति। वाक्यमेतद् ध्वनिकारस्य सर्वाधिकं महत्त्वपूर्णमस्ति। इयं भूमिका च प्रथमोद्योतस्य द्वितीयकारिकातो द्वादशकारिकां यावत् प्रसरति। व्याकरणमहाभाष्यस्य पस्पशेव ब्रह्म-सूत्रशाङ्करभाष्यस्य चतुःसूत्रीभाष्यमिव ध्वन्यालोकस्य द्वितीयकारिकातो द्वादशकारिकापर्यन्तो भागः

ध्वनिसिद्धान्तस्यातिमहती भूमिका भवति । अस्यां भूमिकायां च केवलं व्यङ्ग्यः (प्रतीयमानः) अर्थः सोदाहरणः प्रतिपादितोऽस्ति यथा च स्वयमानन्दवर्धनोऽग्रे वक्ष्यति—"यथा प्रथमोद्योते प्रतीयमानार्थ-सिद्ध्यर्थमुदाहृतासु गाथासु" (ध्व०) इत्यादि । तत्रोदाहृतासु गाथासु इदमेव तथ्यं विशदीकृतं यत् प्रतीयमानोऽर्थो वाच्यार्थात् सर्वथा भिन्न एव भवति । एषूदारणेषु को नाम सहृदयो वाच्यादितर-स्यार्थस्य प्राधान्येन सत्तां न स्वीकरोति—आनन्दवर्धनस्य त्वत्र एतावन्मात्रं निर्देष्टव्यमस्ति—योऽयं वाच्यात्पृथगर्थः स्वीक्रियते स एव प्रतीयमानो नाम कवितावनितालावण्यैकस्वरूप इति । किमित्ययं प्रतीयमान एव स्यात् कथं न वाच्यो वा स्याल्लक्ष्यो वा स्यादित्यादिप्रश्नसमाधानं तु तेन तृतीयोद्योते व्यञ्जकत्व(व्यञ्जना)विवेचनप्रसङ्गे करिष्यते । अत्र तु एतावन्मात्रकथनं पर्याप्तं मन्यते यद् अय-मेवार्थः प्रतीयमान इति ।

अस्मिन् सम्पूर्णे भूमिकाभागे ध्वनिकृता क्वचिदपि ध्वनिशब्दस्य प्रयोगो नैव कृतः नापि च तस्य लक्षणं कथितम् । इयं कारिकैकादशी तु केवलं व्यङ्ग्यार्थपरिचायिका । अत एव स्वयं ध्वनिकार एतद्भूमिकाभागसमाप्तौ द्वादशकारिकानन्तरं त्रयोदश्यां कारिकायां ध्वनिलक्षणकरणात् प्राक् सुस्पष्टं कथयति—"एवं वाच्यव्यतिरेकिणो व्यङ्ग्यस्यार्थस्य सद्भावं प्रतिपाद्य प्रकृत उपयोजयन्नाह" (ध्व०) इति । एतेन एतत् तु प्रेक्षावतां स्पष्टं स्याद् यद् द्वितीयकारिकातो द्वादशकारिकापर्यन्तं प्रसृतेऽस्मिन् भूमिकाभागे ध्वनिकारः केवलं व्यङ्ग्यस्यैवार्थस्य सद्भावं प्रतिपादयन्नासीत् न तु ध्वनिलक्षणं कुर्वन् । ध्वनिलक्षणरूपः प्रकृतो विषयस्तु एतदनन्तरं प्रारभ्यते ।

किन्त्वभिनवगुप्तः स्वलोचने तु प्रतीयमानमर्थमेव ध्वनिरूपेण गृह्णाति । अत एव चासौ 'योऽर्थः सहृदयश्लाघ्य इत्यादिद्वितीयकारिकाया अवतरणिकां ददान आह—"ध्वनिस्वरूपे प्रतीयमानाख्ये निरूपयितव्ये" (लो०) इत्यादि । तथैव पञ्चमकारिकायाः काव्यस्यात्मा स एवार्थ इत्यादेः प्राक् चापि अवतरणिकां ददाति—"एवं प्रतीयमानं पुनरन्यदेव इतीयता ध्वनिस्वरूपं व्याख्यातम्" (लो०) इत्यादि । इयं कारिका ध्वनिकृता व्यङ्ग्यस्वरूपप्रतिपादयित्रीति कृता, लोचनकृता पुनः ध्वनिस्वरूप-प्रतिपादयित्रीतिगृहीता । अस्मिन् भूमिकाभागे यदि क्वापि कथमपि आनन्दवर्धनेन "सोऽयं ध्वनिः प्रतीय-मानोऽर्थ एव" अथवा "तदेतद् प्रतीयमानं वस्त्वेव ध्वनि"रिति कथितमभविष्यत् तदाऽयं संशयः साधीयानभविष्यत् । मन्येऽत्र लोचनकारेण न्यायोऽयं स्वेनैन कल्पितः प्रतीयते यदि नाम "काव्य-स्यात्मा ध्वनिः" "सहृदयश्लाघ्योऽर्थश्च काव्यस्यात्मा" तदा 'सहृदयश्लाघ्योऽर्थ एव ध्वनिरिति ।

पुनस्त्रयोदश्यां कारिकायां यत्र ध्वनिकारः सुतरां स्पष्टस्पष्टैः शब्दैर्ध्वनिं काव्यविशेषमेव प्रतिपादयति तत्र लोचनकारः काव्यविशेषपदस्य स्वाभिमतव्यङ्ग्यार्थपरं विग्रहं करोति—"काव्यस्य वा विशेष" (लो०) इति । किन्तु उत्तरपदरूपेण विशेषेतिपदेन सह तत्पुरुषसमासे कृते पूर्वपदस्य सामान्यरूप एवार्थः क्रियते यथा 'पुरुषविशेष ईश्वरः' 'नदीविशेषो गङ्गा' 'वृक्षविशेषः कल्पद्रुमः' इत्यादिषु पुरुषनदीवृक्षादिशब्दाः तत्समानार्थका एव । लोचनकारेण तु स्वसमीहितार्थसिद्ध्यर्थं सा पद्धतिरेवोल्लङ्घिता । एवम् अभिनवेन स्वव्याख्यानमनुसृत्य प्रतीयमानोऽर्थ एव प्रधानतया ध्वनिरिति गृहीतः भ्रान्तेश्च बीजं समुप्तम् । फलतः सम्पूर्णे स्वलोचनाख्ये व्याख्याने अस्या भ्रान्तेरेव समीचीनत्वं यथार्थत्वं च ज्ञापयितुं स मुधा घोरं श्रममकरोत् प्रसन्नं ध्वन्यालोकं च दुरूहं व्यधात् । अस्तु । "तद् भूमिकां रचयितुमि"ति विवृण्वन् ब्रूते लोचनकारः—"भूमिरिव भूमिका । यथा अपूर्वनिर्माणे चिकीर्षिते पूर्वं भूमिर्विरच्यते, तथा ध्वनिस्वरूपे प्रतीयमानाख्ये निरूपयितव्ये निर्विवादसिद्धवाच्या-

भिधानं भूभिः'' (लो०) इत्यादि। अत्र प्रेक्षावद्भिरवधानं प्रदेयं यत् स्वयम् आनन्दवर्धनस्तु इह पूर्वाचार्यैरुपमादिरूपेण काव्येषु बहुधा व्याकृतस्य वाच्यार्थस्य कथामपि कथमपि कर्तुं नेच्छति केवलं तस्य यथोपयोगमनुवदनं कर्तुं स्वीकरोति यथोक्तं तेनैव—''तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः। बहुधा व्याकृतः सोऽन्यैस्ततो नेह प्रतन्यते॥ केवलमनूद्यते पुनर्यथोपयोगमिति।'' (ध्व०) तदेतदेव लोके आम्रान् पृष्टः कोविदारानाचष्टे इत्युच्यते।

आनन्दवर्धनः प्रथमोद्योतस्य प्रथमकारिकायां ध्वन्याख्यस्य काव्यविशेषस्य त्रीन् विरोधवादिन उल्लिखितवान् ते च त्रयोऽपि अलङ्कारशास्त्रचुञ्चव आचार्याः। तेषु प्रथमे ते ये क्वापि स्वग्रन्थेषु ध्वनेर्नामापि न गृहीतवन्तः—येषां हि ध्वनेः सत्ताया बोधः कल्पना वा नैवासीत्। ते खलु अभाववादिनः। द्वितीयास्तु ते ये तं ध्वनिं (काव्यविशेषं) भ्रान्त्या लक्षणारूपं लक्षणासम्बद्धं (भाक्तं) वा मन्यन्ते। ते हि भाक्तवादिनः। तृतीयाः पुनस्ते ये तस्य ध्वनेस्तत्त्वम् अलक्षणीयमनिर्वचनीयं वा कथयन्ति। ते तु अनिर्वचनीयतावादिनः। एते त्रयोऽपि विरुद्धा वादाः ध्वनिनामकस्य काव्यस्यैव। एतेषां वादानां प्रवर्तका अपि साहित्यशास्त्रस्यैवाचार्याः न तु मीमांसान्यायादिशास्त्राणामाचार्या इति मन्तव्यम्। अत एव तृतीयोद्योते व्यञ्जनाव्यापारस्य विवेचनप्रसङ्गे व्यङ्ग्यार्थस्य च विवेचनप्रसङ्गे मीमांसादिशास्त्रेण सह विवाद उत्थाप्यते नत्वत्र प्रथमोद्योते क्वापि।

(२) आनन्दवर्धनः स्वलक्षणवाक्येन काव्यविशेषमेव ध्वनिं प्रतिपादयति यत्र अर्थः स्वं स्वरूपं शब्दश्च स्वमर्थं गौणं विधाय प्रतीयमानमर्थं प्राधान्येन व्यङ्क्त इति—''यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ। व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥'' (ध्व०)। अत्र तेन ध्वनिः काव्यविशेषरूपः प्रोक्तः। नेदं लक्षणं काव्यसामान्यस्य। काव्यसामान्यं तु तस्यापि ''सहृदयहृदयाह्लादिशब्दार्थमयमिति वा'' विविधवाच्यवाचकरचनाप्रपञ्चचारुशब्दार्थमयमिति वा अभिमतं भवति। किन्तु अभिनवेन पूर्वोक्ते ध्वनिलक्षणवाक्ये काव्यविशेषपदस्य पञ्चधा व्याख्यानं कृतम्—वाच्योऽर्थः, वाचकः शब्दः, व्यञ्जनाव्यापारः व्यङ्ग्योऽर्थः, तदखिलसमुदायरूपं काव्यं च। किन्तु तेनेदमपि स्वीकृतं यत्—''कारिकायां तु प्राधान्येन समुदाय एव काव्यरूपो मुख्यतया ध्वनिरिति प्रतिपादितम्'' (लो०)। अतः शेषाँश्चतुरो व्यङ्ग्यादीन् ध्वनित्वेन प्रतिपादयितुं विचित्रान् व्याकरणसम्बद्धान् बुद्धिव्यायामानसौ प्रदर्शितवान्। ध्वनिशब्दस्य व्युत्पत्तिं च पञ्चधा कृतवान्। आनन्दवर्धनेन स्वध्वनिकाव्यस्य नाम स्वरूपं च वैयाकरणेषु स्फोटव्यञ्जकात् श्रूयमाणवर्णरूपेण प्रसिद्धाद्ध्वनेर्गृहीते। अत एव तेनापि शब्दार्थसंमिश्रं शब्दस्वरूपं व्यञ्जकं काव्यं ध्वनिरित्युक्तम्—यथोक्तं तेन—''वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः''—(ध्व०) इति। किन्तु लोचनकारेण इयमनन्तरोक्ता पङ्क्तिः विचित्रं व्याख्याता। एतस्याः पदानि प्रसह्य व्युत्पाद्य स तेभ्यश्च स्वाभिमतं पञ्चत्वं प्राप्तं ध्वनिं व्याख्यातवान्। अत्र पङ्क्तौ यत् सम्मिश्रेतिपदं तस्यार्थः सम्मिश्र्यते इति व्युत्पत्त्या व्यङ्ग्योऽर्थः कृतः—''सम्मिश्र्यते विभावानुभावसंवलनयेति व्यङ्ग्योऽपि ध्वनिः ध्वन्यते इति कृत्वा'' (लो०)। अत्रैव यदिदं शब्दात्मेति पदं तस्य तु विचित्रतरेण विधिना व्यञ्जनाव्यापारपरं व्याख्यानं कृतम्—''शब्दनं शब्दः शब्दव्यापारः—न न चासावभिधारूपः अपि त्वात्मभूतः, सोऽपि ध्वननं ध्वनिः।'' (लो०)। व्यञ्जकत्वसाम्यादिति पदस्य तेन व्यङ्ग्यव्यञ्जकभाव इति व्याख्यानं कृतं स च पञ्चस्वपि पक्षेषु समानतया विद्यत एवेति स स्वीकरोति—''व्यञ्जकत्वसाम्यादिति व्यङ्ग्यव्यञ्जकभावः सर्वेषु पक्षेषु सामान्यरूपः

साधारण इत्यर्थः" (लो०) । लोचनं हि एवंविधैर्निरङ्कुशैः स्वैरितापूर्णैर्व्याख्यानैरापूरितं विद्यते । इयं हि शैली लोचनकारस्य तथाहि—

तेन प्रथमोद्योतस्य प्रथमकारिकाया वृत्तौ "वाग्विकल्पानामानन्त्यादित्यत्र वागितिपदस्य शब्दः अर्थः व्यापारश्चेति त्रयोऽर्थाः कृताः—"वक्तीति वाक् शब्दः । उच्यते इति वागर्थः । उच्यतेऽनयेति वागभिधाव्यापारः" (लो०) । एवमेव प्रथमोद्योतस्यैव—

उक्त्यन्तरेणाशक्यं यत्तच्चारुत्वं प्रकाशयन् ।
शब्दो व्यञ्जकतां बिभ्रद्ध्वन्युक्तेर्विषयी भवेत् ।। (ध्व०)

इति पञ्चदशकारिकायां प्रयुक्तस्य शब्द इति पदस्य स शब्दार्थव्यापारादिषु स्वाभिमत पञ्च ध्वनिप्रकारेष्वर्थेषु व्याख्यानं करोति—"शब्द इति पञ्चस्वर्थेषु योज्यम्"—(लो०) । सम्भवतः सम्पूर्णेऽपि संस्कृतवाङ्मये क्वापि देशे काले वा एवंविधोऽर्थः (अनर्थः ?) नैव कृतो दृश्यते । काव्येषु श्लेषाद्यलङ्कारान् योजयितुं तावत्पदानामेवं विधं व्याख्यानं क्षम्यं भवति न तु शास्त्रकारिकाप्रयुक्तानाम् । इत्थं तु कस्यापि शब्दस्य कोऽप्यर्थः कर्तुं शक्यते व्याकरणसूत्राणां बाहुलकत्वात् । रामशब्दस्य रमते मन्दोदर्या सहेति रामः रावण इत्यर्थः, रावणशब्दस्य चापि रावयति शत्रून् राक्षसान् इति रावणः राम इत्यर्थोऽपि स्वसौविध्येनानायासेन कर्तुं शक्यते । किन्तु शब्दानां रूढाः प्रवृत्तिनिमित्तका वा अर्थाः यौगिकेभ्यो व्युत्पत्तिनिमित्तेभ्योऽर्थेभ्यो बलवन्तो भवन्तीति न विस्मर्तव्यम्—"रुढिर्योगापहारिणीति ।"

(३) ध्वनिलक्षणं प्रतिपाद्य ध्वनिकारः तेनैव लक्षणवाक्येन ध्वनिविरुद्धवादिषु प्रथमान् अभाववादिनः तीक्ष्णतममुचितञ्च प्रतिवदति । यत्रार्थः शब्दो वेत्यादिलक्षणकारिकाया वृत्तौ ध्वन्यभाववादस्य त्रीनपि पक्षान् निरस्यति । प्रतीयमानार्थविशदप्रतीतियुतेषु समासोक्त्यादिष्वलङ्कारेषु प्रतीयमानार्थस्याप्राधान्यात् तान् ध्वनिलक्षणाद् बाह्यान् तेषु ध्वनेरन्तर्भावमसम्भवं च प्रतिपाद्य निष्कर्षरूपेणोद्घुष्यति—यत्र व्यङ्ग्यस्यार्थस्य प्राधान्यं न भवति स च व्यङ्ग्य केवलं वाच्यार्थस्यानुयायो भवति तत्र स्फुटतया समासोक्त्यादयोऽलंकारा भवन्ति । ध्वनेस्तु तदेव क्षेत्रं यत्र वाच्यवाचकावुभावपि व्यङ्ग्यपरौ स्यातामिति—

"व्यङ्ग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः ।
समासोक्त्यादयस्तत्र वाच्यालङ्कृतयः स्फुटाः ।।
तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रति स्थितौ ।
ध्वनेः स एव विषयो मन्तव्यः सङ्करोज्झितः ।।

एवम् अभाववादिनामयमन्तर्भाववादप्रकारः स्पष्टतः समासोक्त्यादिषु बहुष्वलङ्कारेषु प्रतीयमानार्थस्य स्फुटां विद्यमानतां स्वीकृत्य तेषु ध्वने रन्तर्भावं शङ्कते ! यदि पुनः प्रतीयमान एव ध्वनिः स्यात् तत्तस्य मुखात् प्रतीयमानस्य अभावकथनं वदतो व्याघात एव भविष्यति । वस्तुतस्तु व्यङ्ग्यार्थस्य सत्तां न केवलं ध्वनिकारेण अपितु भट्टोद्भटादिभिरालङ्कारिकैरपि स्वीक्रियत एव यथोक्तं स्वयमानन्दवर्धनेन—"रूपकादिरलङ्कारवर्गो यो वाच्यतां श्रितः । स सर्वो गम्यमानत्वं बिभ्रद् भूम्ना प्रदर्शितः ।। (ध्व० २।२६) । अन्यत्र वाच्यत्वेन प्रसिद्धो यो रूपकादिरलङ्कारः सोऽन्यत्र प्रतीयमानतया बाहुल्येन प्रदर्शितस्तत्रभवद्भिर्भट्टोद्भटादिभिः ।" इति ।। किन्तु प्रतीयमानसत्तां स्वीकुर्वाणोऽप्यसा वालङ्कारिकवर्गो ध्वनिकाव्यसत्तां नैव स्वीकरोति । अथ यदि व्यङ्ग्योऽर्थ एव ध्वनिश्चेत् तदा न कोऽप्यालङ्कारिक आचार्यो ध्वन्यभाववादी स्यात् ।

अलङ्कारविशेषेषु ध्वनेरन्तर्भावनिषेधमितोऽपि कारणात् करोति ध्वनिकारः—तन्मतेन ध्वनिर्हि काव्यविशेषः अङ्गो, अवयवी च। अलङ्कारा गुणावृत्तयश्च तस्याङ्गानि अवयवाः वा। त एते पृथक् स्थिता अवयवा एव अवयविनो न भवन्ति, अपृथक् स्थितास्तु पुनस्तस्य अवयविनः अवयवविशेषा एव उच्यन्ते। यदि पुनः अवयव एव अवयवी उच्यते तन्नूनं सोऽयवयिन एव कश्चित् प्रकारविशेषः स्यात् न त्ववयवमात्रम्। अवयवीध्वनिस्तावद् विपुलप्रकारवान् भवति। तथोक्तं तेन—'काव्यविशेषोऽङ्गीध्वनिरिति कथितः। तस्य पुनरङ्गानि गुणा अलङ्कारा वृत्तयश्च। न चावयव एव पृथग्भूतोऽवयवीतिप्रसिद्धः। अपृथग्भावे तु तदङ्गत्वं तस्य। न तु तत्त्वमेव। यत्रापि वा तत्त्वं तत्रापि ध्वनेर्महाविषयत्वान्न तन्निष्ठत्वमेव" (ध्व०) इति। अत्र लोचनकारः काव्यस्य अन्यानलङ्कारादीनवयवाँस्तावद् अप्रधानत्वाद् ध्वनिं नैव मन्यते किन्तु प्रतीयमानार्थरूपमवयवं प्रधानत्वाद् (अङ्गित्वाद्) ध्वनिं कथयति—"तत्समुदायिमध्ये च प्रतीयमानमप्यस्ति न च तदलङ्काररूपं प्रधानत्वादेव। यत्त्वलङ्काररूपं तदप्रधानत्वान्न ध्वनिः।" (लो०) एवं यद् आलोके तल्लोचनं न सम्यग् गृह्णाति।

४. प्रथमोद्योतस्य त्रयोदशकारिकावृत्तौ ध्वनेरभाववादं सर्वथा निरस्यैव ध्वनिकारो लक्षणाश्रितत्वेन अभिधाश्रितत्वेन च व्यञ्जनाव्यापारदृष्ट्या ध्वनिकाव्यस्य इहैव सर्वप्रथमं भेदद्वयम् उद्घोषयति—"तदेवं ध्वनेस्तावदभाववादिनः प्रत्युक्ताः। अस्ति ध्वनिः। स चासावविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन" (ध्व०)। परवर्तिभिर्मम्मटप्रभृतिभिर्ध्वनिमार्गानुयायिभिराचार्यैर्ध्वनिकाव्यस्य प्रधानत इमौ द्वावेव भेदौ कृतौ। किन्तु लोचनकारेण तु इतः पूर्वमेव ध्वनेः पञ्च रूपाणि स्वीकृतानि सन्ति। अतः इमौ द्वौ भेदौ वाच्यवाचकव्यङ्ग्यव्यञ्जनाकाव्यरूपाणां तेषां पञ्चानामपि ध्वनीनां संगमयितुं तेन प्रसह्य दुस्साधः श्रमोऽक्रियत। तस्य पञ्चापि ध्वनयः येन यत्र यतो यस्य यस्मै इत्यन्यपदबहुव्रीहिसमासाश्रयेण अविवक्षितवाच्यविवक्षितान्यपरवाच्यरूपतया द्विविधाः संजाताः—"पञ्चधापि ध्वनिशब्दार्थे येन यत्र यतो यस्य यस्मै इति बहुव्रीह्यर्थाश्रयेण यथोचितं समानाधिकरणं योज्यम्।" (लो०)। इति भक्षितेऽपि लशुने न शान्तो व्याधिः। अस्तु।

ध्वनिकारेण प्रथमोद्योतस्य "प्रतीयमानं पुनरन्यदेवेत्यादिकारिकाया वृत्तौ प्रतीयमानार्थस्य वस्त्वलङ्काररसादिरूपास्त्रयो भेदाः प्रतिपादिताः—"सह्यर्थो वाच्यसामर्थ्याक्षिप्तं वस्तुमात्रमलङ्काररसादयश्चेत्यनेकप्रभेदप्रभिन्नो दर्शयिष्यते" (ध्व०)। किन्तु प्रतीयमानमेव ध्वनिं मन्वानस्याभिनवगुप्तस्य ते ध्वनेरेव त्रयो भेदाः। अतोऽत्र ध्वनिकारेण प्रथमवारं ध्वनेर्भेदद्वयेऽस्मिन् प्रतिपादिते लोचनकारः स्वेन पूर्वं कल्पितस्य ध्वनेर्वस्त्वादिरूपस्य भेदत्रयस्य सङ्गतिम् आभ्यां भेदाभ्यां सह कर्तुं पुनर्मुधा बुद्धिव्यायामं कर्तुं प्रारभते "वस्त्वलङ्काररसात्मनाहि त्रिभेदोऽपि ध्वनिरुभाभ्यामाभ्यां संगृहीत इतिभावः" (लो०)। ध्वनिकारः प्रथमवारं ध्वनेर्लक्षणं यत्रार्थः शब्दोवेत्यादिरूपैस्त्रयोदशकारिकायां करोति। लक्षणकरणानन्तरमेव तु भेदप्रतिपादनस्यौचिती स्यात्। इतः पूर्वं तु ध्वनेर्लक्षणमेव न कृतमस्ति तत्कथं चतुर्थ्यामेव कारिकायां ध्वनेर्भेदाः प्रतिपादिताः स्युः? अस्यां चतुर्थ्यां कारिकायां तुं स्वरूपकथनानन्तरं प्रतीयमानस्यार्थस्यैव त्रयो भेदा निर्दिष्टाः—न तु ध्वनेः। किं च, यद्ययं प्रतीयमान एव ध्वनिकारस्य ध्वनिरभविष्यत्तदवश्यं तेन 'स ह्यर्थः' इति स्थाने 'स हि ध्वनि' रित्युक्तमभविष्यत्। अस्तु।

लोचनकारः स्वकल्पितेन वस्त्वादिरूपतथाकथितध्वनिभेदत्रयेण सह ध्वनिकारेण प्रथमवारं प्रतिपादितयोरनयोरविवक्षितवाच्यादिरूपयोर्ध्वनिभेदयोः सङ्गतिमेतत्प्रयुक्तविवक्षितशब्दाश्रयेण कथमपि व्यापाररूपे ध्वनौ वक्तुः श्रोतुश्च विवक्षाऽपि सहकारिणी भवतीति करोति—यथोच्यते तेन—"अनेन हि नामद्वयेन ध्वननात्मनिव्यापारे····प्रतिपत्तृगतायाः प्रयोक्त्रभिप्रायरूपायाश्च विवक्षायाः सहकारित्वमुक्तमिति ध्वनिस्वरूपमेव नामभ्यामेव प्रोज्जीवितम्' (लो०) इति। आनन्दवर्धनस्तत्र एतद्भेदद्वयनिर्देशप्रयोजनमेवं विशदयति यद् व्यञ्जनावृत्तिर्यद्यपि अभिधालक्षणाभ्यां सर्वथा पृथगेव वृत्तिरस्ति किन्तु सा कदापि अभिधाश्रयेण कदापि च लक्षणाश्रयेण व्यवतिष्ठते। यदाऽसावभिधाश्रयेण तिष्ठति तदा तत्प्रतिपाद्यव्यङ्ग्ययुतो ध्वनिर्विवक्षितान्यपरवाच्यध्वनिरुच्यते यदा पुनः लक्षणाश्रिता व्यञ्जना तिष्ठति तदा तत्प्रतिपाद्यव्यङ्ग्यार्थयुतो ध्वनिरविवक्षितवाच्यध्वनिरित्युच्यते—"व्यञ्जकत्वं हि क्वचिद् वाचकत्वाश्रयेण व्यवतिष्ठते यथा विवक्षितान्यपरवाच्यध्वनौ क्वचित्तु गुणवृत्त्याश्रयेण यथा अविवक्षितवाच्ये ध्वनौ। तदुभयाश्रयत्वप्रतिपादनायैव च ध्वनेः प्रथमतरं द्वौ भेदावुपन्यस्तौ" (ध्व०)। अत्र प्रथमतरमिति पदेन ग्रन्थकारः स्पष्टमभिप्रैति यत् अत्रैव प्रथमवारं ध्वनेर्भेदौ प्रदर्शितौ नेतः प्रागिति। किन्त्वेवंविधे भास्वरेऽप्यालोके लोचनं किमप्यन्यदेव पश्यति।

५. ध्वनेरभाववादं निराकृत्य ध्वनिकारो भाक्तवादं नाम द्वितीयं विकल्पं परिकल्प्य निरस्यति। एवं प्रतीयते—आनन्दवर्धनः शङ्कते यद् भ्रान्त्या केचिद् विपश्चितो ध्वनौ वाच्येतरस्यार्थस्य योगं दृष्ट्वा प्रसिद्धं लक्षणाव्यापारं चापि वाच्येतरेणार्थेन युक्तं विचिन्त्य ध्वनिलक्षणयोरैक्यं मन्येरन् इति। अतः स प्रथमं तावत् काव्यरूपाद् ध्वनेर्व्यापारमात्ररूपाया लक्षणाया नितरां स्वरूपभेदोऽस्तीति द्वयोः स्वरूपभेदं निर्दिशस्ताँनुपहसन्निव तन्मतं निराकरोति—"वाच्यव्यतिरिक्तस्यार्थस्य वाच्यवाचकाभ्यां तात्पर्येण प्रकाशनं यत्र व्यङ्ग्यप्राधान्ये स ध्वनिः। उपचारमात्रं तु भक्तिः।" (ध्व०) इति। अथानेन स्वसमाधानेन ध्वनिकार एकतो ध्वनिलक्षणयोरैक्यरूपभ्रमस्य निराकरणमवश्यं कृतवान् किन्तुअन्यतोऽभिनवगुप्तदृशाम् अप्रतिमप्रतिभासम्पन्नानां विदुषां बुद्धावेतद् बद्धमूलं कारितवान् यन्नूनं ध्वनिरपि व्यापाररूप एव तत एव तु ध्वनिलक्षणयोरैक्यशङ्का संजातेति। अत इदम् अनन्तरमेवोक्तं ध्वनिकारस्य "वाच्यव्यतिरिक्तस्यार्थस्य वाच्यवाचकाभ्यां तात्पर्येण प्रकाशनं यत्र व्यङ्ग्यप्राधान्ये स ध्वनि"रिति समाधानवाक्यमभिनवगुप्तः स्वकल्पिते तथाकथितव्यापाररूपे ध्वनौ व्याख्यातवान् तथाहि अस्मिन्नेव प्रसङ्गे ध्वनिकारस्य "उक्तप्रकारो ध्वनिरित्यंशं विवृण्वन्नसावाह—"उक्तप्रकार इति पञ्चस्वर्थेषु योज्यम्—शब्देऽर्थे व्यापारे व्यङ्ग्ये समुदाये च" (लो०) इति। आनन्दवर्धनेन तु अधुनैव प्रतिपादितायां त्रयोदशकारिकायां ध्वनिकाव्यविशेष इति निर्दिष्टम्। किन्तु लोचनकारस्तं ध्वनिं स्वकल्पितेषु पञ्चस्वर्थेषु विकीर्णवान्। लोचनात् प्रागपि भट्टनायकः स्वहृदयदर्पणे' ध्वनिं भ्रान्त्या व्यापाररूपेऽर्थे व्याख्यातवान् यथोल्लिखितं लोचने तस्य मतम्।

"ध्वनिर्नामापरो योऽपि व्यापारो व्यञ्जनात्मकः।
तस्य सिद्धेऽपि भेदे स्यात् काव्यंशत्वं न रूपता॥" इति।

भट्टनायकः किल काव्ये व्यापारस्यैव प्राधान्यं मेने—"द्वयो (शब्दार्थयोः)र्गुणत्वे व्यापारप्राधान्ये काव्यगीर्भवेत्" इति। अतस्तेन "काव्यस्यात्मा ध्वनिरित्यत्र ध्वनिर्व्यापाररूप एव व्याख्यातः। अत एव लोचनकारः--

उक्त्यन्तरेणाशक्यं यत्तच्चारुत्वं प्रकाशयन्।
शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्ते विषयीभवेत्॥" (ध्व०)

इति कारिकायाम् उक्तीत्यस्य व्यञ्जनाव्यापाररूपमेवार्थं गृहीतवान्—"उक्त्यन्तरेण ध्वन्यतिरिक्तेन स्फुटेन शब्दार्थव्यापारविशेषेण (लो०)"। तथैवात्र प्रयुक्तं शब्दशब्दं तु पञ्चस्वर्थेषु व्याख्यातवान्—"शब्द इति पञ्चस्वर्थेषु योज्यम्" (लो०)। तादृश एव तान्त्रिक ईदृशीं शब्देन्द्रजालविद्यां प्रदर्शयितुं प्रभवेत्।

पुनः प्रथमोद्योतस्यैव—

"वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता।
व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्॥"

इतिकारिकया ध्वनिकारः अभिधाश्रयेण व्यवस्थितां लक्षणां व्यञ्जनैकाश्रितस्य ध्वनेर्लक्षणरूपां कथयितुमुचितां न मेने। किन्तु लोचनकारोऽत्रापि ध्वनेरिति पदस्य—"ध्वनेर्व्यञ्जनात्मनः" (लो०) इतिव्याख्यां कृतवान्। किन्त्वेवं कृते "व्यञ्जकत्वैकमूलस्य" इति विशेषणस्य का गतिः केनान्वयो भविष्यतीति नैव चिन्तितवान्।

(६)—द्वितीयोद्योते ध्वनिकारो विवक्षिताभिधेयस्य ध्वनेः काव्यस्यात्मरूपेण स्थितो व्यङ्ग्योऽर्थोऽसंलक्ष्यक्रमः संलक्ष्यक्रमश्चेति द्विविध इति प्रतिपादयति। प्रधानत्वेनाभिव्यज्यमानो व्यङ्ग्योऽर्थ एव ध्वनेरात्मेति तस्य स्थितिः। स च व्यङ्ग्योऽर्थो रसादिरूपो ह्यलक्ष्यक्रमतया वस्त्वलङ्काररूपश्च संलक्ष्यक्रमतया प्रकाश्यते—"मुख्यतया प्रकाशमानो व्यङ्ग्योऽर्थो ध्वनेरात्मा। स च वाच्यार्थापेक्षया कश्चिदलक्ष्यक्रमतया प्रकाशते कश्चित् क्रमेणेति द्विधा मतः।" (ध्व० २।२) लोचनकारेणात्र ध्वनेरात्मेति आत्मशब्दस्य स्वभाव इत्यर्थः कृतः—रसादिरूपो योऽर्थः स हि ध्वनेरलक्ष्यक्रमरूपः स्वभावः प्रकारो वेति व्याख्यातवान्—'आत्मशब्दः स्वभाववचनः प्रकारमाह। तेन रसादिर्योऽर्थः स ध्वनेरक्रमो नामभेदः।" (लो०) इति। यदि नाम ध्वनिकारस्य व्यङ्ग्योऽर्थ एव ध्वनिरूपेणेष्टोऽभविष्यत् तन्नूनमसौ "विवक्षिताभिधेयो यो ध्वनिः सोऽपि द्विधा मतः" इति स्पष्टमसन्दिग्धमलेखिष्यत्। ध्वनेरात्मेति सन्देहास्पदस्य प्रयोगमेव नाकरिष्यत्। वस्तुतो भ्रान्त्या गृहीतस्य स्वाभिमतस्य यथार्थतां प्रतिपादयितुं लोचनकारः सर्वत्र मुधा महान्तं श्रममकार्षीत्।

(७)—इत्थं हि ध्वनिकारो रसादिरूपस्यार्थस्यालक्ष्यक्रमतां निर्दिशति यत् रसादिरूपो व्यङ्ग्योऽर्थः सत्यपि पूर्वपश्चादभाविनि क्रमे स्वव्यञ्जकेन वाच्यार्थेन सहेव प्रकाशते। एतदेव च तस्यालक्ष्यक्रमता। स एव च रसादिः प्रधानत्वेन भासमानः सन् ध्वनेः काव्यस्यात्मा भवति—"रसादिरर्थो हि सहेव वाच्येनावभासते। स चाङ्गित्वेनावभासमानोध्वनेरात्मा।" (ध्व०) इति। किन्तु अत्रापि लोचनं पश्यति—रसादिरर्थोऽङ्गित्वेव भासमानोऽसंलक्ष्यक्रमव्यङ्ग्यस्य ध्वनेः प्रकार इति।" (लो०)

(८)—द्वितीयोद्योतस्यान्ते ध्वनिकारः स्वाभिमतं संक्षिप्य कथयति यत्—सर्वेष्वेव प्रदर्शितेषु ध्वनिप्रकारेषु प्रधानभूतस्य व्यङ्ग्यस्यार्थस्य स्फुटरूपेणाभिव्यञ्जनमेव ध्वनेः पूर्णं लक्षणं संगतं भवति—

"सर्वेष्वैव प्रभेदेषु स्फुटत्वेनावभासनम्।
यद् व्यङ्ग्यस्याङ्गिभूतस्य तत्पूर्णं ध्वनिलक्षणम्॥ (ध्व०)

इति । इमां कारिकां विवृण्वन् लोचनकारः भावानयने द्रव्यानयनम् इति न्यायात् अवभासनम् इति क्रियावाचकस्य पदस्य अवभासमानम् इति द्रव्यवाचकम् अर्थं करोति तथा व्याख्याति च—"सर्वेष्वेव प्रकारेषु स्फुटरूपेण अवभासमानं व्यङ्ग्यमेव ध्वनेः लक्षणं स्वरूपं वा पूर्णमस्ति" इति । किन्त्वेवं कृते व्यङ्ग्यस्याङ्गिभूतस्येतिपदद्वयस्यान्वय एव कथमपि न सङ्गतो भवतीति लोचनकारः विकल्पं प्रस्तौति-यत् तस्य अवभासमानमित्यस्य ज्ञानमिति अर्थं कुर्वन् । पुनः व्यङ्ग्यस्य ज्ञानमेव ध्वनेर्लक्षणं प्रमाण-मित्यर्थो भवति तच्च पूर्णं भवति यतः तत् पूर्णस्वरूपस्य ध्वनेर्निवेदकमिति । 'विकल्पान्तरं चापि-ददाति—'(अङ्गिनः) व्यङ्ग्यस्य ज्ञानमेव ध्वनेर्लक्षणं यतो लक्षणं ज्ञानपरिच्छेद्यं भवति इति । तथा चोक्तं तेन—"अवभासमानमिति भावानयने द्रव्यानयनमिति न्यायादवभासमानं व्यङ्ग्यम् । ध्वनिलक्षणं ध्वनेः स्वरूपं पूर्णं पूर्णध्वनिस्वरूपानिवेदकत्वात् । अथवा ज्ञानमेव ध्वनिलक्षणं लक्षणस्य ज्ञानपरिच्छेद्यत्वात् ।" (लो०) । हन्तः ! विकल्पानां कोटिरपि गन्तव्यं प्राप्तुं नाशकत् ।

(९) द्वितीयोद्योत एव ध्वनिकारोऽतिशयमहत्त्वपूर्णमेतत्तथ्यम् ऋजुभिः शब्दैर्निवेदयति—यत्र ध्वनिप्रकारे वाच्योऽर्थो यद् व्यङ्ग्यं प्रधानरूपेण व्यनक्ति तस्य ध्वनिप्रकारस्य तद्व्यङ्ग्यनाम्नैव नाम-क्रियते—यथा "प्राप्तश्रीरेषः" इत्यादिश्लोके तथा "लावण्यकान्तिः" इत्यादिश्लोके च संलक्ष्यक्रम-तया रूपकालङ्कारेऽभिव्यज्यमानेऽयं रूपकध्वनिरित्युच्यते—यथोक्तं तेन—"यत्र तु व्यङ्ग्यपरत्वेनैव वाच्यस्य व्यवस्थानं तत्र व्यङ्ग्यमुखेनैव व्यपदेशो युक्तः" (ध्व०) इत्यादि । एवमेव वस्तुध्वन्यलंकार-ध्वनिरसध्वन्यादिशब्दास्तेन प्रयुक्ताः यत्र—वस्तु व्यङ्ग्यं यत्र स चासौ ध्वनिश्चेत्यादिरूपेण शाकपार्थिवादिरूपेणसर्वत्र मध्यमपदलोपी समासो द्रष्टव्यो भवति । किन्तु व्यङ्ग्यमेव ध्वनिं मन्वाना विपर्यस्ता एतन्महत्त्वपूर्णं ध्वनिकार सिद्धान्तमुपेक्ष्य वस्त्वेव ध्वनिरित्यादिरूपमर्थं कुर्वते । किन्तु नायं स्थूणापराधो यदेनमन्धो न पश्यति ।

(१०) सम्पूर्णे द्वितीयोद्योते ध्वनिकारो व्यङ्ग्यार्थदृष्ट्या ध्वनेः स्वरूपाणि भेदांश्च निरूपितवान्। कुत्र अविवक्षितादिषु भेदेषु कस्य वस्तुनोऽलङ्कारस्य रसस्य वा व्यङ्ग्यताऽस्ति कदा च व्यज्यमानः स वस्त्वादिरूपोऽर्थः ध्वनिकाव्यस्य अङ्गं विषयो वा भवति कदा गुणीभूतव्यङ्ग्यप्रकारस्य काव्यस्ये-त्यादि च प्रधानतया विवृणोति । तृतीयोद्योते च पुनः तस्यैव ध्वनेर्व्यञ्जकदृष्ट्या स्वरूपस्य प्रकाराणां च विवेचनं करोति । अतः तृतीयस्यारम्भे ध्वनिकारोऽवतरणिकां ददाति—"एवं व्यङ्ग्यमुखेनैव ध्वनेः प्रदर्शिते सप्रभेदे स्वरूपे व्यञ्जकमुखेनैतत्प्रकाश्यते ।" (ध्व०) । किन्तु स्वयं ध्वनिकारस्यैतद् वचनं नैव रोचते लोचनकाराय । अत्र वस्त्वलङ्काररसादिरूपतया त्रिविधो यो व्यङ्ग्योर्थस्तद्दृष्ट्ये-त्यर्थो न ग्राह्यो लोचनकारस्य स एवं व्याख्याति यद् द्वितीयोद्योते यो वाच्योऽर्थो व्यञ्जकरूपेणोक्तः स व्यङ्ग्यमुखापेक्षी भवति स्वयं चापि व्यङ्ग्यो भवितुं क्षमते—अत उक्तं व्यङ्ग्यमुखेनेति । किन्तु वर्णपदवाक्यसंघटनामहावाक्यादिरूपाः शब्दास्तु कदापि व्यङ्ग्यरूपा न भवन्ति ते सदा व्यञ्जकरूपा एवेति । तथाचोक्तं तेन—"यद्यप्यर्थो व्यञ्जकस्तथापि व्यङ्ग्यतायोग्योऽप्यसौ भवतीति, शब्दस्तु न कदाचिद् व्यङ्ग्यः अपितु व्यञ्जक एवेति····प्रकाशितोऽप्यधुना शुद्धव्यञ्जकमुखेन । तथाहि व्यङ्ग्यमुखप्रेक्षितया विना पदं वाक्यं वर्णाः पदभागः सङ्घटना महावाक्यमिति स्वरूपत एव व्यञ्जकानां भेदा, न चैषामर्थवत् कदाचिदपि व्यङ्ग्यता सम्भवतीति व्यञ्जकैकनियतं स्वरूपं यत्त-न्मुखेन भेदः प्रकाश्यत इति तात्पर्यम्" (लो०) ।

किं च, वस्त्वलंकाररसादिरूपत्रिभेददृष्ट्या ध्वनेर्भेदकरणं लोचनकारो नेव संगतं मन्यते यतस्तन्मतेन व्यङ्ग्यस्यैतद् भेदत्रयं वृत्तिकारेण कृतं व्यञ्जकभेदानिरूपणं चात्र कारिकाकारः कर्तु

प्रक्रमते लोचनकारमतेन तयोः पृथक्त्वात् तद्वचनानामपि अत्र ऐक्यं न संगच्छते इति। यद्यपि सम्पूर्णे द्वितीयोद्योते सर्वा अपि कारिका वस्त्वलङ्कारसादिदृष्ट्यैव ध्वनिभेदं प्रतिपादयन्ति यद्यपि च पूर्वव्याख्यात्रा चन्द्रिकाकारेण अपि तद्दृष्टयैव व्याख्यातं बभूव किन्तु लोचनं दुराग्रहवशात् तत्सर्वमपि एकपदे तिरस्करोति—''यस्तु व्याचष्टे व्यङ्ग्यानां वस्त्वलंकाररसानां मुखेन' इति स एवं प्रष्टव्यः एतत्तावत्त्रिभेदत्वं न कारिकाकारेण कृतम्। न चेदानीं वृत्तिकारो भेदप्रकटनं करोति ततश्चेदं कृतमिदं क्रियत इति कर्तृभेदे का संगतिः।'' (लो०) एवं तर्हि ध्वन्यालोकस्य ते सर्वे विषया असंगता भविष्यन्ति ये कारिकासु न सन्ति केवलं वृत्तौ प्रतिपादिताः सन्ति।

(११) तृतीयोद्योतस्य प्रथमकारिकायाम् प्रतिपादितस्य ''अनुरणनरूपव्यङ्ग्यस्य ध्वनेः'' इत्यस्य व्याख्यानं लोचनमित्थं करोति ''अनुरणनेन रूपं रूपणसादृश्यं यस्य तादृग्व्यङ्ग्यं यत् तस्येत्यर्थः'' (लो०) किन्तु व्यङ्ग्यमेव यत्र ध्वनिः स्यात् तत् 'व्यङ्ग्यपदोपादानमेव पुनरुक्तं स्यात् ''अनुरणनरूपस्य च ध्वनेः'' इत्येतावन्मात्रेणैव तस्य बोधः स्यात्। वस्तुतस्त्वत्र 'अनुरणनरूपं व्यङ्ग्यं यत्र तस्य ध्वनेः काव्यस्येति' व्याख्यानमेवाभिमतं ध्वनिकारस्य।

(१२) ननु ध्वनिः काव्यविशेषरूपश्चेत् कथमसौ पदमात्ररूप इति—(ननु ध्वनिः काव्यविशेष इत्युक्तं तत्कथं तस्य पदप्रकाशता ध्व०) ध्वनिकारस्य शङ्कामिमां लोचनकारो व्याख्याति यद् यदा ध्वनेः समुदायरूपोऽर्थो भवति तदेयं शङ्का जागर्ति—''समुदाय एव ध्वनिरिति पक्षे चोद्यमेतत्''—(लो०)। किन्तु ग्रन्थकारस्याभिमतं यत् शरीरेषु यथा अवयवविशेषजनितचारुता सम्पूर्णेऽवयविनि प्रतीयमानापि तस्मिन्नवयवेऽपि कल्प्यते तथैव व्यञ्जकपदविशेषजनितसम्पूर्णकाव्यप्रयुज्यमानो ध्वनिव्यवहारः पदेष्वपि प्रयुज्यते इति यथोक्तं तेनैव—''काव्यानां शरीराणामिव संस्थानविशेषावच्छिन्नसमुदायसाध्यापि चारुत्वप्रतीतिरन्वयव्यतिरेकाभ्यां भागेषु कल्प्यत इति पदानामपि व्यञ्जकत्वमुखेन ध्वनिव्यवहारो न विरोधी'' (ध्व०) इति। यदि नाम ध्वनिकारस्य ध्वनिव्यवहारः समुदायादत्रापि भवेद् तदसाववश्यं कथयेत् समुदायरूपे ध्वनावेवेयं शङ्केति। किन्तु ध्वनिकारस्तु कुत्रापि स्वप्नेऽपि समुदयादन्यत्र न ध्वनेरर्थं न च ध्वनेर्व्यवहारं कृतवानस्ति।

(१३) तृतीयोद्योते विवक्षितान्यपरवाच्यध्वनिकाव्यस्य प्रबन्धरूपो भेदः अलक्ष्यक्रमस्य रसादिरूपस्य व्यङ्ग्यस्य व्यञ्जको भवतीति विवृण्वन् ध्वनिकारः सोऽयं प्रबन्धरूपो ध्वनिः संलक्ष्यक्रमस्य वस्त्वलङ्काररूपस्यापि व्यङ्ग्यस्य व्यञ्जको भवति प्रसङ्गतः सोदाहरणमुल्लिखति—

किञ्च—

> अनुस्वानोपमात्मापि प्रभेदो य उदाहृतः।
> ध्वनेरस्य प्रबन्धेषु भासते सोऽपि केषुचित्॥

अस्य विवक्षितान्यपरवाच्यस्य ध्वनेरनुरणनरूपव्यङ्ग्योऽपि यः प्रभेद उदाहृतो द्विप्रकारः सोऽपि प्रबन्धेषु केषुचित् द्योतते। तद् यथा गृद्ध्रगोमायुसंवादादौ महाभारते (ध्व०) किन्तु लोचनकारः असंलक्ष्यक्रमव्यङ्ग्यप्रसङ्गेऽस्मिन् संलक्ष्यक्रमव्यङ्ग्यस्य वर्णनं सर्वथाऽसङ्गतं मन्वानः प्रसह्य व्याख्याति यत् प्रबन्धेन कदाचिद् रसादिरूपो व्यङ्ग्यः साक्षात् व्यज्यते कदाचित् परम्परया प्रथमं वस्त्वलंकारादिरूपः संलक्ष्यक्रमो व्यङ्ग्योऽर्थो व्यज्यते ततस्तेन च रसादिर्व्यज्यते—''न केवलं प्रबन्धेन साक्षाद्व्यङ्ग्यो रसो यावत् पारम्पर्येणापीति दर्शयितुमपक्रमते किञ्चेति—शब्दशक्तिमूलोऽर्थशक्तिमूलश्च यो ध्वनेः प्रभेद उदाहृतः स केषुचित् प्रबन्धेषु निमित्तभूतेषु व्यञ्जकेषु सत्सु व्यङ्ग्यतया

स्थितः सन् । अस्येति रसादिध्वनेः प्रकृतस्य भासते व्यञ्जकतयेति शेषः । एतदुक्तं भवति प्रबन्धेन कदाचिदनुरणनरूपव्यङ्ग्यो ध्वनिः साक्षाद् व्यज्यते स तु रसादिध्वनौ पर्यवस्यतीति ॥" (लो०) ध्वनिकारो ह्यत्र प्रबन्धरूपो विवक्षितान्यपरवाच्यध्वनिकाव्यविशेषः न केवलं रसादिरूपमसंलक्ष्यक्रमं व्यङ्ग्यमेव अभिव्यनक्ति अपितु वस्त्वलङ्कारारूपं संलक्ष्यक्रममपि व्यनक्तीतिसाधारणमानुषङ्गिके तथ्यं प्रसङ्गतो निवेद्य पुनः प्रकृतमनुसरन् रसादीनामसंलक्ष्यक्रमाणां व्यङ्ग्यानामन्यान् व्यञ्जकानपि निर्दिशति। लोचनकारस्तु दुराग्रहवशाद् व्यङ्ग्यमर्थमेव ध्वनिं मन्यमानः सम्पूर्णमेव सन्दर्भम् अप्रासंगिकम् अवाञ्छितं भ्रान्तं च प्रस्तौति। कारिकाया अन्वयं संगमयति तदनुसारमेव च वृत्तिग्रन्थमपि योजयितुमुपदिशति—"वृत्तिग्रन्थोऽप्येवमेव योज्यः" (लो०) ध्वनिकारवचनस्य स्पष्टं साधीयो यथार्थं च व्याख्यानं लोचनकारमान्यताविरुद्धं भवति ध्वनिकारवचनं चापि तस्य असंगतं प्रतीयते गृद्ध्रगोमायुसंवादाद्युदाहरणं च नीरसं प्रतिभाति अतः सर्वथाऽनृजुमस्पष्टमेवार्थं प्रस्तौति—"यदि तु स्पष्टमेव व्याख्यायते तदा ग्रन्थस्य पूर्वोत्तरस्यालक्ष्यक्रमविषयस्य मध्ये ग्रन्थोऽयमसङ्गतः स्यात् नीरसत्वं च पाञ्चजन्योक्त्यादीनामुक्तं स्यादित्यलम् (लो०) ।

किं च गृद्ध्रगोमायुसंवादोदाहरणे लोचनकारः शान्तरसमेव परिनिष्ठितं पश्यति—"स चाभिप्रायो व्यक्तः शान्तरस एव परिनिष्ठततां प्राप्तः" (लो०)। ध्वनिकारस्य तु तत्र अभिप्रायरूपं वस्तु एव व्यज्यत न तु रसादि इति वस्तुव्यङ्ग्यदृष्ट्यैवैतद्ध्वनिविशिष्टप्रकारे उदाहृतम् मम्मटेनाप्येतद् वस्तुव्यङ्ग्यप्रधाने प्रबन्धध्वनौ उदाहृतम्। रसस्तु एतादृशेषु सर्वप्रकारेषु काव्येषु परिनिष्ठितरूपेण विद्यत एव। अत एव च चित्रकाव्यस्यापि प्रसंगे ध्वनिकारेणोक्तम्—"न तादृक् काव्यप्रकारोऽस्ति यत्र रसादीनामप्रतीतिः" (ध्व०) ।

(१४) ध्वनिकाव्यस्यात्मरूपमलक्ष्यक्रमं रसादिरूपं व्यङ्ग्यं क्वचित् सुप्तिङ्वचनसम्बन्धकारकशक्तिसमासादिभिश्च विशेषैर्व्यज्यते यथोक्तं ध्वनिकारेण—

"सुप्तिङ्वचनसम्बन्धैस्तथाकारकशक्तिभिः ।"
कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित् ॥ (ध्व०)

मम्मटेनापि "पदैकदेकरचनावर्णेष्वपि रसादयः" (का० प्र०) इत्येभी रसस्य साक्षाद् व्यङ्ग्यता समर्थिता। किन्तु लोचनमतेन एभिः सुबादिभिः प्रथमं संलक्ष्यक्रमं वस्तुरूपमलंकाररूपं वा व्यङ्ग्यं प्रकाश्यते ततः परम्परया अलक्ष्यक्रमं रसादि व्यज्यते। अयमाशयः एभिः सुबादिभिः व्यञ्जकैर्विभावादिरूपमर्थं प्रतिपादयद्भिः साक्षात् अथवा प्रथमं विभावादि अभिव्यज्य ततः परम्परया रसादिरूपोऽर्थोऽभिव्यज्यते यथोक्तम्—"वयं त्वित्थमेतदनन्तरं सवृत्तिकं बुध्यामहे—सुबादिभिः योऽनुस्वानोपमो भासते वक्त्रभिप्रायादिरूपः अस्यापि सुबादिभिर्व्यक्तस्यानुस्वानोपमस्यालक्ष्यक्रमव्यङ्ग्यो द्योत्यः।....एतदुक्तं भवति—वर्णादिभिः प्रबन्धान्तैः साक्षाद् वा रसोऽभिव्यज्यते विभावादिप्रतिपादनद्वारेण यदि वा विभावादिव्यञ्जनद्वारेण परम्परयेति।" (लो०)। अत्र लोचनं वृत्तौ 'अभिव्यज्यमाना दृश्यते' इत्येतेन सह 'विभावादिव्यञ्जनद्वारतया पारम्पर्येण' इत्यध्याहृत्य व्याख्याति। स्वाभीष्टमर्थं प्रतिपादयितुं लोचनं निश्शङ्कं मूलग्रन्थ एव परिवर्तनं करोतीति तस्य शैली। वस्तुतस्तु स्थितस्य गतिश्चिन्तनीयेति व्याख्यानस्य रीतिर्भवति ।

(१५) तृतीयोद्योते व्यञ्जकदृष्ट्या ध्वनिप्रभेदान् निरूप्य स्वयं ध्वनिकारः व्यञ्जनायाः (व्यञ्जकत्वस्य) निरूपणं प्रक्रमते—"तदेवं व्यञ्जकमुखेन ध्वनिप्रकारेषु निरूपितेषु कश्चिद् ब्रूयात् किमिदं व्यञ्जकत्वं नाम" (ध्व०) इत्यादि। इतः प्राक् क्वापि ध्वनिकारः व्यञ्जनाया विवेचनप्रसङ्गं नोत्थापितवान्। किन्तु लोचनकारस्य मतेन व्यञ्जनाऽपि ध्वनिरस्तीति प्रथमोद्योत एवासौ व्यञ्जनां जिघ्रति—"व्यञ्जकभावं प्रथमोद्योते समर्थितमपि शिष्याणामेकप्रघट्टकेन हृदि निवेशयितुम्" (लो०) इत्यादि। तदेवोच्यते—"आम्रान् पृष्टः कोविदारानाचष्टे" इति।

यदि हि ध्वनिकारस्य व्यञ्जनाव्यापारोऽपि ध्वनिरभविष्यत् तन्नूनसौ प्रथमोद्योते 'काव्यस्यात्माध्वनिरित्यादिप्रथमकारिकाया वृत्तौ अभाववादस्य त्रीनपि वर्गानुल्लिखन् व्यञ्जनाविरोधिनामाचार्याणां मतमुदलेखिष्यत्। वस्तुतस्तु काव्यविशेषरूप एव ध्वनिः। अतः ध्वनेरभाववादित्वेन केवलमालङ्कारिकाणामेवाचार्याणां विकल्पा उल्लिखिताः। मीमांसादिशास्त्राणां मतं तु अत्र तृतीयोद्योते व्यञ्जनाप्रकरणे एव प्रसङ्गप्राप्तम्। प्रथमोद्योते तु क्वापि व्यञ्जनाया कथैव नास्ति।

(१६) अत्रैव तृतीयोद्योते व्यञ्जकत्वसिद्धिप्रसिद्धिप्रसङ्गे ध्वनिकारेणोक्तं यद् वाच्यात् पृथक् व्यङ्ग्यस्यार्थस्य सिद्धिस्तु प्रागेव (प्रथमोद्योते प्रतीयमानं पुनरन्यदेवेत्यादिरूपेण) प्रतिपादिता। तत्सिद्ध्यधीनैव च व्यञ्जनातिरिक्तस्य व्यङ्ग्यस्य सिद्धिः प्रागेव प्रतिपादिता तत्सिद्ध्यधीना च व्यञ्जकसिद्धिरिति" (ध्व०) लोचकारः पुनरत्र 'प्रागेव प्रतिपादितेत्यस्य व्याख्यां कुर्वन् कथयति—प्रथमोद्योते अभाववादनिराकरणे" (लो०) इति। किन्तु अभाववादः खलु ध्वनिकाव्यस्य विरोधेऽस्ति न तु व्यङ्ग्यस्यार्थस्य। व्यङ्ग्योऽर्थस्तु सनातनकालात् विदग्धविद्वत्परिषत्सु अभिमततरं वस्तु प्रतिपादयितुं शैली भवति—"प्रसिद्धिश्चेयमस्त्येव विदग्धविद्वत्परिषत्सु यदभिमततरं वस्तुव्यङ्ग्यत्वेन प्रकाश्यते न साक्षाच्छब्दवाच्यत्वेन" (ध्व०)।

(१७) चित्रकाव्यविवेचनान्ते च यदा ध्वनिकारः कथयति—"प्राप्तपरिणतीनां तु ध्वनिरेव काव्यमिति स्थितमेतत्" (ध्व०) इति तदा तु लोचनं दिवान्धत्वमेव भजते। ध्वनिस्तु लोचनमतेन प्रधानतया व्यङ्ग्यरूपः। स च व्यङ्ग्योऽर्थः कथं काव्यं स्यादिति लोचनं यदद्वैतवेदान्तं शरणं याति यत्र सर्वं खल्विदं ब्रह्मैव भवति अतो नित्यस्याविनाशिन आत्मनोऽप्यनित्येन विनाशशीलेन शरीरेण सहैक्यमभेदो वा संभवति। उभयोर्भेदस्तु शिष्यजनव्युत्पत्तये कृतो मन्तव्यः—"आत्मात्मिनोरभेद एव वस्तुतो व्युत्पत्तये तु विभागः कृत इत्यर्थः" (लो०)। एतादृशं भ्रान्तिजनकं व्याख्यानं हि दुर्लभमेव दृश्यते। वस्तुतस्तु ध्वनिव्यङ्ग्ययोराधाराधेयसम्बन्धोऽस्ति यथा देहात्मनोः। उभयोरैक्यप्रतिपादनमिव आत्मवञ्चना लोकवञ्चना स्वविपर्ययस्य प्रभात्वेन प्रतिपादनमेव भवतीति।

एवमेव भूयांसि स्थलानि सन्ति यत्र आलोके किमप्यन्यद् दृश्यते लोचनं च तदन्यदेव पश्यति। एतानि कतिपयानि स्थलानि निदर्शनतयोल्लिखितानि। सांप्रतं ध्वनिव्याख्यानप्रसंगे लोचनात् स्वमतभेदादहं तन्महामाहेश्वरलोचनकारचरणयोरिति क्षमायाचनां चापि प्रस्तौमि—

दुर्धरं शास्त्रचिन्तायां ध्वन्यकूपारमन्दरम्।
वन्देऽभिनवगुप्ताख्यं ज्ञानमार्तण्डमुद्धरम्॥

•

ज्ञानस्य स्वतो वेद्यत्वम्

आचार्यप्रभुलालगोस्वामी

दर्शनविभागाध्यक्षः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य

युक्त्या तर्केण वा केवलेन वस्तुतत्त्वस्य निरूपणं सर्वथाऽसम्भवमेव। तर्को न भवति कदापि निर्विषयकः विषयशून्यत्वं तर्कस्य न सम्भाव्यते, अतः, तस्य विषयः श्रुत्यर्थ एव स्यात्, मनीषिगणानुभवसमर्थितार्थेऽन्यथा कल्पनाऽज्ञानपरिकल्पितैव भवेत्। नैतावता श्रुत्यर्थमननं विनैवार्थपरीक्षणं श्रवणमात्रेण स्वीकरणीयम् इति। परीक्ष्यैवार्थः ग्राह्यः स एवार्थः कस्यापि पुरुषार्थस्य साधनं भवति। भ्रमप्रमादाद्यकलुषिततत्त्वनिर्णयः प्रमाणप्रतिष्ठितो जायते। परं परमगुह्यातीन्द्रियमानवबुद्ध्यगम्येऽर्थे युक्तिरसमर्थैवालौकिके वस्तुनि लौकिकप्रत्यक्षमूलिका युक्तिः सर्वथाऽकिञ्चित्करी, अलौकिकश्रुतिप्रमाणेनैवालौकिकवस्तुविषयप्रतिपादनं सम्भाव्यते, अपरोक्षानुभव एव शेषे प्रमाणम्, श्रुतिश्च अलौकिकप्रमाणस्य साधिकेति पुरुषार्थसाधनोपायभूता। अत एवोक्तं "नैषा तर्केण मतिरापनेया (क० १।१।३) अत्रेयं चिन्ता जागर्ति यत् शास्त्रवाक्यस्य प्रमाणत्वात् सर्वेषामेव शास्त्राणामेकरूपेण प्रामाण्यमव्याहतमेव। सत्यस्यैकत्वात्परस्परविरुद्धार्थप्रतिपादकशास्त्रस्य प्रामाण्यन्न भवितुमर्हति, किन्तु कस्यापि शास्त्रस्य प्रामाण्यमनया रीत्या नैव प्रतिपादयितुं शक्यत इति कापि निर्णीतिरपेक्षितैवात्र एतदेव वक्तुं शक्यते यत् यस्य शास्त्रस्यार्थः सर्वविधप्रमाणानुगृहीतस्तस्यैव प्रामाण्यम्। बाइबिलादिग्रन्थे सृष्टितत्त्वस्य यादृशं विवरणमुपलभ्यते तत्तु विज्ञानालोके सर्वथा व्याहतमेव। भ्रमात्मक एव यदि श्रुतिसमर्थतोऽर्थः स्यात्तदा नूनमेवाप्रामाण्यं स्यात्। सामान्यज्ञानेन यद्यपि आपातविरोधो लभ्यते श्रुतिज्ञानेषु किन्तूहापोहकुशलैः पूर्वापरमीमांसया निरूपिते तदर्थे विरोधः दूरीकृतो भवतीति। विज्ञानञ्च नेदानीमपि इयत्ता भूमिमधिगतमिति तत्त्वनिर्णायिकेनोपसंहारवाक्येन नैव (Last Word) सम्यगुपसंहृतम्। सत्यानुसन्धानगाम्भीर्यमेव वेदान्तशास्त्रानुकूल्यमधिगच्छति इति शास्त्रसम्मत एव तर्कोऽनुमोदित आचार्यैः।

श्रुतिशब्देन वेदस्य तन्मूलकशास्त्रवाक्यादेश्चावगतिर्भवति। बादरायणसूत्रस्य "शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्" (ब्र० सू० १।३।२८)। इत्यस्य व्याख्यायामाचार्यः शङ्करः श्रुतेः प्रत्यक्षत्वं स्मृतेश्चानुमानत्वं मुखेन निर्दिशति। "प्रत्यक्षं श्रुतिः, प्रामाण्यं प्रत्यनपेक्षत्वात्। अनुमानं स्मृतिः, प्रामाण्यं प्रति सापेक्षत्वात्"। प्रत्यक्षानुभवरूपैव श्रुतिरनर्थनिवृत्तेः साधिका। अनुभवावसानत्वाद् भूतवस्तुविषयत्वाच्च श्रुत्यादयोऽनुभवादयश्च प्रमाणं ब्रह्मज्ञानस्य। आत्मज्ञानाय च श्रवणं मननं निदिध्यासनमेव साधनम्। श्रुत्याऽवगतस्यार्थस्य मननं करणीयं विना परीक्षणं विपरीतसम्भावनायाः असम्भावनाया वा निवृत्तिर्नैव सम्भाव्यते। तर्केणैव तत्त्वज्ञानमसंशीति दृढनिश्चितभूमिञ्चाधिगच्छति। अत एव बुद्धो ब्रवीति—

तापाच्छेदाच्च निकषात् सुवर्णमिव पण्डितैः।
परीक्ष्य भिक्षवो ग्राह्यं मद्वचो न तु गौरवात्॥

"सत्यमेव जयते नानृतम्" (मुण्डकोप० ३।१।६) अनया श्रुत्यापि सत्यं वस्तु सदा प्रमाणेनाविकम्पितमेवार्थं प्रतिपादयति। मननस्य दृढविपाकभूमौ सत्यां अपरोक्षज्ञाने पर्यवसानं भवति

निदिध्यासनेन। श्रुतमयी, चिन्तामयी, भावनामयी चेति त्रिविधाः प्रज्ञाः, तत्र भावनामयं ज्ञानं साक्षात्कारे पर्यवसानं लभते। संशयनिरसनञ्च न विना साक्षात्कारं वेदान्तवाक्यञ्चोपनिषत्सार-सङ्ग्रहमात्रम् "वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्" (शा० भा० पृ० ८८) तर्कशास्त्रारम्भेऽप्युक्तम्—"यद्यपीदं वेदान्तवाक्यानामैदम्पर्यं निरूपयितुं शास्त्रं प्रवृत्तम्, न तर्कशास्त्रवत्केवलाभि-युक्तिभिः कञ्चित् सिद्धान्तं साधयितुं दूषयितुं वा प्रवृत्तम्। तथापि वेदान्तवाक्यानि व्याचक्षाणैः सम्यग्दर्शनप्रतिपक्षभूतानि सांख्यादिदर्शनानि निराकरणीयानि"। (शां० भा० पृ० ४८७) एतावता वाक्येन प्रमाणानुगृहीतस्तर्कस्तावदसंशयादीन् निरस्यति।

जीवस्याशेषकल्याणविधानोपायनिर्देशार्थं श्रुतिः प्रवर्तते, प्रमाणविरुद्धेन बाधितार्थेन तत्त्व-निर्णयो न कदापि सम्भाव्यते यतः प्रमाणविरुद्धार्थो बाधित इति अतत्त्वभूत इति अनर्थंजनक इति पुरुषकल्याणसाधको नासौ भवितुमर्हति। लोकातीतापरोक्षानुभूतिः श्रुतिरेव प्रामाण्यमश्नुते।

वेदान्तमते सत्ताः—

कस्यापि सत्तायां तज्ज्ञानमावश्यकम्। यावज्ज्ञानं न जायते तावत् वस्तुनः सत्ताविषये न किमपि वक्तुं शक्यते। नास्तीति प्रतिपादनार्थमपि तद्विषयकं ज्ञानमपेक्षितमेव। परमत्रेयं जिज्ञासा जागर्ति यत् ज्ञानेन वस्तुनः विषयस्य वा सत्ता अपेक्षिता, किन्तु ज्ञानस्यास्तित्वं कथं ज्ञायते। ज्ञानमपि वस्तु तदपि अस्ति, अतः विषयस्य सत्ता यथा ज्ञानसापेक्षा तथैव ज्ञानस्यास्तित्वसिद्ध्यर्थमपि प्रमाण-स्वरूपस्य चान्यस्य ज्ञानस्य अपेक्षा वर्तते। वस्तुविषयकज्ञानस्यास्तित्वं ज्ञानविषयकज्ञानेन क्रियते तदा द्वितीयज्ञानस्यास्तित्वमपि तृतीयेन ज्ञानेन साधनीयमित्यनया रीत्या क्रमेण तदस्तित्वसाधनार्थं चतुर्थस्य पञ्चमस्य ज्ञानस्यापेक्षेति कल्पनाप्रवाहस्याविश्रान्तिरिति एतादृशेषु स्थलेषु अनवस्थादोषः संघटते। यथा न्यायमते ज्ञानं न स्वतः प्रमाणमपि तु ज्ञानप्रामाण्यमनुमानसाहाय्येन जायते। अत्रेय-माशङ्का यदनुमानमपि एकं ज्ञानन्तदपि न स्वतः प्रमाणम् तथा चानुमानप्रामाण्योपपादनार्थं पुनः अनुमानान्तरस्यावश्यकतेति पर्यवसानगतिर्न सम्भाव्यते।

परं नैयायिकाः अनवस्थादोषं नाङ्गीकुर्वन्ति यतः केऽपि घटस्य प्रत्यक्षं कुर्वते तदा तेऽवगच्छन्ति घटस्य देशकालसम्बन्धमपि—घटोऽस्ति, घटो विद्यते इति। एतेन च घटस्यास्तित्वमेव बोध्यते घट-ज्ञानविषये न किमप्युच्यते। घटज्ञानं घटस्यास्तित्वमुद्घोषयति परं ज्ञानं घटस्येव जडस्वरूपमिति स्वास्तित्वप्रतिपादनक्षमत्वं नास्ति तस्मिन्। घटस्यास्तित्वोद्बोधनार्थं यथा घटस्यावश्यकता तथैव घटज्ञानस्यास्तित्वोद्घोषणार्थं घटज्ञानविषयकज्ञानस्याप्यावश्यकताऽस्ति। परं नैयायिकैरुच्यते—विषयस्यास्तित्वसिद्धिप्रतिपादनमात्रमेव ज्ञानस्यावश्यकता ज्ञानेन विषयस्यास्तित्वसिद्धौ सत्यां ज्ञान-विषयकज्ञानस्य न किमप्यतिरिक्तं प्रयोजनमिति। विषयास्तित्वसिद्ध्यर्थं तद्विषयकज्ञानमेवालम्। ज्ञानमेव विषये प्रमाणम्, तत्प्रमाणार्थमन्यत्प्रमाणं निरावश्यकम्।

अत्रेयमपरा जिज्ञासोदेति ज्ञानस्य ज्ञानं विना ज्ञानस्यास्तित्वं कथमिव ज्ञायेत तत्सत्तायां किं प्रमाणम्। यस्य वस्तुनः सम्बन्धेऽस्माकं परिचयो नास्ति अर्थात् किमपि ज्ञानं नास्ति, तद्वस्तुनः सत्तास्ति इति कथमपि न वक्तुं शक्यते। ज्ञानं विना तस्य वस्तुनः सत्तायाः अभाव एव। उदयनाचार्येणात्र समाहितं यत् ज्ञानं यद्यप्यज्ञातं तथापि तदवगतिर्न भवतीति वक्तं न शक्यते तद्विषयसम्बन्धे यदि ज्ञानाग्रहश्चेत् तदा अनुमानेन स्मृत्या वा तज्ज्ञातुं शक्यते। अतस्तज्ज्ञाने जाते तन्नास्तीति कथनं खपुष्पायितमेव।

अत्रेयं जिज्ञासा यत् अनुमानेन यदि तज्ज्ञानं भवतीत्युच्यते तदा अनुमाने कश्चिद्धेतुर्वक्तव्यः ? कार्यकारणभावसद्भावाद् अर्थात् विषयप्रकाशप्रकार्यस्याज्ञानकारणस्य च संस्थितिरिति कार्येण हेतुना कारणानुमानं सुकरमेव। परमयमपरः गण्डस्योपरि स्फोटो यत् कार्यकारणभावसिद्धिः कथमिव स्यात् ? :विषयप्रकाशनवेलायामेव यदि ज्ञानं ज्ञातं नास्ति तदोभयोः कार्यकारणभावस्तावत् कथं निर्द्धारितो भवेत्। स्मरणेनापि ज्ञानज्ञानं न भवितुमर्हति, यतः स्मरणं पूर्वानुभूतविषयसम्बन्ध एव भवति। ज्ञानं यदि न ज्ञातं तदा तद्विषये स्मरणमिति दूरङ्गमाशा।

भवतु नामानुव्यवसाय एवोक्तज्ञाने प्रमाणम्। ज्ञानविषयकज्ञानेनार्थात् घटविषयकं ज्ञानं व्यवसायः घटविषयकज्ञानविषयकं ज्ञानमनुव्यवसायः। तथा चानुव्यवसायेन वेद्यं व्यवसायात्मकं ज्ञानमिति प्रथमं ज्ञानं द्वितीयक्षणे अनुव्यवसायज्ञानेन वेद्यमेव नाज्ञातमिति, सत्यम्, प्रथमं ज्ञानं द्वितीयेन ज्ञानेन वेद्यं परं स्वयं तु स्वयं वेद्यं नास्ति यतः ज्ञानमपि विषयस्येव जडात्मकम्। द्वितीयज्ञानेन प्रथमं ज्ञानं यदि वेद्यं न स्यात् तदा प्रथमं ज्ञानमस्तीति वक्तुं न पार्यते, परं द्वितीयं ज्ञानमस्तीत्यत्र किं प्रमाणम् यत एतदपि ज्ञानं जडात्मकम् तथा च तत्सत्तार्थमपरं ज्ञानमावश्यकम्। अनेन प्रकारेण अनुव्यवसायाङ्गीकारेऽपि न निर्मोक्षः। एतस्याः आपत्तेः समाधानार्थं यदि स्वीक्रियते यत् व्यवसायोत्तरक्षणे नियमेनानुव्यवसाय उत्पद्यते तथा चानुव्यवसायसाहाय्येन व्यवसायो ज्ञायेतानुव्यवसायसत्तार्थञ्च कस्यापि प्रमाणस्यापेक्षा नास्तीत्यङ्गीरेऽप्यज्ञानं न विषयप्रकाशकं भवितुमर्हतीति सिद्ध्यति। ज्ञानं ज्ञानान्तरेण परक्षण एव वेद्यं भवत्येवेति स्वीकारे तु नैयायिकानामपि वेदान्तसिद्धान्त एव विनिपातः। वेदान्तिनो ज्ञानोत्पत्तिक्षण एवं स्वप्रकाशत्वं नैयायिकाश्च परवर्तिक्षणे ज्ञानस्य प्रकाश इयान् एव भेदः। एतावतापि अज्ञातज्ञानमेव विषयस्य प्रकाशकं यतः सर्वं ज्ञानं परक्षणे ज्ञानान्तरेणावश्यवेद्यमिति। ज्ञानं ज्ञानान्तरेण तदप्यन्येनेति शेषे यत्र ज्ञानधारा विश्रान्तिं प्राप्नुयात् तज्ज्ञानमज्ञातमेव, तथा चानवस्था समाधानाभावश्च।

नैयायिकैरुच्यते ज्ञानस्याज्ञातत्वेऽपि विषयस्य प्रकाशनं भविष्यति यतः तदस्तित्वे भवतु नाम संशयस्तावतापि अज्ञातं ज्ञानं विषयस्य प्रकाशनं कुर्यादेवास्तित्वसंशये च परवर्तिज्ञानं तदस्तित्वे प्रमाणं भविष्यति। एवमेव द्वितीयज्ञानास्तित्वेऽपि यदा जिज्ञासा भवेत्तदा तृतीयं ज्ञानं तत्र प्रमाणं स्यादेव। तथा च जिज्ञासायामेव ज्ञानान्तरं स्यान्नान्यथेति नानवस्थादोषावसरः। "यदि ज्ञानविषयज्ञानमवश्यं ज्ञायेतावश्यं वा जिज्ञास्येत तदा ज्ञानपरम्परालक्षणानवस्था स्यात्, सा त्वनुपलम्भबाधिता" (ता० परि० पृ० २०१)

अत्रेत्थं चिन्तनीयं यत् अज्ञातज्ञानास्तित्वविषये सति सन्देहे परवर्तिज्ञानेन पूर्ववर्त्यज्ञातज्ञानं ज्ञातं स्यात् एवं तेन च तदस्तित्वं सेत्स्यति परं सर्वथाऽज्ञातविषये जिज्ञासैव न यायात्। सामान्यतो ज्ञाते विशेषतोऽज्ञाते जिज्ञासा भवति। प्रथमन्तु ज्ञानं यदा जायते यदा सर्वथाऽज्ञातमेव तज्ज्ञानमिति तद्विषयिणी जिज्ञासा दूरङ्गतैव। विना जिज्ञासां प्रमाणभूतस्य द्वितीयस्य ज्ञानस्यावसर एव नास्ति इति प्रथमज्ञानस्यास्तित्वविषयिणी कथैव वृथाऽसिद्धं च ज्ञानं कथं विषयप्रकाशकं स्यात्। तथा च ज्ञानान्तरेण ज्ञाते सति ज्ञानस्यास्तित्वं भवेदिति चिन्तनं सर्वथावराहतम्, इति सर्वोऽपि दोषः पुनरप्यापतेत्, अज्ञाताप्रकाशस्वरूपज्ञानसद्भावे सन्देहो विपर्ययो वा भवेदेव। ज्ञानोत्पत्तौ सति सन्देहे विपर्यये वा ज्ञानमुत्पन्नं न वा ज्ञानं नैव जातमिति बोधः सम्भाव्यतेऽनुभवेन च ज्ञायते एतादृशी दशा न भवतीत्यकामेनापि स्वीकरणीयं यत् ज्ञातमेव ज्ञानमुत्पद्यत इति। ज्ञानज्ञानार्थमन्यज्ञानपरम्परां स्वीकृत्य प्रथमज्ञानेन विषयप्रकाश इति न

सम्भाव्यते युक्त्याऽनुभवेन वा। ज्ञानेन विषयप्रकाशः न तु व्यवसायज्ञानं स्वस्याप्यवभासकं तथा च ज्ञानस्य विद्यमानतादशायां ज्ञाने संशयो विपरीतनिश्चयो वा न भवति, ज्ञानस्य स्वरूपसत्तैव तद्विरोधिनी। ज्ञानातिरिक्तघटादिविषयस्यानवभासमानत्वे घटपटादौ संशयो विपर्ययो वा भवति। नैयायिकानां इत्थं समाधानेऽपि—यः पुरुषः घटं जानाति तस्मिन् काले घटस्य भासमानतायामपि घट-ज्ञानं भासमानं नास्ति तावतापि ज्ञातुः पुरुषस्य मम ज्ञानमस्ति न वेति मम संशयः मम ज्ञानं नास्तीति विपर्ययनिश्चयो न जायते। यतः ज्ञानस्य स्वरूपसत्तैवानयोः विरोधिनी। परन्तूहा-पोहपूर्वकविचारणायां ज्ञानस्य स्वप्रकाशत्वमकामेनापि गले आपतितम्। यतः भासमानवस्तुविषये संशयो विपरीतनिश्चयो वा न भवति, ज्ञानविद्यमानतामात्रेण तदभावे स्वप्रकाशत्ववादिसिद्धान्ता-पेक्षयाऽस्वप्रकाशत्ववादिनां मते न किमपि वैलक्षण्यं जातम्; इति ज्ञानस्य स्वप्रकाशत्वं प्रकारान्त-रेणाङ्गीकृतमेव। स्वसत्तायां प्रकाशाव्यभिचारत्वमेव स्वप्रकाशत्वम् इति; स्वप्रकाशत्वफलस्वीकारे स्वप्रकाशत्वाभावत्वं ज्ञानस्येति दुराग्रहमात्रमेव। अहं वा नाहम्वेति संशयः नाहमेवेति विपरीत-निश्चयो न भवति नैयायिकानां मते सत्यपि आत्मनः प्रकाश्यत्वे आत्मविषयकज्ञानाभावसमये इत्यत्रापि ज्ञानस्य स्वरूपसत्तैव संशयस्य विपरीतनिश्चयज्ञानस्य विरोधिनी। भामत्यामात्मनः स्वप्रकाशत्वमिति "विविधजनसङ्कीर्णगोपूरेण पुरं निविशमानं नरान्तरेभ्यः आत्मनिर्द्धारणाय असाधारणं चिह्नं विदध-तमुपह्मन्ति पाशुपतं पृथक् जनाः" (भा० २।२।२५) एतावता वाक्येन पामरैरप्यात्मनः स्वप्रकाशत्व-मुररीकृतमिति वदन्ति वाचस्पतिमिश्राः।

नात्र सन्देहो ज्ञानस्य आत्मनश्च घटादेरिवास्वप्रकाश्यत्वं तथापि तत्र सन्देह; विपर्ययो वा न भवतीति वैलक्षण्यम्। वेद्यं यथा घटपटादिकं तथैवात्मा ज्ञानञ्च स्वरूपसत्तामात्रे घटपटादौ संशयः ज्ञाने च न भवति संशयः। वेदान्ते स्वप्रकाशत्ववशात् घटाद्यपेक्षया वैलक्षण्यमिति नैयायिकैरपि यदि वैलक्षण्यमुभयोरङ्गीकृतं तदा स्वप्रकाशत्वं नास्ति इति कथनमात्रमेव, यतः स्वरूपसत्तामात्रेण संशयादिविरोधित्वन्नान्यथा संघटते। विरोधकल्पनायामनुभवस्यान्यथाऽसिद्धत्वात्।

न्यायमते कस्यापि पदार्थस्य स्वप्रकाश्यत्वं नास्ति अत एव "सप्तानामपि साधर्म्यं ज्ञेयत्वादिक-मुच्यते।" (कारिकावलिः का० १३) परं प्रकारान्तरेण स्वप्रकाश्यत्वं ज्ञानस्याव्याहतमेवेदानीं चिन्तनीयं किमत्र कारणं स्वाप्रकाश्यत्वे तदैतदेव वक्तुं शक्यते यत् विज्ञानवादिना बौद्धेन सह मतैक्य-निराकरणमेव, यतः विषयप्रकाशेन सहैव नियतरूपेण विषयविषयकज्ञानस्यापि प्रकाशत्वं यदि नैयायिकैः स्वीक्रियतेः तदा विज्ञानस्य विज्ञेयस्य च सहोपलम्भनियमप्रयुक्तः विज्ञानवादस्य प्रवेशोऽकामे-नापि गले पतितः स्यात्—उक्तञ्च धर्मकीर्तिना—

सहोपलम्भनियमादभेदो नीलतद्धियोः ।
भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये ॥ (विज्ञप्तिमात्रतासिद्धिः) नयनरोगवशात्

एकस्यापि चन्द्रस्य द्विचन्द्ररूपेणैककालावच्छेदेन प्रतीतिः जायेत इति अनुमानेन नियतसहोपलम्भानां वस्तुनामेकत्वमेव नीलवस्तुनः नीलज्ञानस्यापाततः सत्यपि भेदे वस्तुत उभयोरभिन्नत्वमेव, भेद-प्रतीतिस्तु भ्रान्तिज्ञानजन्या किञ्चाभासमानज्ञाने विषयप्रकाशो न भवितुमर्हति। "अप्रत्यक्षोप-लम्भस्य नार्थदृष्टिः प्रसिध्यति"। (विज्ञप्तिमात्रतासिद्धिः) "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम्" (अ०सू० १।१।४) एतत्सूत्रव्याख्याने वाचस्पतिमिश्रस्य व्यवसायाऽनुव्यवसाययोर्भेदप्रदर्शनमुखेन ज्ञानद्वैविध्य-प्रकाशनं त्रिलोचनगुरूपदिष्टमेव न स्वमतम्—

त्रिलोचनगुरुन्नीतमार्गानु गमनोन्मुखैः ।
यथामानं यथावस्तु व्याख्यातमिदमीदृशम् ॥ (तात्पर्यटीका १।१।४)

अत एव ज्ञानश्रीमित्रप्रभृतयः निबन्धेषु न्यायमञ्जरीमतस्य खण्डनं कृतम्। तथा च पूर्वोक्त-ज्ञानभेदः जरन्नैयायिकसम्प्रदायपरम्परानुस्यूत इति व्यवसायानन्तरमनुव्यवसाय इत्युभयोः साहित्यं नास्ति। व्यवसायो विषयप्रकाशकोऽनुव्यवसायो ज्ञानस्य प्रकाशक इति ज्ञानस्य विषयस्य सहोपलम्भ-नियमः नैयायिकमते नास्ति। इति धर्मकीर्तिप्रदर्शितव्याप्तिस्तत्र न संगच्छते। एतस्य विज्ञानवादिबौद्ध-समर्थितस्य ज्ञानविषययोः क्रमिकोपलम्भाभावादैक्यस्य खण्डनार्थं शबरस्वामिना कुमारिलभट्टेन च ज्ञानस्य नित्यानुमेयत्वमङ्गीकृतम्। तन्मते ज्ञानस्य प्रत्यक्षतयोपलम्भो न भवति। एतस्य खण्डनं न्यायमञ्जर्यां जयन्तभट्टेन कृतम्—

"अहो बत इमे केभ्यो बिभ्यतः श्रोत्रियाः परं किमपि वैक्लव्यमुपागताः। न खल्वनित्यं परोक्षं ज्ञानं भवितुमर्हति। ज्ञातोऽर्थः इति क्वचित्तद्विशिष्टार्थप्रत्यवमर्शदर्शनाद् विशेषणाग्रहणे शुक्लः पट इतिवत् विशिष्टप्रतीतेरनुदयात्। कश्चायमियान् त्रासः विषयग्रहणकाले विज्ञानग्रहणमात्रकेण बाह्यार्थनिह्नवादिनः शाक्याः शक्याः शमयितुम्"[1]।

मीमांसकाः यज्ज्ञानस्य नित्यत्वं परोक्षत्वं च स्वीकुर्वन्ति। तन्न सङ्गतम्। ज्ञातो घट इति इत्यस्य प्रत्यक्षत्वं भवति। एतस्मिन् प्रत्यक्षे ज्ञानस्य विशेषणत्वं घटस्य विशेष्यत्वम्। विशेष-णस्य ग्रहणे ज्ञानविशिष्टविषयस्य ग्रहणं न सम्भाव्यते। शुक्लः पटः एतादृशप्रत्यक्षे शुक्लत्वस्य प्रत्यक्षत्वं यावन्न जायते, तावत् शुक्लः पटः इत्यस्य प्रत्यक्षत्वं न भवितुमर्हति। विषयग्रहणकाले विषयविषयकज्ञानस्य ग्रहणं न भवति इति स्वीकारेणैव धर्मकीर्तेः सिद्धान्तस्य निरासः सम्भाव्यत एवातः विज्ञानवादिमतनिरासार्थं ज्ञानस्य नित्यानुमेयत्वस्वीकारावश्यकता नास्ति। अतः विज्ञान-वादनिरासायैव प्रयास इति।

प्राभाकरास्तु ज्ञानस्य संविदश्च भेदमङ्गीकुर्वन्ति। ज्ञानस्य नित्यानुमेयत्वं संविदश्च स्वप्रकाशत्वम्। 'ज्ञायतेऽनेन' इति करणव्युत्पत्त्या ज्ञानपदस्य निष्पत्तिर्भवति। संविदः ज्ञप्तेश्च करणमेव ज्ञानम्। आत्ममनःसंयोग एव ज्ञप्तेः करणम्। मनसः अतीन्द्रियत्वात् आत्मनः संयोगस्या-प्रत्यक्षत्वमेव। प्रत्यक्षाप्रत्यक्षयोः संयोगोऽपि घटाकाशसंयोगयोरिवाप्रत्यक्ष एवेति अप्रत्यक्षत्वादनु-मेयत्वमेव। सत्यपि ज्ञानस्यानुमेयत्वे ज्ञप्तेः संविदश्च स्वप्रकाशत्वमेव प्राभाकरमते, अद्वैतवादिमता-पेक्षया स्वप्रकाशत्वं पृथगेवैतन्मते। प्रत्यक्षस्य परोक्षस्य वा ज्ञानस्य उत्पत्तौ वस्तुत्रयस्य मानं भवति—विषयस्य, संविदः, आत्मनश्च। विषयस्य पारोक्ष्यादेव संविदः परोक्षत्वव्यवहारः। सकलपरोक्ष-ज्ञाने एव संविदः संविदाश्रयस्य चात्मनः अपरोक्षरूपेण भासमानत्वम्। प्रत्यक्षज्ञानविषये विषयस्य संविदः तदाश्रयस्य चात्मनः एतत्त्रयाणामेवापरोक्षत्वरूपेणावभासमानता। प्रत्यक्षज्ञाने विषयस्य कर्मरूपेण, संविदः स्वाभिन्नत्वरूपेण आत्मनश्च संविदाश्रयत्वरूपेण च भानं भवति। एतत्त्रयाणां सर्वत्र भासमानत्वेऽपि भासमानतायाः प्रयोजकः भिन्नः भवति। आत्मनः कर्तृत्वरूपेण भासमानत्वं न तु कर्मत्वरूपेण। एतन्मते प्रत्यभिज्ञाप्रत्यक्षेणात्मनः स्थैर्यमेकत्वञ्च न सिद्ध्यति, यतः आत्मा प्रत्यभिज्ञा-प्रत्यक्षस्य विषयो न भवितुमर्हति। तत्वचिन्तामणौ प्रदर्शितनवीनप्राभाकरमते विषयः, संविद् आत्मा एतत्त्रितयमपि संविद्विषयत्वेन आसते। तथा च संविदः आत्मनश्च वेद्यत्वमेवेति संविदः स्ववेद्यत्वम्। नैयायिकाः संविदं स्ववेद्यत्वं न स्वीकुर्वन्ति सत्यपि ज्ञानवेद्यत्वे। नव्यप्राभाकरमते संविदः स्ववेद्यत्वं स्वप्रकाश्यत्वञ्च। स्ववेद्यत्वात्मकं स्वप्रकाशत्वं ज्ञानस्य बौद्धसम्मतम्। स्ववेद्यत्वसिद्धान्तः

१. न्या० मं० पृ० १६।

विरुद्ध एव यतः तथा स्वीकारे क्रियाकर्मविरोध एव। क्रियैव क्रियाकर्म न भवितुमर्हति। छेदनक्रियया वृक्षस्य छेद्यत्वेऽपि छेदनक्रियायाः स्वयं छेदनमेव छेद्यं न भवति अङ्गुल्यग्रेणाङ्गुल्यग्रस्य स्पर्शनं न भवति। नव्यप्राभाकरमते बौद्धमतस्य प्रभावः सहोपलम्भनियमापत्तिश्च नव्यप्राचीनोभयप्राभाकरमते समानैव।

विज्ञानवादस्य विरोधाय प्राभाकरा कथयन्ति यत् सहोपलम्भनियमवशात् विज्ञानविज्ञेययोरभेदः कथमिव गृहीतः विना, दृष्टान्तं व्याप्तिर्नं भवति। "यद् यस्य नियतसहोपलम्भनं तत्ततो न भिद्यते यथा एकस्माच्चन्द्रमसो द्वितीयश्चन्द्रमाः[1]।" भ्रान्तिज्ञाने चन्द्रद्वयस्य नियतसहोपलम्भ एव व्याप्तिग्रहणभूमिः। एतदेवोक्तं धर्मकीर्तिना "दृश्यतेन्दोरिवाद्वये"। भ्रान्तिज्ञाने भासमानं चन्द्रद्वयं दृश्यं विज्ञेयं वा वस्तूभयमेव। दृश्यस्य विज्ञेयस्य वा वस्तुनः नियतसहोपलम्भे यदि तयोरभेदो भवति चेद् भवतु, परं दृष्टान्तेन विज्ञानविज्ञेययोरभेदसिद्धिः कथमिव स्यात्? नीलतद्विज्ञाने न परस्परं भिद्येते, नियतसहोपलब्धिकत्वात्, भ्रान्तिदृष्टचन्द्रद्वयवत्। प्रदर्शितेऽस्मिन् बौद्धसम्मतेऽनुमाने "द्वयोर्विज्ञेत्वम्" उपाधिः, अयमुपाधिः भ्रान्तिदृष्टचन्द्रद्वये वर्तते परं पक्षे नास्ति। अतः सहोपलम्भनियमेन विज्ञेयस्य विज्ञानस्य चाभेदत्वं न भवितुमर्हति। उक्तञ्च नयविवेके भवनाथमिश्रेण—

"यत्तु कीर्तेर्हेतुत्रयं तन्मन्दमिति गुरुणा नोपन्यस्तम्। तथा हि निराकारापि धीर्नीलादिव्यवहारानुगुणतया नीलधीः पीतधीरिति व्यस्थामर्हति। सहोपलम्भनियमस्तु उपलभ्ययोरभेदसाधनम् नोपलम्भोपलभ्ययोः" (नयवि० ११० पृ०)।

आत्मनः संयोगेन घटानुभवात्मकं व्यवसायज्ञानं जायते, किन्तेनैवात्मनः संयोगेनानुव्यवसायोऽपि जायते, किम्वापरेणात्ममनःसंयोगेन? यद्येकेनैव व्यवसायात्मकमनुव्यवसायात्मकञ्च ज्ञानुमुत्पद्यत इति स्वीक्रियते, तदा अनुव्यवसायविषयस्य व्यवसायज्ञानस्यापि अनुव्यवसायात्मकं ज्ञानं प्रति कारणत्वमङ्गीकरणीयम्। प्रत्यक्षज्ञानविषयस्य पुरोवस्थितिरपेक्षिता घटाभावे घटविषयकं प्रत्यक्षज्ञानं न भवति व्यवसायज्ञानमनुव्यवसायस्य विषयस्तथा च व्यवसायस्यानुव्यवसायपूर्वभावित्वमपेक्षितम्। अनुव्यवसायज्ञानजनकं व्यवसायात्मकं ज्ञानमनुव्यवायसश्च तज्जन्यः। जन्यजनकयोश्च पूर्वापरीभाव आवश्यकः एकेन मनःसंयोगेन सहैव व्यवसायस्यानुव्यवसायस्य च ग्रहो न सम्भाव्यते। यदुच्येत एकेनैवोत्पत्ताव पि क्रमिकोत्पत्तिरनयोः एकमेव कारकं कार्यद्वयस्य क्रमिकोत्पादकं न भवेदित्यत्र प्रमाणं नास्ति। असमवायिकारणभेद एव ज्ञानभेदस्य हेतुर्भवति। असमवायिकारणभेदस्य ज्ञानभेदं प्रति हेतुत्वाभावे प्रत्यभिज्ञास्थले घटानुभवः तत्स्मरणं तद्विषयकानुमित्यादिकं ज्ञानमनुभवसमकालमेव स्यात्। एकस्मिन्नेव क्षणे घटाश्रयस्य, घटावयवादेश्च प्रत्यक्षत्वं स्यात्, यतः सन्निकर्षस्तु वर्तत एव। एवमेव अस्यां दिशि घटः, अस्मिन् काले घटः इति दिक्कालयोरपि प्रत्यक्षत्वं स्यात्, किन्त्वनुभवविरुद्धमेतत्। ईदृशस्थले सोऽयं घटः, इति प्रत्यभिज्ञात्मकं ज्ञानं भवति, किञ्चाक्रमिककारणेन क्रमिकं कार्यं न जन्यते, क्रमिककार्योत्पत्त्यर्थं कारणस्यापि क्रमिकत्वं स्वीकरणीयमेव।

कस्यापि कार्यस्योत्पत्त्यर्थमनेककारणमपेक्षितम्। यथा घटोत्पत्तौ मृत्तिकादण्डचक्रचीवरकुम्भकारमृत्तिकासंयोगादिकं विशेषकारणम्, अदृष्टेश्वरादिकमसाधारणं कारणम् कारणकूटस्य सामग्रीरूपेण ग्रहणं भवति। तथा च विषयेन्द्रियसम्प्रयोगात्मकस्य कारणस्य क्रमिकत्वम्। बाह्यसामग्र्याः क्रमिकत्वादेव कार्यस्य क्रमिकत्वमिति, परं यत्र बाह्यसामग्र्याः क्रमिकत्वं नास्ति, अपि तु युग-

१. भा० पृ० ५४४।

पत्सम्प्रयुक्तत्वन्तत्र घटपटादिविषयकानेकज्ञानस्य युगपदेवोत्पत्तिः स्यात्। समूहालम्बनात्मकं ज्ञानं नानाविषयकमेकं ज्ञानम्, किन्तु नानाविषयकं नानाज्ञानमेकदा कथमपि न भवति । यथा रूपरसगन्धस्पर्शादौ एकदा सन्निकर्षे सत्यपि चाक्षुषरासनादिनानाज्ञानं युगपन्नोत्पद्यते। अत एवेन्द्रियस्य मनसश्च क्रमिकसम्बन्धः कारणम्, अन्तरिन्द्रियनिरपेक्षज्ञानोत्पत्तावेकदैककाले एव रूपरसादिविषयकनानाज्ञानस्योत्पतित्तेरापत्तिः स्यात्, एतच्चानुभवविरुद्धम्। तस्मात् बाह्यसामग्रीभेदं विना ज्ञानभेदस्वीकारे बाह्यसामग्र्यतिरिक्तकारणस्यैव क्रमिकत्वमङ्गीकरणीयं यद्वशात्तज्जन्यकार्यस्य क्रमिकत्वमिति। बाह्यकारणाभावे आन्तरमेव कारणं स्यात्। आन्तरकारणेषु आत्मनः मानसश्च पूर्वापरकालं एकरूपेण समवस्थितत्वात् नित्यत्वात्तयोः क्रमिकत्वं न भवितुमर्हतीति अकामेनापि आत्ममनःसंयोगरूपासमवायिकारणस्यैव क्रमिकत्वं मन्तव्यम्। अत्र एकस्यैवात्ममनःसंयोगस्यानेकज्ञानपरम्परायां हेतुत्वेऽन्यज्ञानोत्पत्तिरेव न स्यात्, यद्यन्यज्ञानोत्पत्ति सामग्र्या बलवत्त्वमङ्गीक्रियते तदा प्रतिबध्यप्रतिबन्धकभावकल्पनायां गौरवं भवेत्। प्रत्येकज्ञानोत्पत्तिं प्रति आत्ममनःसंयोगस्य कारणत्वं सिद्धमेव। परम् एक एवात्ममनःसंयोगो व्यवसायस्य व्यवसायविषयकानुव्यवसायस्य च कारणं न भवितुमर्हतीति। एकस्यात्ममनःसंयोगस्य कारणत्वाभावेऽपि भिन्नस्य भिन्नस्य मनःसंयोगस्य उत्पत्तिद्वयं प्रति कारणत्वम्। तथा च द्वितीयात्ममनःसंयोगोत्पत्तिकाले प्रथममनःसंयोगस्य ध्वंसोऽङ्गीकरणीयः, प्रथममनःसंयोगस्य ध्वंसश्च कथमिव स्यात्। यतः प्रथमरूपे मनसः परिस्पन्दात्मिका क्रियोत्पद्येत, द्वितीयक्षणे विभागः, विभागश्च संयोगविरोधीति तृतीयक्षणे पूर्वसंयोगनाशः, चतुर्थक्षणे द्वितीयात्ममनःसंयोगस्योत्पत्तिः, पञ्चमक्षणे चानुव्यवसायात्मकं ज्ञानम्भवेत्, परं ज्ञानाद्यात्मधर्माणां तृतीयक्षणे विनाशो भवति। विभुद्रव्यस्य प्रत्यक्षयोग्यविशेषगुणानां स्वोत्तरवर्त्यन्यविशेषगुणनाश्यत्वनियमात्। प्रथमद्वितीयात्ममनःसंयोगमध्ये अन्यः विशेषगुणो नोत्पद्यत इति व्यवसायात्मकज्ञानस्य विनाशो न भवतीति अत व्यवसायपर्यन्तं स्थास्यतीति कल्पनाऽपि न समीचीना; यतः तत्कारणप्रत्यक्षयोग्यविशेषगुणोत्पत्त्यभावेऽपि संस्कारजनकं भवतीति संस्कार एव तन्नाशकः। तथा च ज्ञानमात्रमेव तृतीयक्षणे नाशमेति। द्वित्वस्य प्रत्यक्षपपत्त्यर्थमेव अपेक्षाबुद्धेः तृतीयक्षणपर्यन्तस्थायित्वं चतुर्थक्षणे च विनाशः। उक्तञ्चोदयनेन—

आदाविन्द्रियसन्निकर्षघटनादेकत्वसामान्यधी-
रेकत्वोभयगोचरामतिरतो द्वित्वं ततो जायते।
द्वित्वत्वप्रमितिः स्वतोऽपि परतो द्वित्वप्रमानन्तरं
द्वे द्रव्य इति धीरियं निगदिता द्वित्वोदयप्रक्रिया ॥

(लक्षणावती पृ० १०)

तस्मात् तृतीयक्षणे ज्ञानस्य विनाश इति स्वीकरणीयमेव। व्यवसायस्य ज्ञानस्य तृतीयक्षणे विनाशः। अत एव पञ्चमक्षणेऽनुव्यवसायोत्पत्तिकाले व्यवसायज्ञानं तस्य विषयो न भवितुमर्हति। लौकिकप्रत्यक्षात्मकव्यवसायविषयकानुव्यवसायोत्पत्तिक्षणे तत्पूर्वक्षणे च विषयस्यास्तित्वमावश्यकम्। प्रत्यक्षविषये इन्द्रियसम्बद्धस्य वर्तमानत्वमावश्यकम्। तथा चानुव्यवसायोत्पत्तिरेव न सम्भाव्यते, इति अनुव्यवसायेन व्यवसायप्रकाशो न सम्भवति। विषयस्य ज्ञानस्य चाप्रकाशत्वे जगदान्ध्यप्रसङ्गो भवेत्। अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति। अतः ज्ञानस्य स्वतोऽवभासमानत्वमकामेनापि स्वीकरणीयिति शम्।

•

विज्ञानभिक्षोर्व्यक्तित्वं तत्सिद्धान्तश्च

आचार्यकेदारनाथत्रिपाठी

भू० पू० दर्शनविभागाध्यक्षः, काशीहिन्दूविश्वविद्यालयस्य

तत्रभवान् सांख्ययोगवेदान्तेषु ख्याताभिधान आचार्यो यतिकुलमणिर्विज्ञानभिक्षुः कदा कं भागं भारतभुवोऽलञ्चकार, काश्च तस्य कृतयः, तदीयः सिद्धान्तश्च क इति तावदिह विचारयामः। सोऽयमाचार्यः ख्रीस्तषोडशशताब्दया अन्तिमे भागेऽभूदिति सम्भावयन्ति नैके मनीषिणः। तस्य प्रादुर्भाव उत्तरभारतस्य कस्मिंश्चिद्भागेऽभूत्। सांख्यसारे स विष्णुं नमस्यन् दृश्यते। अतः स सांख्यमतं श्रद्दधानोऽपीश्वरपरायणो विष्णुभक्त आसीत्। विष्णुं प्रति तस्मिन्नात्मनिवेदनस्य समर्पण-बुद्धया निष्कामकर्मयोगस्य च भावः स्फुटं लक्षितो भवति। सांख्यप्रवचनभाष्यभूमिकायां निरीश्वर-सांख्यसम्बन्धे यत्तेन स्वीयमभिमतं प्रकटितं ततस्तस्येश्वरपरायणता प्रतीयते।

यद्यपि विज्ञानभिक्षुर्ब्रह्मसूत्रभाष्यकारेष्वत्याधुनिक आसीत् तथापि तस्य जन्मस्थानजन्म-कालयोः पितुर्मातुर्वा नामोल्लेखो न क्वाप्युपलभ्यते। स्वयमपि तेन स्वस्थानकालादिसम्बन्धे न किञ्चिन्निर्दिष्टम्। एवं सत्यपि तस्य विशालग्रन्थराशिमाधृत्य तद्व्यक्तित्वविषये कश्चिदाभासः शक्यते-ऽधिगन्तुम्। कतिपयविद्वांसो जनश्रुत्या तं गौडदेशवास्तव्यमाचक्षते, कतिपये चोत्तरभारते तस्य क्वचिच्चिन्निवास इति प्रतिपादयन्ति। आचार्यान्तरवन्न तस्य किमपि स्मारकमुपलभ्यते, नापि तन्नाम्ना कश्चित् संप्रदायो मठादिकं वाऽस्ति। प्रचलितेषु सम्प्रदायेषु कस्मिंश्चिदपि श्रद्धाऽभावात् प्रत्युत तीक्ष्ण-शब्दैस्तत्खण्डनात्, जनमानसावर्जकसम्प्रदायविशेषाप्रवर्तनाच्च तदीयमतं प्रति सामान्यजनतायां नितरामौदासीन्यमासीत्। सामान्यजनवर्गौदासीन्यमाकलयन्नेव विज्ञानभिक्षुः स्वमताभिमुखं जनान् बलादवर्जयितुमिव द्वित्रां श्रुतिं स्मृतिं चोदाहरन्नपि "इति श्रुतिशतेभ्यः सहस्रेभ्यः" इत्येवमुल्लिखति। जनस्य विपरीतां धारामालोक्यैव च "तस्मादाग्रहं परित्यज्य" इत्यादिशब्दैः विपरीतमताग्रहपरित्या-गाय प्रेरयति स्म।

विज्ञानभिक्षुं प्रति जनवर्गेषु पूर्णश्रद्धाऽभावस्य तदीयसिद्धान्तं प्रति समादरभावस्य चाभावे तत्प्रवर्तितस्य कस्यचित् सम्प्रदायस्य तत्सम्बन्धिमठमन्दिरादिनिर्माणोत्साहस्याभावे च किं निमित्त-मिति गवेषयद्भिरपि किमपि निश्चितं निमित्तं नासाद्यते। केचित्तु प्रतिपादयन्ति, यन्निम्बार्क-चैतन्य-महाप्रभुप्रभृतिवद् हृदयावर्जकरसप्लुतभक्तिधाराया अपरिग्रहाद् रामानुजाचार्यवत् चतुर्विधमोक्षात्मक-दिव्यानुभूतिसमन्विताया जीवगतेर्व्यापकसन्देशाभावाच्च तदानीन्तने भक्तियुगे विज्ञानभिक्षुस्तदीय-सिद्धान्तश्च जनप्रियौ नाभूताम्। यद्यपि सांख्ये योगे वेदान्ते च तस्य वैदुष्यमप्रतिहतमासीत्, योगे चमत्कारविशेषानप्रदर्शयन्नपि स योगविद्यायामप्रतिम आसीदित्यस्ति प्रसिद्धिः। अतिस्वतन्त्र-प्रकृतितया राजाश्रयोऽपि कश्चित्तस्य न प्राप्त आसीत्। एतान्येव कारणानि प्रतीयन्ते लघोरपि तदीय-स्मारकस्येदानीमनुपलब्धेः।

विज्ञानभिक्षोर्व्यक्तित्वपरिचायकस्य प्रमाणविशेषस्याभावे इदमपि कारणं सम्भावयन्ति यदयमेको महान् त्यागी महात्माऽऽसीत् । अत एवायं सर्वविधनिजप्रचारणाद् विमुखः समपद्यत । पितुर्मातुर्गुरोर्वा कस्यापि निर्देशं नाकरोत् । किं बहुना, स्वनामापि क्वचिन्नोदलिखत् । अत एव क्वचिद् विज्ञानभिक्षुरिति, क्वचिद् विज्ञानयतिरिति, क्वचिद् यतीन्द्रविज्ञान इति, क्वचिद् विज्ञानभिक्षुक इति, क्वचिच्च विज्ञानार्क इति नामभिर्निदिश्यते । विज्ञानभिक्षुरित्यप्यस्य प्रतीकमात्रं प्रतीयते । अत एव स्वशिष्यानपि विज्ञापनकार्येभ्यो विरतान् विहितवान् भवेदिति सम्भाव्यते । अत एवास्य ग्रन्थराशिमतिरिच्य कापि नैतिहासिकी सामग्री वरीवर्तीति । विचारोऽयं बहूनां विदुषां सम्मत इति नात्रास्ति संशीतेरवकाशः ।

इदमपि संभवति यदयमात्मानं निजाधुनिकताप्रसिद्धेर्मुक्तं वाञ्छति स्म । तथा प्राचीनाचार्येष्वात्मानमपि सम्मेलयितुकामो भवेद्, यथा च तदीयं मतमर्वाचीनमिति कृत्वोपेक्षितं मा भूदिति । अत एव स्वभाष्ये स्थाने स्थाने भगवत्पादं श्रीशङ्कराचार्यमत्याधुनिकं ब्रुवन्नवगणयति तम् । अन्यथैवंविधस्य वैदिकसंस्कृतिसंरक्षकस्य भारतदेशान्नास्तिक्यनिराकरणैकबद्धपरिकरस्याचार्यस्य कृते "आधुनिक इति, वेदान्तिब्रुव इति प्रच्छन्नबौद्ध" इत्याद्यवज्ञासूचकान् शब्दान् न प्रयुञ्जीत । न हि कस्यचिन्महापुरुषस्याधुनिकत्वेन तदीयसिद्धान्तेऽप्याधुनिकत्वमारोपयितुमर्हम्, यावता श्रुतिस्मृतीतिहासपुराणाभ्युपगतः स स्यात्, जगति सर्वाधिकादरभावेन संस्तुतश्च स्यात् । स्वयमाधुनिकोऽपि सन् कश्चित् परमाधुनिकत्वेनैवाधिक्षिपेत्, तदाऽसौ कथं नात्मानमेवाधिक्षिपतीति न विद्मः ।

एवं सत्यपि तदीयदेशकालयोर्निर्धारणाय सयत्ना अभूवन् देशविदेशेषु विद्वांसः । तथाहि— विज्ञानभिक्षुः स्वग्रन्थेषु प्रयागस्य त्रिवेण्याश्चोल्लेखं करोति । यथा—"स्यादेवं प्रयागादौ ब्रह्मादीनां यागादिश्रवणात्" (ब्र० सू० वि० भाष्यम्, पृ० २२१), "स्वर्गिणां भारतवर्षमागत्य .... प्रयागादौ" (यो० वा० पृ० १६३)","निरीश्वरवादे तु त्रिवेणीवदन्योन्याविभक्ततया"(सां० प्र० भा० पृ० ३४) इत्यादि । अनेन प्रयागत्रिवेण्योर्बहुधोल्लेखेन प्रतीयते यत् प्रयागो विज्ञानभिक्षोर्जन्मभूमिर्निवासभूमिर्वाऽवश्यमासीदिति । ग्रन्थप्रणयनादिकार्यं प्रयाग एव कृतवान् भवेदित्यपि ततः सम्भाव्यते । विज्ञानभिक्षुः संन्यासी आसीत्, संन्यासकाल एव च तेन ग्रन्था लिखिता इति तदीयग्रन्थान्तपुष्पिकातः प्रमाणितं भवति, तत्र 'यति-यतीन्द्र-यतिप्रवर' इत्यादिशब्दप्रयोगदर्शनात् । अतः सम्भाव्यते यत् स प्रयागस्थ एव भवेत् । अथवा स्थानान्तरादागत्य प्रयागे कृतनिवासो भवेत्, प्रयागस्तेन साधनक्षेत्रतया स्वीकृतो वा भवेदिति ।

ग्रन्थेषु कतिपयानां हिन्दीप्रभावितानां संस्कृतशब्दानां प्रयोगेणापि प्रतीयते यदमुष्य जन्मभूमिरुत्तरभारतस्य कश्चिद् हिन्दीप्रदेश आसीत्, विहारो वा, उत्तरप्रदेशो वा, मध्यप्रदेशो वेति । यथा- घोटकः—विलम्बसिद्धिः—मिलनम्-तुल्यायव्ययत्वम्-नारायणोऽयं भासते—रात्रिदिनम्-मुखलग्नां मसीमिव-धानस्थतण्डुलस्य चावघातेन इत्यादयः शब्दा व्यवहाराश्च प्रायो हिन्दीप्रदेशेषु प्रयुज्यन्ते । सूर्यार्थे नारायणशब्दव्यवहार इह प्रदेशे दृश्यते । धानशब्दप्रयोगोऽपीहत्य एवास्ति । द्रष्टव्यम्—यो० वा० पृ० १११, ३४३, ३८१ तथा सां० प्र० भा० पृ० २, ५९) ।

अस्य प्रियशिष्यो भावागणेशः काशीनिवासी आसीत् । अतोऽप्यस्याचार्यस्यैतत्प्रदेशस्थत्वमास्थीयते । अस्य विचरणस्थलं तु दक्षिणभारतं, राजस्थानमुत्तरप्रदेशस्य पश्चिमभागो बङ्ग-

प्रदेस्योत्तरभागश्चासीदिति नीलगिरि—(यो० वा० पृ० ३४१), स्वाम्यर्थमुष्ट्रकुङ्कुमवहनवत्—(सां० प्र० भा० पृ० १०८), पनसाम्रदाडिमादिः (यो० वा० पृ० १९८) इत्यादिशब्दप्रयोगादुन्नीयते ।

अस्य जन्मभूमिर्नगरमेव किमप्यासीदिति तदीयवाक्यसंकेतैः प्रतियन्ति विद्वान्सः । यथा—'देशो जन्मभूमिर्नगरादिः' (यो० वा० पृ० ३३३) 'उत्तरोत्तरभूम्यारोहो राजमार्गः, योगाभ्यासो राजमार्गः' (यो० सा० सं० पृ० १६-४०) ''वासस्ते मलिनं राजकुलं मा गाः' (ब्र० सू० वि० भा० पृ. २४९, ५०५) इति । प्रायो हि राजमार्गो नगरेण सम्बद्धो भवत्येव । तच्च नगरं प्रयाग एव भवेदिति प्रयागत्रिवेण्यौ प्रति तन्निष्ठादर्शनात् प्रतीयते । एवं योगवार्तिके मङ्गलश्लोकतया ''भूदेवैर-मृतम्'' इत्युल्लेखाद् ब्राह्मणकुलोत्पन्नत्वमपि तस्य सम्भाव्यते ।

यद्यपि विज्ञानभिक्षोरात्मगोपनप्रवृत्त्या देशवत् तदीयसमयोऽपि दुर्निर्धारण एवास्ति, तथापि भारतीयवाङ्मयस्येतिहासवेत्तारस्तं सामान्यतः षोडश्यां शताब्द्यां वर्तमानमाचार्यं मन्यन्ते । तेषु प्रो० ए० बी० कीथ, डा० एफ० ई० हाल, डा० रिचर्डगार्वे, प्रो० विन्टरनिट्ज, डा० एस० एन० दासगुप्त, डा० एस० राधाकृष्णन् महोदयाः प्रमुखाः सन्ति । [द्रष्टव्यम्—'सांख्य-सिस्टम' (कीथ) पृ० ११४ तथा 'हिस्ट्री आप संस्कृत लिटरेचर' पृ० ४८९ 'प्रीफेस टु दी सांख्य-सार' (हाल) पृ० ३७, 'प्रीफेस टु दी सांख्यसूत्रवृत्ति' (गार्वे) पृ० ८, 'इन्डियन लिटरेचर' (विन्टर-निट्ज) पृ० ४५७, 'हिस्ट्री आफ इण्डियन फिलासफी' (दासगुप्त) भाग १ पृ० २१२, २२१, 'इन्डियन फिलासफी' (राधाकृष्णन्) भाग २] पर्याप्तसामग्र्यभावात् यद्यप्येभिर्विद्वद्भिर्नोपयुक्तास्तर्काः समुप-स्थापितास्तथापि क्वचिद् विरोधाभावात् ऐशवीया षोडशशताब्दी तस्य कालोऽभ्युपगतः ।

डा० पी० के गोडेमहोदयस्तु विज्ञानभिक्षुकालनिर्णयाय नूतनं तर्कमुद्भावयति यत्—विज्ञान-भिक्षुशिष्येण भावागणेशेन हस्ताक्षरितमेकं निर्णयपत्रं १५८३ ई० वर्षीयं समधिगतम् । एतदाधारेण तस्य समयः षोडशी शताब्दी निश्चेतुं शक्यते । निर्णयपत्रमेतद् वाराणस्यां मुक्तिमण्डपे लेखबद्धं कृतमासीत् । अस्य निर्णयपत्रस्य समयः १५०५ तमं शकवर्षं तथा १५८३ तमं ख्रीस्तवर्षमस्ति । तात्कालिकस्य वाराणसेयब्राह्मणवर्गस्य प्रमुखजनानां सम्मतयो हस्ताक्षराणि च तत्र पत्रे वर्तन्ते । तत्र भावागणेशकृतलेखस्येदं स्वरूपमस्ति—''तत्र सम्मतिः—भावागणेशदीक्षित चिपोलणे'' इति । (द्रष्टव्यम्—चिट्लेभाट्टप्रकरणम् पृ० ७६, आर० एस० चिम्पुटकर, बाम्बे १९२६, तथा अड्यार लाइब्रेरी-बुलेटिन, फरवरी १९४४, लेखः पी० के० गोडे) डा० गोडेमहोदयस्य तर्केणापि भावागणेश-गुरोर्विज्ञानभिक्षोः समयः ख्रीस्तस्य षोडशशताब्द्येव सिध्यति । अयं च समयो बहूनां विद्वज्जनानां सम्मततया स्वीकरणीय इति समुचितं मन्ये ।

अत्रोदयवीरशास्त्रिणोऽपि विचारः प्रदीयते । तन्मतेन भावागणेश-भावयेगणेशदीक्षित इति परस्परं भिन्नौ जनौ स्तः । तत्र कारणद्वयमुपस्थापयति शास्त्रिमहोदयः । प्रथमं कारणम्—भावापदाद् भावयेपदं भिन्नमस्ति । द्वितीयं करणम्—भावागणेशः क्वचिदप्यात्मानं दीक्षितोपाधिना नोल्लिखतीति । तस्माद् भावयेगणेशदीक्षितेन हस्ताक्षरितं पूर्वोक्तं निर्णयपत्रं न भावागणेश-हस्ताक्षरितं मन्तुमर्हम् । अतो न १५८३ ख्रीस्ताब्दीयेनोक्तनिर्णयपत्रेण भावागणेशस्य सम्बन्धो, न वा तद्गुरोर्विज्ञानभिक्षोः कालनिर्णये तत्पत्रं प्रमाणीकर्तुं शक्यते ।

एवं, विज्ञानभिक्षुणा सांख्यप्रवचनभाष्येऽनिरुद्धवृत्तेः खण्डनं कृतम् । तथाऽद्वैतब्रह्मसिद्धि-रचयित्रा वेदान्तसारकारेण सदानन्दयतिना विज्ञानभिक्षोर्नामोल्लेखपूर्वकं तत्खण्डनं कृतम् ''यच्चात्र

सांख्यभाष्यकृता विज्ञानभिक्षुणा समाधानत्वेन प्रलपितम्" इति वचनेन (द्रष्टव्यम्—अद्वैतब्रह्मसिद्धिद्वितीयसंस्करणम्, पृ० २७, कलकत्ता ।) अतः सदानन्दयतेः पूर्ववर्ती विज्ञानभिक्षुरिति। सदानन्दयतेश्च समयः १५०० तमख्रीस्ताब्दात् किञ्चित् पूर्वमिति कीथमहाशयेन निर्णीतम्। एवं तेनाद्वैतब्रह्मसिद्धौ रामानुजमध्वाचार्ययोस्तु मतं खण्डितं किन्तु वल्लभनिम्बार्कयोर्मतं न खण्डितम्। अतः स रामानुजमध्वाचार्याभ्यां परवर्ती वल्लभनिम्बार्काभ्यां च पूर्ववर्तीति प्रत्येतव्यम्। वल्लभाचार्यश्च १४७८ ख्रीस्तवर्षे जाता इति प्रसिद्धम्। अतो वल्लभाचार्यात् पूर्ववर्ती सदानन्दस्ततोऽपि पूर्ववर्ती विज्ञानभिक्षुरिति निर्णयेन विज्ञानभिक्षुश्चतुर्दशशताब्दीतः पश्चात्कालिकः कथमपि भवितुं नार्हति। अर्थात् १३५० तमख्रीस्ताब्दस्य समीपे विज्ञानभिक्षोरवस्थितिरिति।

किन्तूदयवीरशास्त्रिण उक्तमतं खण्डयन् डा० सुरेशचन्द्रश्रीवास्तवोऽत्र स्वीयं विचारं प्रस्तौति। यथा—भावागणेशः स्वस्य स्वपितुर्वा नाम्ना सह दीक्षितपदप्रयोगं न कृतवानिति शास्त्रिकथनं न यथार्थम्, यतस्तत्त्वसमासव्याख्याने याथार्थ्यदीपने स्वपितरं श्रीविश्वनाथदीक्षित इति नामोल्लिखति। भावाभावयेशब्दयोरपि कोऽपि विशिष्टो भेदो नास्ति। भावाशब्दस्यैव परिवर्तितं रूपं भावये इत्यस्ति। तस्मात् पूर्वोक्तनिर्णयपत्रे कृतोल्लेखो "भावये" भावातो नातिरिक्तः किन्त्वभिन्न एवेति। अनिरुद्धात् परवर्ती भवन्नपि विज्ञानभिक्षुः सदानन्दात् पूर्ववर्ती आसीदिति सत्यम्, किन्तु सदानन्दसमयः शास्त्रिमहोदयानुसारेण १५०० तमख्रीस्तवर्षात् पूर्वमस्तीति न स्वीकर्तुमुचितम्। यतः सदानन्दयतिः रघुनाथशिरोमणेरतिपश्चाद्वर्ती अभूत्। तस्मात् सदानन्दयतेः समयः सप्तदशशताब्दी अस्तीति। एभिराधारभूतप्रमाणैर्विज्ञानभिक्षुसमयस्यान्तिमोऽवधिः १६०० ई० वर्षमस्ति। अयमेव च समयः सर्वैः पौर्वात्यपाश्चात्यविद्वद्भिः स्वीकृतः।

एवं विज्ञानभिक्षुरकबरनृपतिसमानकालिक आसीदिति सांख्यसारस्य ४७ तमपृष्ठवचनात् सांख्यप्रवचनभाष्यस्य च ९१, ९२, १४७ तमपृष्ठवचनेभ्यश्च विज्ञायते। अतः १५२५ तम १६०० तम ख्रीस्ताब्दयोर्मध्यो विज्ञानभिक्षोः समय इति। [द्रष्टव्यम्—आचार्यज्ञानभिक्षु और भारतीय दर्शन में उनका स्थान "लेखकः–डा० सुरेशचन्द्र श्रीवास्तव इलाहाबाद]। इत्थञ्च बहुविद्वत्संवादाद् विज्ञानभिक्षोः समयः षोडशशताब्दी स्वीकर्तुमुचितेति।

विज्ञनभिक्षोः कृतिषु सांख्यसारः, योगसारः, सांख्यप्रवचनभाष्यम्, योगवार्तिकम्, ब्रह्मसूत्रविज्ञानामृतभाष्यमिति मुख्याः कृतयः सन्ति। एताः सर्वाः कृतयो निकामं प्रौढिमापन्नाः सांख्ययोगवेदान्तदर्शनान्याधृत्य वर्तन्ते। एताभिः कृतिभिरेषु दर्शनेष्वस्याचार्यस्याप्रतिहतं पाण्डित्यं दृष्टिगोचरीभवति। योगदर्शने तु प्रायः सर्वव्याख्यातॄनतिशेत इति विदुषां निष्पक्षपाता मान्यता प्रसिद्धा। इतरेऽप्येकादशवेदान्तग्रन्था अप्रकाशिता एव सन्ति। ते च—ईश्वरगीताभाष्यम्, कठवल्ल्युपनिषदालोकः, कैवल्योपनिषदालोकः, मैत्रेय्युपनिषदालोकः, माण्डूक्योपनिषदालोकः, मुण्डकोपनिषदालोकः, प्रश्नोपनिषदालोकः, तैत्तिरीयोपनिषदालोकः, श्वेताश्वतरोपनिषदालोकः, (एते वेदान्तालोकनाम्नाऽप्यभिधीयन्ते), ब्रह्मादर्शः, उपदेशरत्नमाला चेति। एतेऽमुद्रिता ग्रन्थाः पाण्डुलिपिरूपेण प्राप्यन्त इत्युदलेखि डा० सुरेशचन्द्रश्रीवास्तवेन तदीये प्रकाशिते शोधप्रबन्धग्रन्थे।

सिद्धान्तः—

सर्वाणि दर्शनानि परस्परं विरुन्धानान्यपि स्वरूपतः समन्वयात्मकान्येव भवन्ति। अत एव विभिन्नार्थकत्वेन प्रतीयमानानां श्रुतीनां समन्वयमेव कर्तुं तानि यतन्ते, नाल्पमपि श्रुतिविरोधं सहन्ते।

वैदिकानि ह्यास्तिकदर्शनानि श्रुतीर्विरुध्य कथं नाम प्रवर्तेरन्। वेदान्ते तु समन्वयाध्याय एव स्वतन्त्रोऽस्ति। किन्तु प्रत्येकदर्शनानां श्रुतिसमन्वयपद्धतयो विभिन्नाः सन्ति। अतः पद्धतिभेदादेव दर्शनानि परस्परं विभिद्यन्ते। अत एव च श्रुतिसमन्वयात्मकानां सतामपि भिद्यमानानां दर्शनानां परस्परं समन्वयोऽशक्य एवास्ति। तथापि नैके समन्वयवादिनो दर्शनव्याख्यातारः स्वतन्त्रविचारकाश्च दर्शनानामपि परस्परं समन्वयार्थमयतिषत। तेष्वेव विज्ञानभिक्षोर्महत्त्वपूर्णं स्थानमस्ति। अत एव स ब्रह्मसूत्राणि व्याचक्षाणोऽपि सर्वथैव दर्शनान्तरैर्विशेषतश्च सांख्ययोगाभ्यां तेषामविरोधाय भगीरथप्रयासं व्यदधात्। तद्दृष्ट्यैव च वेदान्तसूत्राणि व्याचख्यौ स्वसिद्धान्तञ्च व्यवस्थापयामास। तथा चायं तदीयो वेदान्तसिद्धान्तः—

प्रकृतिपुरुषातिरिक्तत्वेन ब्रह्मणोऽस्तित्वमस्ति। प्रकृतिपुरुषौ ब्रह्मणोऽन्तर्लीनशक्तिरूपौ स्तः। तथा च विज्ञानामृतभाष्ये प्रतिपादितम्—"परमेश्वरादन्तर्लीनप्रकृतिपुरुषाद्यखिलशक्तिकात्" इति [वि० भा० पृ० ३२]। उक्त भाष्यवाक्ये आदिपदात् कालोऽदृष्टादयश्च ग्राह्याः सन्ति। ते च ब्रह्मणोऽव्यक्तशक्तिरूपाः सन्ति। ब्रह्मास्तित्वे तु आगमत्वेन श्रुतिस्मृतयः, प्रत्यक्षत्वेन योगिप्रत्यक्षं तथाऽनुमानमिति प्रमाणत्रयमपि साधकमस्ति।

योगिप्रत्यक्षस्य ब्रह्मणि प्रमाणत्वे "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यादिश्रुतिर्मानम्। ब्रह्म यद्यप्यतीन्द्रियं तथापि योगिप्रत्यक्षविषयत्वं तस्मिन्नस्त्येव। अचिन्त्या हि योगजधर्मस्य शक्तिरस्तीति। कदाचिच्च संशयदशायामनुमानमपि प्रमाणत्वेनोपन्यसनीयं भवतीति निर्दिष्टम् "उपपत्तेश्चे" त्यादि ब्रह्मसूत्रैः। एतन्मते ब्रह्मणि फलव्याप्यत्वमप्यस्ति, न वृत्तिव्याप्यत्वमात्रम्। फलव्याप्यत्वाभावे श्रवणादिव्यवहारजातमसंभवि स्यात्। अत एव ब्रह्म न स्वप्रकाशमपि वर्तते। स्वप्रकाशत्वे कर्मकर्तृविरोधापत्तिः स्यात्। कर्मकर्तृविरोधादेवाखण्डत्वमपि ब्रह्मणो नास्ति। एतन्मते स्वप्रकाशत्वमपि नाज्ञेयत्वरूपमस्ति, अपि तु भिन्नमेव स्वज्ञाने प्रकाशान्तरानपेक्षत्वरूपं प्रदीपादिवत्। न हि स्वप्रकाशः प्रदीपोऽज्ञेयो भवति। [द्र० ब्र० सू० वि० भा० पृ० ७०-७४]।

एतन्मते ब्रह्म चिन्मात्रमस्ति [द्र० वि० भा० पृ० १]। चैतन्यं च नात्मनो गुणः, किन्तु द्रव्यविशेष एव। धर्मधर्मिविभागशून्यत्वविवक्षया स आत्मैव चेतन इति क्वचित् चैतन्यमिति च क्वचिदुच्यते। विज्ञानभिक्षुर्ब्रह्म चिन्मात्रमभ्युपगच्छन् तस्यानन्दरूपत्वं प्रतिषेधति। अत एव ब्रह्मणि सच्चिदानन्दरूपतायाः कल्पना भ्रान्तिरेवास्ति। तदुक्तं विज्ञानामृतभाष्ये—"एतेन ब्रह्मण आनन्दरूपत्वमपास्तम्, नैकस्यानन्दचिद्रूपत्वे विरोधादिति सांख्योक्तन्यायाच्च, ज्ञानत्वं सुखत्वरूपप्रकारभेदश्च त्वयापि नेष्यते एकरसत्वश्रुतिविरोधाच्चेति" [वि० भा० पृ० ६३]।

आनन्दादयो वस्तुतः प्रधानस्य धर्माः सन्ति। स्थूलदृष्ट्युपासकेभ्यस्तु क्वचिच्छ्रुत्या प्रधानधर्मा अपि तदुपहितब्रह्मधर्मत्वेन प्रतिपादिताः। अत आनन्दो न ब्रह्मणः स्वरूपं प्रत्युत तस्यौपाधिको धर्मोऽस्ति। जीवगतानां सकलबोधानां भोगानां च साक्षितया ब्रह्म भोक्तृ भवति। जीवभोगाच्च विलक्षणो ब्रह्मभोगः। ब्रह्मपदं च पङ्कजादिपदवद् योगारूढमस्ति। अत एव जीवो हिरण्यगर्भादिर्वा न कदाचिदपि ब्रह्मपदस्य मुख्यार्थो भवितुमर्हति। यदि क्वचिद् हिरण्यगर्भादावपि ब्रह्मपदप्रयोगो दृश्यते तदा विभुत्वसर्वाधारत्वादिगुणयोगाद् गौण एव मन्तव्यः। (ब्र० सू० वि० भा० पृ० ३८)।

विज्ञानभिक्षुमते ईश्वरोऽपि विभुस्तदुपाधिर्मायाऽपि विभुः, तयोः संयोगोऽपि नित्योऽस्ति। अतः सृष्टि-स्थिति-लयपरम्परा न कदापि विच्छिद्यते। उपाधिमन्तरा चिन्मात्रे ब्रह्मणि नेच्छादिकं

संभवतीति इच्छादिकर्तृत्वान्यथानुपपत्त्या ब्रह्मोपाधेर्मायायाः सिद्धिर्भवति। सा च ब्रह्मोपाधिभूता माया ब्रह्मशक्तिभूतायाः प्रकृतेरपि भिन्नैवास्ति, यतो माया अपरिणामिनी प्रकृतिश्च परिणामिनी वर्तते। (द्र० वि० भा० पृ० १२६, १२७)।

जीवस्वरूपम्—

कर्मोपाधिकं चैतन्यं जीवोऽस्ति। स चानेकः, बन्धमोक्षव्यवस्थाया अन्यथाऽनुपपत्तेः। बन्धमोक्षव्यवस्थानुपपत्तिप्रमाणसिद्धतयाऽऽत्मनानात्वगौरवस्यैवादर्तव्यत्वात्। (द्र० वि० भा० पृ० ४२)। यदि पुनरेक एवात्मा स्यात् स चोपाधिभेदादौपाधिकं भेदं भजेत, तदापि बन्धमोक्षादिव्यवस्था नोपपद्यते, एकस्योपाधेर्नाशेऽपि उपाध्यन्तरैः सम्बन्धस्य तस्मिन् चैतन्येऽक्षुण्णत्वान्न कदापि मुक्तिः स्यात्, तदानीमप्युपाध्यन्तरसम्बन्धेन बन्धस्यानिवृत्तेः। तदुक्तम् विज्ञानामृतभाष्ये—"उपाधिभेदे सत्यपि एकस्यैवात्मनो नानोपाधियोगः स्यादतो न व्यवस्थेत्यर्थः" इति। (द्र० पृ० ४६)। न च जीवस्यानेकत्वे ब्रह्मभिन्नत्वे चाद्वैतश्रुतिविरोधः स्यादिति वाच्यम्, अद्वैतश्रुतेर्जातिपरकत्वेन चित्सामान्याद्वैतपरकत्वेन चोक्तविरोधाभावात्। वस्तुतस्तु अग्निस्फुलिङ्गवज्जीवब्रह्मणोरंशांशिभावसम्बन्धभावाद् भेदाभेद एव विज्ञानभिक्षोः सम्मतः। तथा चोक्तं भाष्ये—"तस्माद् भेदाभेदाभ्यां जीवब्रह्मणोरंशांशिभाव एव ब्रह्ममीमांसासिद्धान्तोऽवधारणीयः। (द्र० पृ० ५०)। अंशांशिनोश्च भेदाभेदौ विभागाविभागरूपौ कालभेदेनाविरुद्धौ। अन्योन्याभावश्च जीवब्रह्मणोरात्यन्तिक एव।

जीवस्यांशत्वं सजातीयत्वे सत्यविभागप्रतियोगित्वम्, तदनुयोगित्वं चांशित्वं ब्रह्मणः। (द्र० वि० भा० पृ० ५१)। स्वव्यापारे जीवोऽपि कर्ता भवति, किन्तु तत्कर्तृत्वं बुद्धिकर्तृत्वादेव, उपाधिवशात् कर्ता स्वतस्तु परमार्थतोऽकर्तेति। (द्र० वि० भा० पृ० ३५६) ईश्वरस्तु कर्तापि कारयिताऽपि भवतीति। (द्र० वि० भा० पृ० ३५८)।

प्रकृतिर्माया च—

चिन्मात्रः परमेश्वरः पुरुषप्रकृतिभ्यामन्तर्लीनशक्तिभ्यां शक्तिमानुच्यते, तथा मायोपाधिना सोपाधिरित्युच्यते। अर्थात् प्रकृतिस्तस्य परमेश्वरस्यान्तर्लीनशक्तिरूपा, माया च तस्योपाधिरूपाऽस्ति। प्रकृतिमाययोर्भेदे "प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया" इति भगवद्गीतावचनं प्रमाणम्। सांख्यवत् विज्ञानभिक्षुः प्रकृतेः स्वातन्त्र्यं न स्वीकरोति "दृष्टान्ताच्च प्रधान न स्वतन्त्रम्" (द्रष्टव्यम्—वि० भा० पृ० २४५, ३०१)। न वा श्रीशङ्कराचार्यवत् प्रकृतिं मायाऽविद्याऽपरपर्यायामनिर्वचनीयां मन्यते। यद्यपि प्रकृतिरेव जगदुपादानं तथापि प्रकृतेर्ब्रह्मान्तर्लीनशक्तिभूततया ब्रह्मैव वस्तुतः सृष्ट्युपादानमस्ति। ब्रह्मणो जगत्कर्तृत्वं स्वोपाधिमायोपाधिकं परिणामित्वरूपोपादानत्वञ्च प्रकृतितत्कार्याद्यौपाधिकमपीष्यत एव। [वि० भा० पृ० ३४]।

जीवोपाधिभूताऽविद्या, परमेश्वरोपाधिभूता माया, सैव कारणसत्त्वमित्युच्यते। अविद्याया जगत्कारणत्वे एकजीवाऽविद्यानाशे जगत्कारणनाशात् समस्तप्रपञ्चनाशापत्तिः स्यात्।

सृष्टिप्रक्रियाविषये विज्ञानभिक्षुणा पञ्चीकरणप्रक्रिया निराकृता स्वीकृता च त्रिवृत्प्रक्रिया। इयं हि तदीया प्रक्रिया—मायोपहितब्रह्माधिष्ठिताया ब्रह्मान्तर्लीनायास्तदीयशक्तिभूतायाः प्रकृतेः प्रथमं प्राणवृत्त्यात्मकक्रियाशक्तिविशिष्टस्याध्यवसायशक्तिविशिष्टस्य च महत्तत्त्वस्योत्पत्तिर्भवति। महतोऽहङ्कारो जायते। अहङ्कारान्मनःसहितानां सर्वेन्द्रियाणामिव परस्परकार्यकारणभावाना-

पन्नानां पञ्चतन्मात्राणामुत्पत्तिर्भवति। तन्मात्राणि च सूक्ष्मतमभूतान्युच्यन्ते। तन्मात्रेभ्यश्च स्थूलमहाभूतानां हेतुभूताः सूक्ष्मपरमाणव उत्पद्यन्ते। एते च सूक्ष्मभूतनाम्नाऽऽख्यायन्ते। तदनन्तरमाकाशादि क्रमेण महाभूतान्युत्पद्यन्ते। तत एव च त्रिवृत्करणप्रक्रियया ब्रह्माण्डादिसृष्ट्युत्पत्तिर्भवतीति। [द्र० वि० भा० पृ० ४०१, ४०२, ४०९]।

सृष्टिप्रयोजकः प्रकृतिपुरुषसंयोगः ईश्वरकृत इति विज्ञानभिक्षुर्मन्यते। मतमिदं सांख्याचार्यमताद् विपरीतम्। सांख्यनये हि यथाऽयस्कान्तेन लोहं प्रचलति तथा पुरुषार्थप्रयुक्ता प्रकृतिः स्वयमेव पुरुषेण संयुज्यते। [वि० भा० पृ० ३४]।

सृष्टिकाले सर्वः प्रपञ्चो ब्रह्मणो विभक्ततया स्थितो भवति, प्रलयकाले च तस्मिन्नविभक्ततयाऽव्यक्तरूपेणावतिष्ठते। प्रलयदशायां विकारजातं प्रकृतौ अव्यक्ततयाऽवतिष्ठते, प्रकृतिपुरुषौ च ब्रह्मणि सुषुप्तवन्निर्व्यापारतयाऽवतिष्ठेते। (वि० भा० पृ० ९६)। मतेऽस्मिन् ब्रह्म कूटस्थनित्यं जगत्प्रपञ्चश्च शाश्वतिकोऽपि न कूटस्थनित्यो न वा गन्धर्वनगरादिवत् प्रातिभासिकः किन्तु परिणामिनित्यः। (वि० भा० पृ० १०२)। जगत्प्रपञ्चस्य ब्रह्मान्तर्लीनशक्तेः प्रकृतेः परिणामरूपत्वस्वीकारादस्मिन् मते परिणामवादः स्वीकृतः। अतो ब्रह्मणः साक्षात्परिणामवादोऽपि नास्ति विवर्तवादोऽपि नास्तीति प्रकृतिपरिणामवादोऽस्य वादः।

आचार्यविज्ञानभिक्षुणा प्रवर्तितो वादो भर्तृप्रपञ्च-भास्कराचार्य-निम्बार्काचायार्णां वादैः किञ्चित् साम्यं भजमानोऽपि वस्तुतस्तैर्भिद्यमानो भेदाभेदनाम्ना प्रसिद्धः। तदुक्तं तेन भाष्ये— "तस्माद् भेदाभेदाभ्यां जीवब्रह्मणोरंशांशिभाव एव ब्रह्ममीमांसासिद्धान्तोऽवधारणीयः", तथा— "तस्मात् सिद्धौ जीवेश्वरयोरंशांशिभावेन भेदाभेदौ विभागाविभागरूपौ। तत्राप्यविभाग एवाद्यन्तयोरनुगतत्वात् स्वाभाविकत्वान्नित्यत्वाच्च सत्यः, विभागस्तु मध्ये स्वल्पावच्छेदेन नैमित्तिको विकारान्तरवद् वाचारम्भणमिति विशेषः। तदेवमात्माद्वैतं व्याख्यातम्" इति। (द्र० वि० भा० पृ० ५०, ६१)

मुक्तिः—

महदादिष्वव्यक्तलीनेषु सत्सु पुरुषस्य कैवल्याख्यो मोक्षो जायते। विकारविलयद्वारा चिन्मात्ररूपेण पुरुषस्यावस्थानमेव मोक्षः। सञ्चितकर्मणां सम्यग्ज्ञानेन नाशो जायते इत्यत्र सर्वैराचार्यैः साकं साम्यमेवाचार्यविज्ञानभिक्षोः। प्रारब्धकर्मणां तु ज्ञानेन न नाशः, किन्तु जीवन्मुक्तरूपेण सामान्यतो भोगद्वारा। असंप्रज्ञातयोगविधिना तु सद्य एव भोगेन सर्वाणि प्रारब्धकर्माणि क्षपयित्वा, भोगमन्तरैव वा प्रारब्धमप्यतिक्रम्य सद्योमुक्तिर्भवतीति विज्ञानभिक्षुमते विशेषः। इत्थं स मुक्तेः प्रकारद्वयं मन्यते—सद्योमुक्तिः क्रमिकमुक्तिश्चेति। तदुक्तम्—"इति विस्तरेण विद्याफलं मोक्षद्वयमैहिकक्रममुक्तिरूपं विचारणीयम्" इति। (वि० भा० पृ० ५६४)। ऐहिकमुक्तौ "न तस्य प्राणा उत्क्रामन्ति, इहैव समवलीयन्ते" इति श्रुतिः प्रमाणम्। ऐहिकीं मुक्तिमेव स परममुक्तिं मन्यते।

यो हि साधकः कार्यब्रह्मोपासनं कुर्वाणस्तन्निष्ठो भवति, सोऽर्चिरादिमार्गेण सावरणमितो गच्छन् कारणब्रह्मणि मिलितो हिरण्यगर्भादिकमपीशानः परमेश्वरेच्छया तदीयलीलावतारभावमनुभूय क्रमेण तत्रैव स्वेच्छया मुक्तिं लभते। अथवा कार्यब्रह्मलोकं प्राप्य द्विपरार्धान्तं यावत् तत्रैव लोके ब्रह्मविष्णुरुद्रादिभिः सह भोगान् भुञ्जान एव परिपक्वज्ञानस्तैः सहैव क्रमिकमुक्तिमधिगच्छति।

विज्ञानभिक्षुरपि ज्ञानमेव प्रामुख्येन मुक्तिसाधनमङ्गीकरोति, तथापि तत्त्वज्ञानानन्तरमसम्प्रज्ञातसमाधिसिद्धौ तु झटिति मोक्षप्राप्तिभर्वतीति स मन्यते। एवं ज्ञानमपि किमपि द्वारमन्तरा कर्मनिवृत्तिं मोक्षप्राप्तिं वा न करोति, किन्तु तत्त्वज्ञानान्मिथ्याज्ञाननिवृत्तिरपूर्वोत्पत्तिश्च भवति। अपूर्वोत्पत्तिद्वारा तत्त्वज्ञानजन्य परवैराग्यद्वारा च मोक्षलाभो भवतीति। (वि० भा० पृ० ४८७)।

एतन्मतानुसारेण ब्रह्मतत्त्वज्ञानवज्जीवतत्त्वज्ञानमपि मुक्तिसाधनं भवति, तथापि मुक्तिं प्रति ब्रह्मतत्त्वज्ञानं मुख्यकल्पत्वेन जीवतत्त्वज्ञानं चाधमकल्पत्वेन स्वीकरोत्याचार्यविज्ञानभिक्षुः। (वि०भा० पृ० ५११)।

मुक्तिप्राप्तौ केवलं ज्ञानं, ज्ञानकर्मसमुच्चयो वा प्रयोजको, ज्ञानपूर्वकं कर्म वा प्रयोजकमित्यत्रापि विज्ञानभिक्षुः समन्वयदृष्ट्या अधिकारिणामवस्थाभेदेन पक्षत्रयमपि समनुगमयति। यथायोगमारुरुक्षुर्युञ्जानो योगारूढश्चेति त्रिविधाधिकारिणो भवन्ति। तत्रारुरुक्षववस्थायां कर्मैव मुख्यं तत्त्वज्ञानञ्च तदङ्गभूतम्। युञ्जानावस्थायां च ज्ञानकर्मसमुच्चयो मुक्तिसिद्ध्युपयोगितां दधाति। योगारूढावस्थायान्तु ज्ञानमेव प्रधानरूपेण मुक्तिहेतुर्भवतीति। (वि० भा० पृ० ५२८, ५२९)। वस्तुतस्तु विज्ञानभिक्षुरपि पक्षत्रयमध्ये तृतीयसाधनस्य तत्त्वज्ञानस्यैव प्रधानसाधनत्वमभिप्रैतीत्यत्र तदीयवचनान्येव प्रमाणमिति (वि० भा० पृ० ४९८, ५१४, ५४३,) संक्षेपः।

●

"अट्कुप्वाङ्नुम्व्यवायेऽपि" अत्र सूत्रे नियमविषयको विचारः

[१९८४ वर्षीयस्मारिकापत्रिकायामोझामहोदयेन प्रकाशितनिबन्धीयनियमविषयकं विचारमुद्दिश्यायं विचारः]

आचार्यरामप्रसादत्रिपाठी

वेदवेदाङ्गसंकायाध्यक्षचरः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

'रषाभ्यां नो णः समानपदे' इति सूत्रे "ऋवर्णान्नस्य णत्वं वाच्यम्" इति वार्तिकस्य प्रत्याख्यानाय व्यवायेऽपि इति योगं विभज्य अट्कुप्वाङ्नुमित्यंशो नियमार्थतया स्वीकृतो भगवता भाष्यकृता। नियमस्वरूपं च दर्शितम्—'एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नाऽन्यैः, इति। अत्र नियमस्वरूपं परिष्कृतं कीदृशमिति विचार्यते—

अत्र "सिद्धे सति आरभ्यमाणो विधिर्नियमाय कल्पते" इत्यभियुक्तोक्त्या 'व्यवायेऽपि' इति विभक्तेन प्रथमेन योगेन णत्वप्राप्तौ अट्कुप्वाङ्नुमिति द्वितीयो योगो नियमार्थः, तेन "आदर्शेन" इत्यत्र णत्वं वारितं शेखरकृता। तथा हि व्यवायेऽपि इति प्रथमे योगे रषाभ्यामिति सम्पूर्णं सूत्रमनुवर्त्य "रेफषकारान्यतरोत्तरस्य व्यवहितस्यापि समानपदघटकस्य नकारस्य णकारो भवति, इत्यर्थस्तस्य करिष्यते। ततः अट्कुप्वाङ्नुमिति द्वितीये योगे तृतीयया विपरिणामः, रषाभ्यामित्यस्य व्यवायेऽपि इत्यस्य च पूर्वसूत्रस्य अनुवृत्तिः करिष्यते। ततश्च रेफषकारान्यतरोत्तरस्याडादिकर्तृकव्यवायविशिष्टस्य समानपदघटकस्य नकारस्य णत्वं भवतु, इत्यर्थः सम्पद्यते। एवं च 'व्यवायेऽपि' इति पूर्वयोगेनैवाडादिव्यवाये तदन्यव्यवाये वा सर्वत्र णत्वसिद्धौ अयं द्वितीयो योगो व्यर्थः सन् नियमार्थो भवति। तत्र यदि अयं योगः स्वातिरिक्तत्वेन प्रथमयोगे संकोचं कुर्यात्—अर्थात् अडाडिव्यवायातिरिक्तव्यवाये भवता णत्वं क्रियेत, अडादिव्यवाये मया प्रवर्तितव्यमिति वदेत्, तदा तु स्नुषाश्वश्रून्यायप्रसङ्गः स्यादतश्च स्वीयोद्देश्यतावच्छेदकावच्छिन्नसजातीयविषयातिरिक्तत्वेन संकोचः कर्त्तव्यः। यथा कृत्तद्धितेति सूत्रे समासग्रहणं नियामकम्। तच्च यदि स्वातिरिक्तत्वेनार्थवत्सूत्रीयोद्देश्येऽर्थवत्त्वावच्छिन्ने संकोचं कुर्यात्, अर्थात् समासातिरिक्तस्यार्थवतस्त्वया प्रातिपदिकसंज्ञा विधेया, समासस्य तु मया करिष्यते। हन्त! र्तहि समासस्यापि अर्थवत्सूत्रेणैव स्यात् प्रातिपदिकसंज्ञा, समासग्रहणस्य नियमार्थस्य काऽऽवश्यकता? अतश्च स्वजातीयातिरिक्तत्वेन समासग्रहणं संकोचं व्यवस्थापयिष्यति। साजात्यं च पूर्वभागपदघटितसमुदायत्वेन गृह्यते। इदमेव स्वीयोद्देश्यताऽवच्छेदकं यत्समासत्वम्, तद्व्यापकम्। एतद्रूपावच्छिन्नातिरिक्तत्वेनार्थवत्त्वाऽवच्छिन्ने संकोचः क्रियते। ननु अर्थवत्त्वमपि समासत्वव्यापकमिति तेनापि साजात्यं ग्रहीतुं शक्यते इति चेत्तर्हि तदवच्छिन्नातिरिक्तत्वेन तत्र संकोचे तत्सूत्रस्योद्देश्याप्रसिद्धया वैयर्थ्यमेवापतिष्यति। अतश्च नियम्यशास्त्रीयोद्देश्यताऽवच्छेदकस्य व्याप्यं तद्रूपं ग्राह्यम्। एवं च व्यर्थीभूतशास्त्रीयोद्देश्यताऽवच्छेदके व्यापकं च यद्रूपं, तद्रूपावच्छिन्नातिरिक्तत्वेन वैयर्थ्यप्रयोजकशास्त्रीयोद्देश्यताऽवच्छेकाऽवच्छिन्ने संकोचः क्रियते नियमशास्त्रेण। समासस्थले च समासत्वव्यापकम्, अर्थवत्त्वव्याप्यं च सिद्धान्तकौमुदीरीत्या पूर्वभागपदघटित-

समुदायत्वम्' तदवच्छिन्नातिरिक्तत्वेनार्थवत्त्वावच्छिन्ने संकोचो भवति। अतश्च पूर्वभागपदघटित-समुदायस्य चेत् प्रातिपदिकसंज्ञा, तर्हि समासस्यैव, इति विधिमुखेन प्रवृत्तिपक्षे समासशास्त्रस्यार्थो भवति। तेन वाक्यस्य प्रातिपदिकसंज्ञा न भवति। तथैव प्रकृते अट्कुप्वाङ्नुमिति नियामक-सूत्रीयोद्देश्यताऽवच्छेदकंरूपं— रेफषकारान्यतरोत्तराडादिकर्तृकव्यवायविशिष्टसमानपदघटकनकारत्वम्, तद्व्यापकं रूपम्—रेफषकरान्यतरोत्तराक्षरसमाम्नायिकवर्णकर्तृकव्यवायविशिष्टसमानपदघटकनकार-त्वम्, व्यवायेऽपि इति नियम्यसूत्रस्योद्देश्यताऽवच्छेदकं रूपम्—रेफषकारान्यतरोत्तरयत्किञ्चित्-कर्तृकव्यवायविशिष्टसमानपदघटकनकारत्वम्, तद्व्याप्यं रूपं—तदेव, यद् अट्कुप्वाङिति सूत्रीयोद्देश्यताऽवच्छेदकव्यापकम्। अतश्च तद्रूपावच्छिन्नातिरिक्तत्वेन व्यवायेऽपि इति सूत्रीयोद्देश्यता ऽवच्छेदकावच्छिन्ने संकोचे कृते सति विधिमुखेन प्रवृत्तिपक्षे—रेफषकारान्यतरोत्तराक्षरसमाम्नायिक-वर्णकर्तृकव्यवायविशिष्टसमानपदघटकस्य नकारस्य णत्वं चेत्तर्हि तादृशाडादिकर्तृकव्यवायविशिष्ट-समानपदघटकनकारस्यैव—इत्यर्थः संजायते। अनया रीत्या संकोचे मातॄणामित्याद्यर्थम्—ऋवर्णान्नस्य णत्वमिति वार्तिकं न कर्तव्यं भविष्यति। ऋकारघटकरेफात्परस्याज्भागस्य आक्षरसमाम्नायिकत्वा-भावात्। परन्तु 'आदर्शेन' 'अक्षदर्शेन' इत्यादिलक्ष्येषु अनेन नियमेन णत्ववारणं नैव सम्भवति, अडादिव्यवायसत्त्वात्। रषाभ्यामितिसूत्रीयभाष्यं प्रमाणयद्भिश्शेखरकृद्भिस्तु एतैरेवाक्षरसमाम्ना-यिकैर्व्यवाये नान्यैरिति वदद्भिः आदर्शेनेत्यत्र णत्वप्राप्तिरेव नेति समाहितम्।

अत्रेदमालोच्यते—

अट्कुप्वाङ्नुमिति नियामकसूत्रस्योद्देश्यताऽवच्छेदकं यत्पूर्वमुक्तम्—तत्तु उद्देश्यता-ऽवच्छेदकतापर्याप्त्यधिकरणम्, तदन्तर्वर्ति—अडादिकर्तृकव्यवायत्वम्, अडादिकर्तृत्वं वाऽपि उद्देश्यता-ऽवच्छेदकमस्त्येव, साक्षात्परम्परया वा भवेत्, तदन्यतरस्योपादानमौचित्यमनुसरत्येवेत्यनुपदमेव वक्ष्यते। अतश्च यदि अडादिकर्तृकव्यवायत्वमुद्देश्यतावच्छेदकतयाऽभ्युपेयते, आक्षरसमाम्नायिकवर्णकर्तृव्यवायत्वं तद्व्यापकम्, तदेव च व्यवायेऽपि इत्यस्य यत्किंचित्कर्तृकव्यवायत्वरूपोद्देश्यताऽवच्छेदकव्याप्यम्। तदवच्छिन्नातिरिक्तत्वेन संकोचे एकाररूपाड्व्यवायसत्त्वेन णत्वं प्राप्तमेवास्ति उक्ते लक्ष्ये। अतश्च अडादिकर्तृत्वमेवोद्देश्यताऽवच्छेदकतया स्वीकार्यम्। तद्व्यापकं रूपमाक्षरसमाम्नायिक-वर्णकर्तृत्वम्। तदेव च व्यवायेऽपि इत्येतदीयोद्देश्यताऽवच्छेदकस्य यत्किञ्चित्कर्तृत्वस्य व्याप्यमप्यस्ति, तद्रूपावच्छिन्नातिरिक्तत्वेन यत्किंचित्कर्तृत्वावच्छिन्ने संकोचः करणीयः। ततश्चाक्षरसमाम्नायिकवर्णकर्तृत्वावच्छिन्नेन व्यवाये सति तादृशनकारस्य णत्वं चेत्तर्हि अडादि-कर्तृत्वावच्छिन्नेन एव व्यवाये सति नान्यकर्तृत्वाऽवच्छिन्नेन इति नियमस्वरूपं भविष्यति। एवं सति 'आदर्शेन' इत्यादौ प्राप्तिरेव न, अडादिव्यतिरिक्तशकारनिष्ठकर्तृत्वावच्छिन्नेन व्यवाय-सत्त्वात्—इति कृत्वा भाष्यपथमनुसरतां शेखरकृतां निगूढं तात्पर्यमाञ्जस्येन दृष्टिपथमवतरिष्यति।

परमादरणीयेन पण्डितप्रवरश्रीकेदारनाथओझामहोदयेन उत्तरप्रदेशसंस्कृताकादमीद्वारा प्रचालितस्मारिकापत्रिकायां प्रकाशिते ''भाष्यांशाभिप्राययोरवधानदाननिवेदनमि''त्यभिधाने स्वीये निबन्धे समुल्लिखितम्—''आदर्शेनेत्यादौ णत्ववारणाय शेखरारूढत्वेनालोचकैः कल्पितास्त्रयः प्रकारास्तेषु तृतीयो नियमरूपोऽधुना वर्णितः। वस्तुतो नायं शेखरारूढस्तादृशः प्रकारः। आलोचका-स्तथा मन्यन्ते। कल्पनासहायकं शेखरसमुद्धृतनियमवाक्यस्य क्लिष्टत्वम्। तथा च प्राग्व्याख्यातम्। खण्डनप्रकारे च आलोचकानां न्यूनता। आलोचिका महामहोपाध्यायपूज्यश्रीजयदेवमिश्रकृता शास्त्रार्थरत्नावली, एवं श्रीनित्यानन्दपर्वतीयसंकलितं शब्देन्दुशेखरटीप्पणम्। शास्त्रार्थरत्नावल्यां

तत्सूत्रस्यान्तिमे पृष्ठे 'स्वीयोद्देश्यतावच्छेदकं यदडादिव्यवहितनत्वम् इति यदुक्तं तन्न्यूनम् अशुद्धं च। किन्तु मदुक्तरीत्या स्वीयोद्देश्यतावच्छेदकं रेफषकारान्यतरोत्तराडादिमात्रव्यवहितनत्वम् इति शुद्धं स्यात्।

प्राप्तिरेव नेति शेखरप्रतीकमुपादाय प्रवृत्तमुक्तं टीप्पणं तु उद्देश्यकोटौ नकारमप्यप्रवेश्य स्वीयामुच्छृङ्खलतामेव वर्णयति। उद्देश्यतावच्छेदककोटौ मात्रपदप्रवेशमन्तरा मनोरमाशेखराभिप्राय-मवबुध्यन्ते न केऽपि। मनोरमामूलं तथैवापत्स्यद् यदि तत्र शब्दरत्नं नाग्रहीष्यत्। प्राप्तिरेव नेति शेखरमूलं समीचीनं स्वारसिकं च" इति।

अनेन तदीयलेखेन प्रतीयते यद्—व्यर्थीभूत (नियामक) शास्त्रीयोद्देश्यताऽवच्छेदकं रूपं पर्याप्त्या ग्राह्यं, न तु तदेकदेशभूतम्। अत एव अडादिव्यवहितनत्वं नूनमशुद्धमित्युक्त्वा रेफषकारान्यतरोत्तराडादिमात्रव्यवहितनत्वमिति शुद्धमित्युक्तम्।

अत्रोच्यते—व्याकरणशास्त्रे प्रक्रियानिर्वाहाय उद्देश्यता द्विविधा व्यवह्रियते—सूत्रघटकपद-निष्ठशक्तिज्ञानाधीनोपस्थितिविषयीभूता उपस्थितीया एका, सूत्रात्मकवाक्यजन्यशाब्दबोधविषयीभूता शाब्दबोधीया द्वितीया। आद्या—यथा "इको यणची"त्यादौ असवर्णाजव्यवहितपूर्वत्वविशिष्टेक्त्वा-ऽवच्छिन्ना। 'आद्गुण' इत्यत्र अजव्यवहितपूर्वत्वविशिष्टावर्णत्वावच्छिन्ना। 'अकः सवर्णे दीर्घ' इत्यत्र सवर्णाजव्यवहितपूर्वत्वविशिष्टाक्त्वाऽवच्छिन्ना। 'अकः सवर्णे' इति सूत्रमपवादत्वात् 'इको यणचि'-'आद्गुण' इति सूत्रद्वयं बाधते, तत्र व्याप्यधर्मावच्छिन्नोद्देश्यताकशास्त्रेण व्यापकधर्मावच्छिनोद्दे-श्यताकशास्त्रस्य बाध इति नियमो बाध्यबाधकभावमत्रगाहते, तद्विषयीभूता उद्देश्यता शाब्दबोधी-यैव गृह्यते।

नियम्यनियामकभावस्थले द्विविधाऽपि गृह्यते। अथवा शाब्दबोधीयैव यदि गृह्येत, तदा साक्षात्परम्परासाधारणी। अथवा—एवकारार्थस्यान्वयः क्वचित्पर्याप्त्या उद्देश्यतावच्छेदका-वच्छिन्ने। क्वचित्तद्घटके विशेषणे वा, यथा वह्निमत्येव धूमः, इत्यत्र वह्निव्याप्यत्वं धूमे, शिखी ध्वस्त इत्यत्र ध्वंसप्रतियोगित्वं शिखायाम्, सूक्ष्मवस्त्रतर इत्यत्र तरबर्थोऽतिशयः सूक्ष्मत्वे। एतत्सर्व-मिष्टानुरोधाद् व्यवहारविषयतामनुभवत्येव।

दृष्टान्तरूपेण कतिपयस्थलानि प्रदर्श्यन्ते—यत्रोपस्थितीयैवोद्देश्यता गृहीता, अथवा शाब्दो-द्देश्यताऽपर्याप्त्या। यथा—

१. प्रसिद्धस्थले कृत्तद्धितसमासाश्चेत्यत्रैव समासत्वावच्छिन्ना—अर्थवत्त्वावच्छिन्ना च तादृश्येव। अन्यथा—अर्थवत्त्वविशिष्टसमासत्वावच्छिन्नैव, धात्वादिभेदविशिष्टार्थवत्त्वाऽवच्छिन्नैव शाब्दी स्यात्तस्या एवावच्छेदकधर्मावादाय समन्वयो विधेयः स्यात्।

२. "पतिः समास एवे"त्यत्रापि शाब्दीयोद्देश्यता पर्याप्त्या समासघटकपतिशब्दत्वावच्छिन्ना; तदवच्छेदकधर्मघटकसमासघटकत्वमेव गृहीत्वा "पतिशब्देकारस्य घिसंज्ञा स्याच्चेत्तर्हि समास-घटकस्यैव" इत्येवं समन्वयः क्रियते। समासे इतिपदोत्तरमेवशब्दं पठतां सूत्रकृतामपि अत्र सम्मति-र्द्रष्टव्या।

३. धातोस्तन्निमित्तस्यैव इति नियमसूत्रेऽपि—यादिप्रत्ययाव्यवहितपूर्वत्वविशिष्टयादि-प्रत्ययनिमित्तकत्वविशिष्टैजन्तधातुघटकैच्त्वं पर्याप्त्याऽस्य सूत्रस्योद्देश्यताऽवच्छेदकं रूपम्, तद्-

व्यापकं रूपं यादिप्रत्ययनिमित्तकत्वरूपविशेषणरहितमुक्तं रूपम्। 'वान्तो यि प्रत्यये' इति नियम्य-सूत्रस्योद्देश्यताऽवच्छेदकं रूपं सामान्यतया यादिप्रत्ययाव्यवहितपूर्वत्वविशिष्टैच्त्वम्। तद्व्याप्यमपि उक्तमेव रूपम्, तद्रूपावच्छिन्नातिरिक्तत्वेन नियम्यशास्त्रीयोद्देश्यताऽवच्छेदकावच्छिन्ने संकोचे कृते सति—यादिप्रत्ययाव्यवहितपूर्वविशिष्टैजन्तधातुघटकस्यैचश्चेद् वान्तादेशस्तर्हि यादिप्रत्ययनिमित्त-कस्यैवेत्यर्थः पर्यवस्यति। स्पष्टमेवात्र मदुक्ता तादृशी उद्देश्यता, तदवच्छेदको धर्मश्च गृहीतो भवति। तन्निमित्तस्यैवेति व्याहरतां सूत्रकृतामत्र पूर्णा सम्मतिः।

४ 'कर्मणि द्वितीया'—इत्यत्र प्रातिपदिकाच्चेद् द्वितीया तर्हि कर्माद्यर्थप्रातिपदिकादेवेत्य-नुक्त्वा कर्मण्येवेति वदतां भाष्यभूषणसार-शेखरकृतामपि मदुक्तेऽर्थे पूर्णा सम्मतिः।

५. "नलोपः सुप्स्वर" इत्यत्रापि सुबादिविधिशास्त्रावधिकपरत्वविशिष्टत्रैपादिकनलोप-विधिसूत्रत्वं पर्याप्तमुद्देश्यतावच्छेदकमनभिधाय सुबादिविधावेवेति कथनं मदुक्ताभिप्रायसूचकमेव।

६. प्रत्ययलोपे प्रत्ययलक्षणमित्यत्र नियामकशास्त्रे 'प्रत्ययत्वव्याप्यधर्मावच्छिन्नोद्देश्यताक-कार्यप्रयोजकीभूतप्रत्ययलोपत्वमुद्देश्यताऽवच्छेदकम्, तद्व्यापकं प्रत्ययलोपत्वम्, नियम्यशास्त्रं' स्थानि-वदादेश इति—तदुद्देश्यताऽवच्छेदकमादेशत्वम्, तद्व्याप्यमपि रूपं प्रत्ययलोपत्वमेव। तत्रापि संकोचे कृते—प्रत्ययलोपे सति चेत्प्रत्ययलक्षणम्, तर्हि प्रत्ययत्वव्याप्यधर्मावच्छिन्नोद्देश्यताककार्यप्रयोजकी-भूत एव प्रत्ययलोपे, इत्येवमर्थः पर्यवस्यति। तत्र एवकारार्थो विशेषणांशे एवान्वितः। आदेशत्वं प्रत्ययलोपत्वं चोपस्थितीयोद्देश्यताया एवावच्छेदकम्।

७. अनल्विधावित्यंशेऽपि तादृश्या एवोद्देश्यताया ग्रहणंकृतमस्ति।

प्रातःस्मरणीयगुरुवरश्रीहरिनारायणत्रिपाठिनां चरणोपान्ते यदाहमिदं शेखरस्थलं पठन्ना-सम्—तदा पाठारम्भ एव तन्मुखान्निसृतम् "किं तत्र परमाणुर्वै यत्र मज्जति मन्दरः" "आदर्शेन", इत्यस्य शङ्कासमाधाने अतीवगहने स्तः। अस्तु समग्रमत्रत्यं शेखरग्रन्थं संगमयद्भिर्गुरुचरणैरुक्तम्—यन्निषेधे एव भाष्यतात्पर्यमवगम्यताम्। निषेधवाक्यं च स्तुलशव्यवाये न—इत्येवं रूपं मन्तव्यम्, न तुः चु टु तु नेत्यादिरूपम्। तत्र व्यवायेऽपि इति विभक्तेन योगेन णत्वप्राप्तिर्बोध्या, अथवा निषेध-सामर्थ्येन रषाभ्यामित्यत्र निर्दिष्टपदानुपस्थित्या। भाष्ये तु रषाभ्यामित्यादिना शेखरकृद्भिर्नियमेन णत्ववारणं कृतमादर्शेनेत्यादौ, तत्तु न साधुतरम्—अडादिव्यवायस्यवर्तमानत्वात्। अन्ते च श्रीचरणैः एकमितिवृत्तमपि एतद्विषये श्रावितम्—"एकदा श्रीगणपतिशास्त्रिमहोदयाः (मोकाटे इत्युपाह्वाः) मद्गृहे समायाताः। मया सह वार्तालापावसरेऽस्य स्थलस्य चर्चाऽऽगता। तदा तु मोकाटेमहोदयै-रुक्तं—यद् नियमेनापि णत्ववारणं भवितुमर्हति—इति परमगुरुवराः श्रीदामोदरशास्त्रिमहाभागा उपदिशन्ति स्म।" सैव गुरुमुखाच्छ्रुता रीतिर्मया पूर्वं निवेदिता।

निषेधमुखेन प्रवृत्तिपक्षेऽपि दोषो नास्ति। तथा हि—अत्र उद्देश्यस्य, 'स्वातिरिक्ते स्वसजा-तीये', 'भवति, इतिक्रियापदस्य च "न भवति" इत्यत्र लक्षणा कर्त्तव्या भवति। एवं च समास-शास्त्रस्य समासातिरिक्तपूर्वभागपदघटितसमुदायस्य प्रातिपदिकसंज्ञा न भवति इत्यर्थः फलति। तत्र च समासस्य प्रातिपदिकसंज्ञा पूर्वसूत्रेणैव भवति। वाक्यस्य निषेध एवानेन करिष्यते। अस्मिन् पक्षे लक्षणयाऽर्थकरणे स्वार्थस्य हानिः, परार्थस्य कल्पना, प्राप्तस्य पूर्वशास्त्रस्य च बाध इति दोषत्रयं सोढव्यं भवति। अस्तु प्रकृतेऽपि अडादिकर्तृकव्यवाय एवोद्देश्यदलप्रविष्टः उद्देश्यतया स्वीकार्यः। तद्भिन्न आक्षरसमाम्नायिकवर्णकर्तृकव्यवायः। एवं च अडादिकर्तृक-

व्यवायभिन्न आक्षरसमाम्नायिकव्यवाये रषाभ्यां नस्य णत्वं न भवति इत्यर्थः सम्पद्यते। ततश्च—आदर्शेन-इत्यादौ णत्वापत्तिर्निरस्तैव, अडादिव्यवायभिन्नशकाररूपाक्षरसमाम्नायिकवर्ण-कर्तृकव्यवायसत्त्वात् ।

अस्तु नियमत्वस्वीकारेऽनया रीत्योभयथाऽपि 'आदर्शेन' इत्यत्र दोषाभावे सिद्धे स्वकल्पितो-द्देश्यताऽवच्छेदककोटौ समानपदघटकत्वानिवेशेन ''कथमुच्यमानं गंस्यते'' इत्यशुद्धभाष्यपाठस्वीकारेण च अशुद्धतान्यूनतारूपदोषद्वयेऽनवधानवतामपि भवतामोझामहोदयानां शास्त्रार्थरत्नावल्याः पर्वतीय-टिप्पणस्य वा न्यूनताप्रदर्शनं तत्कर्त्रोः कृते उक्ततादृशशब्देन व्यवहारश्च सहृदयहृदयमोदावहो नेति निवेदयति ।

मङ्गलवादः

आचार्यरुद्रप्रसादावस्थी

उपाध्यक्षः उत्तरप्रदेशसंस्कृताकादम्याः

सर्वेष्वारम्भकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥

इह खल्वखिलशिष्टैकवाक्यतयाभिमतकर्मारम्भसमये तादृशकर्मसमाप्तिकामाः मङ्गलमाचरन्ति। इदं च मङ्गलमारब्धकर्माङ्गं कर्मार्थितया शिष्टैः कर्मणः पूर्वं कृतत्वात् । केचित्तु मङ्गलं प्रधानमदृष्टद्वाराऽऽरब्धकर्मसमाप्तिः फलमिति वदन्ति ।

तेन समाप्तिकारणतावत् मङ्गलं निश्चीयते। परन्तु मङ्गलस्य समाप्तिकारणत्वेऽन्वयव्यतिरेकसहकृतप्रत्यक्षगम्या न कारणता लक्ष्यते। सत्यपि मङ्गले कादम्बर्यादौ समाप्तेरभावात् विनापि मङ्गलं प्रमत्तनास्तिकानुष्ठितग्रन्थे समाप्तिदर्शनात् व्यतिरेकव्यभिचारोऽपि कारणतां विघटयति। अन्वयव्यभिचारस्यापि सत्त्वेन कारणतायां सन्देहस्यापि जागरूकत्वात् ।

अत्र आस्तिकाः, मङ्गलस्य समाप्तिकारणत्वेऽनुमानं प्रमाणं, तथा चानुमानप्रयोगः—मङ्गलं सफलम् अविगीतशिष्टाचारविषयत्वात् दार्शश्राद्धादिवत् । अनुमिते च मङ्गलस्य सफलत्वे मङ्गलं समाप्तिफलकं समाप्त्यन्याफलकत्वे सति सफलत्वात् इत्यनुमानेन मङ्गलस्य समाप्तिकारणताऽनुमितिविषया। अनुमिते च समाप्तिकारणत्वे "समाप्तिकामः मङ्गलमाचरेत्" इति श्रुतिरपि अनुमिता भविष्यति। उक्तं च "आचारात् स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम्" इति मीमांसाशास्त्रे शास्त्रदीपिकादिग्रन्थेषु ।

यत्तु मङ्गलस्य सफलत्वे साधिते विश्वजितन्यायेन स्वर्गादि एव मङ्गलस्य फलं कल्प्यते इति वदन्ति तन्न युक्तम्, विश्वजितन्यायात् स्वर्गं फलकल्पने गौरवात्, समाप्तिरूपदृष्टफलकत्वमेव मङ्गलस्य कल्पनीयम् । एवं स्थिते सत्यपि मङ्गले यत्र न समाप्तिः तत्र प्रतिबन्धकं कल्पनीयम्, प्रतिबन्धकाभावश्च कार्यमात्रं प्रति कारणम्, अत एव शुष्केन्धनसमभिव्याहारेऽपि चन्द्रकान्तमणिसत्त्वे वह्निना दाहो न जन्यते। एवमेवारब्धकर्मणोरपि उत्पत्तौ विघ्नादिप्रतिबन्धकस्य कल्पनं न दण्डवारितम् ।

अत्रेदं विचारणीयं कादम्बर्यादिग्रन्थेषु प्रतिबन्धकसत्त्वे कियान् भागः कादम्बर्याः सम्पन्नः न हि चन्द्रकान्तमणिसत्त्वे कियन्मात्रः वह्निरुत्पद्यते अतः सति प्रतिबन्धके कादम्बर्याः तावानपि अंशः कथं सम्पन्न इति, तत्र एष निर्णयः विघ्नानां साक्षात्प्रतिबन्धकत्वाभावात् किन्तु स्वजन्यनृपाद्युपद्रवद्वारा प्रतिबन्धकत्वं तथा च मङ्गलात् यावत्कालीनोपद्रावकादृष्टनाशः तावत्कालं कादम्बरी सम्पन्ना पुनः अग्रे विघ्नात् प्रतिबन्धो जातः। विघ्नसंदेहेऽपि मङ्गलाचरणमुचितं शिष्टाचारोऽप्येवंविध एव, अत एव शङ्कितानिष्टनिवारणाय प्रवर्तन्ते परीक्षका इति। अन्यथानुपस्थितशत्रुभिः पार्थिवैः द्विरदयूथपतयो नानुद्रीयेरन् । प्रमत्तानुष्ठिते ग्रन्थे च जन्मान्तरीयमङ्गलकल्पनात् न दोषलेशोऽप्यन्वयव्यभिचारग्रस्तः।

अपरे तु मङ्गलस्यारब्धनिर्वाहकत्वे विघ्नसंसर्गाभावत्वेनैव प्रतिबन्धकाभावस्य (विघ्नाभावस्य) हेतुत्वात् । स चाभावः क्वचित् विघ्नस्य ध्वंसः, क्वचित् विघ्नस्य प्रागभावः क्वचिच्चात्यन्ताभावः । अत एव बहवः मीमांसकाः मङ्गलमपूर्वं (धर्मं) जनयति तेन चापूर्वेण विघ्नसंसर्गाभावो जायते, विघ्नसंसर्गाभावाच्च समाप्तिरिति क्रमेण स्वजन्यापूर्वजनितविघ्नसंसर्गाभावद्वारा मङ्गलस्य समाप्तिहेतुत्वमिति वदन्ति इति प्राचीनमतं चिन्तामणिग्रन्थे गङ्गेशोपाध्यायैः प्रदर्शितम्, मथुरानाथतर्कवागीशैश्च पुष्टीकृतम् ।

नव्यास्तु मङ्गलस्य विघ्नसंसर्गाभाव एव फलं समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात् ।

ननु विघ्नसंसर्गाभावे मङ्गलं कारणम्, विघ्नसंसर्गाभावे च विनायकस्तवपाठादिस्मृतिष्वुद्घोषितं कारणत्वेन ततश्च एकधर्मावच्छिन्नकार्ये जननीयेऽनेककारणस्वीकारे व्यतिरेकव्यभिचारः दुर्वार इति विघ्नसंसर्गाभावं प्रति मङ्गलस्य कारणत्वं न साधितुं शक्यते इति चेन्न एतादृशस्थले एव कार्यतावच्छेदककुक्षौ कारणाव्यवहितोत्तरत्वं निवेश्य व्यतिरेकव्यभिचारं वारयन्ति तर्करसिकाः ।

इत्थं च सति मङ्गलाव्यवहितोत्तरजायमानविघ्नसंसर्गाभावं प्रति मङ्गलं कारणम्, विनायकस्तवपाठाद्यव्यवहितोत्तरजायमानविघ्नसंसर्गाभावं प्रति विनायकस्तवपाठादि कारणमिति न व्यतिरेकव्यभिचारावकाशः ।

न च कार्यतावच्छेदककुक्षौ कारणाव्यवहितोत्तरत्वं निवेश्य व्यतिरेकव्यभिचारवारणं न सम्प्रदायसिद्धमन्यथा "काशीमरणान्मुक्तिः" इत्यत्र पञ्चम्याः प्रयोजकत्वप्रतिपादनमसङ्गतं स्यात्, तस्यायं भावः—काशीमरणस्यापि मुक्तिसाधकत्वे ज्ञानस्यापि मुक्तिकारणत्वं सम्प्रदायसिद्धम्, तथा च मुक्तिं प्रति कारणद्वयस्वीकारे व्यतिरेकव्यभिचारो दुर्वारः, व्यतिरेकव्यभिचारवारणाय एव पञ्चम्याः प्रयोजकत्वमर्थः कृतः साम्प्रदायिकैः । तेन काशीमरणस्य ज्ञानद्वारा मुक्तिहेतुत्वं तथा च ज्ञानं साक्षात्कारणं मुक्तिकारणं ज्ञानकारणं काशीमरणं परम्परया मुक्तिसाधकम् ।

इत्थं च न व्यतिरेकव्यभिचारप्रसङ्गः । तथा च मङ्गलविनायकस्तवपाठाद्योः कारणत्वविघटनायोपस्थितं व्यतिरेकव्यभिचारं वारयितुं शक्यते, कारणाव्यवहितोत्तरत्वं निवेश्य तर्करसिकैः इति चेत्,

अत्रोच्यते कार्यतावच्छेदककोटौ कारणाव्यवहितोत्तरत्वं निवेश्य व्यतिरेकव्यभिचारो वारितः न्यायग्रन्थे नैयायिकैः । प्रकृते पञ्चम्याः प्रयोजकत्वार्थकथनमभिप्रायान्तरेण । स चेत्थमभिप्रायः—काशीमरणोत्तरजायमानपञ्चम्याः प्रयोजकत्वमर्थः यदि न स्यात् तर्हि काशीमरणस्यापि मुक्तौ हेतुत्वे व्यतिरेकव्यभिचारस्य सुदृढत्वेन ज्ञानस्य कारणत्वं न सिध्येत् अतः कार्यतावच्छेदककोटौ अव्यवहितोत्तरत्वनिवेशः सम्प्रदायसिद्धः ।

एतेन मङ्गलस्य विघ्नसंसर्गाभाव एव फलं न समाप्तिरिति नव्यमते मङ्गले समाप्तिकामस्य पुरुषस्य प्रवृत्तिर्न स्यात्, यद्धि यस्य फलं भवति तत्कामस्यैव तत्र प्रवृत्तिनियमात् । समाप्तिसाधनविघ्नसंसर्गाभावसाधनत्वात् मङ्गले प्रवृत्तिर्वाच्या तृप्तिकामस्य तृप्तिसाधने पाके प्रवृत्तिरिव तच्च प्रकृते न सम्भवति, स्वतः सिद्धविघ्नविरहस्थले व्यभिचारेण विघ्नसंसर्गाभावस्य समाप्तिसाधनत्वाभावादित्यपास्तम्, संसर्गाभावत्वेनैव संसर्गाभावस्य हेतुत्वेन व्यभिचाराप्रसक्तेः ।

अत्रेदं चिन्त्यते—विघ्नात्यन्ताभावः तत्तद्विघ्नाभावानां विघ्नसंसर्गाभावत्वेन हेतुता उत विघ्नत्वावच्छिन्नप्रतियोगिताकसंसर्गाभावत्वेन। नाद्यः, यत्किंचित् विघ्नसत्त्वे विघ्नप्रतियोगिकसंसर्गाभावस्य सत्त्वेन समाप्त्यापत्तेः।

न द्वितीयः, ध्वंसप्रागभावयोः हेतुतानापत्तेः तयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वानङ्गीकारात्। विघ्नप्रतियोगिकसंसर्गाभावकूटत्वेन हेतुता तु वक्तुमशक्या तदा क्वापि समाप्त्यनापत्तेः। ध्वंसप्रागभावादीनामेकदा एकत्रासत्त्वेन कूटत्वाधिकरणत्वस्य कदाप्यसंभवात्।

अतः तत्तद्विघ्नाभावत्वेन विघ्नसंसर्गाभावस्य हेतुता निर्दुष्टा प्रतिभाति।

पाणिनीयव्याकरणे काशिकायाः महत्त्वम्

आचार्य ओंकारनाथद्विवेदी

कार्यपरिषत्सदस्यः उत्तरप्रदेशसंस्कृताकादम्याः

पाणिनीयव्याकरणपरम्परायां पातञ्जलभाष्यात् पश्चात् काशिकेव एतादृशं ग्रन्थरत्नमास्ते, यत् सर्वाधिकं प्राचीनमेवं प्रामाणिकं वक्तुं शक्यते। जयादित्यवामनौ उभावेव मनीषिणौ काशिकाया निर्माणमतीव कौशलेन चक्रतुः। महत्त्ववर्णनात् प्राक् उभयोः लेखकयोः अपि विषये किञ्चित् कथनमसमीचनं न प्रतिभाति। द्वावपि कश्मीरनिवासिनौ आस्ताम्। चीनयात्रिणः इत्सिंगमहोदयस्य लेखानुसारेण एकषाष्ठ्युत्तरषट्शततमे (६६१ तमे) ईस्वीयसंवत्सरे जयादित्यस्य मृत्युरभवत्। अस्मिन् विषये पाश्चात्याः पौरस्त्या विद्वांसः विवदन्ते। काशिकाकारः "प्रकाशनस्थेय १-३-२३ सूत्रस्य व्याख्यानावसरे भारवेः एकं पद्यम् "संशय्य कर्णादिषु तिष्ठते यः" उदाजहार। षष्ठशतके जनिं प्रसिद्धिञ्च लभमानात् भारवेः पश्चात् काशिकाकारयोः सत्ता प्रख्यायते। षष्ठशतकस्य उत्तरार्धे एव काशिकायाः निर्माणमभूत्। एवमैतिहासिकाः मन्वते। काव्यालङ्कारलेखकः वामनः काशिकालेखकात् वामनात् भिन्न एव युधिष्ठिरमीमांसकस्याप्येवमेव मतमस्ति। बहिरङ्गप्रमाणैः अनेके शोधप्रबन्धरचयितारः प्रो० हर्षनाथादयः एनं बौद्धमतावलम्बिनं ब्रुवते। प्रो० मैक्समूलरः जैन इत्यवोचत्। प्रो० बल्वल्करोऽपि एनं बौद्धामतावलम्बिनं कथयामास।

बौद्धत्वे हेतूनाह—१ ग्रन्थारम्भे मङ्गलाचरणस्याभावः।

२. पाणिनिसूत्रेषु चान्द्रगोमिवैयाकरणानुसारेण काशिकाकारः संशोधनं मिश्रणञ्च चकार।

३. काशिकायां लोकायतपदस्योल्लेखः।

एतद्विपरीतं डा० महेशदत्तशर्मा "काशिकासिद्धान्तकौमुद्योस्तुलनात्मकमध्ययनमिति" शोधप्रबन्धग्रन्थे काशिकाकार वैदिकधर्मानुयायी इति वक्ति। नामोल्लेख—मात्रेण कश्चन बौद्धो न भवितुर्महति। भाष्येऽपि लोकायतशब्दस्योल्लेखः वरीवर्ति। जैनेन्द्रव्याकरणस्य टीकाकारः अभयनन्दी "त्रियम्बकस्यो"ल्लेखं चकार। अस्यां दशायाम् किं स वैदिकधर्मावलम्बी आसीत्? काशिकाकारः वैदिकधर्मावलम्बी आसीत् न वा, किन्तु काशिकापठनेन इत्थं ज्ञायते काशिकारस्य वैदिकवाङ्मयेन महान् परिचयः आसीत्। बहुषु उदाहरणस्थलेषु वैदिकोदाहरणानि एव दत्तानि सन्ति। यथा चान्द्रवृत्त्यभयनन्दीवृत्ति-भाषवृत्तिषु उदाहरणैरेव ज्ञायते यदासां वृत्तीनां लेखकाः बौद्धाः जैनाः सन्ति, तथा वैदिकोदाहरणैः सुस्पष्टं ज्ञायते, काशिकाकार नासीत् लौकायतिकः। "बहुलं छन्दसि" ३।२।८८। इति सूत्रोपरि मातृहा, पितृहा, इत्युदाहरणद्वयदानमेव पर्याप्तमासीत्। परन्तु काशिकाकारः छान्दोग्योपनिषदः इदम् वाक्यमपि "मातृहा सप्तमं नरकं प्रविशेत्" उदाजहार। एतेन वैदिकधर्मे विश्वासमपि प्रकटयाञ्चकार। चन्द्रगोमिलिखिते चान्द्रे व्याकरणे ६।३।३६ तमे सूत्रे निम्नाङ्कितः एकः श्लोको लिखितो वर्तते—

रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
मारजित् भगवान् बुद्धोऽस्माकं कुलनन्दनः ॥

चन्द्रगोमी भगवन्तं बुद्धमेव स्वेष्टदेवं स्वीचकार । ग्रन्थे स्थले स्थले तथाविधानि उदाहरणान्यपि दत्तानि ।

उपर्युक्त एव श्लोकः कातन्त्रव्याकरणस्य दुर्गसिंहवृत्तौ, अथ च शाकटायनव्याकरणस्य, "अमोघायां" वृत्तौ चैवम्—

वीरो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
स एव नाथोऽस्माकं भगवान् पापनाशनः ॥ लिखितोऽस्ति ।

अनेन श्लोकेन दुर्गसिंहस्य, पाल्यकीर्तिशाकटायनस्य च जैनत्वं सिद्ध्यति । द्वितीयश्लोके वीरपदं महावीरं अथवा अन्यं कञ्चित् तीर्थङ्करं संकेतयति ।

इत्थमेव "अनुदात्तं सर्वमपादादौ" ८।१।१८ तमे सूत्रे काशिकाकारः तमेव श्लोकं परिवर्त्य—

रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
स एव नाथोऽस्माकं भगवान् शत्रुमर्दनः ॥

चान्द्रव्याकरणीयः उक्तश्लोकः काशिकाकर्त्तुः समक्षमासीत्; तथापि परिवर्तितं रूपमेव लिलेख । काशिकाकारः चन्द्रगोमी इव बुद्धमीष्टदेवत्वेन न प्रतुष्टुवे । प्रस्तुतश्च

रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
स एव नाथोऽस्माकं भगवान् शत्रुमर्दनः ॥

अतः प्रतीयते काशिकाकर्तुः इष्टदेवः भगवान् शंकर एव आसीत् । धर्मोऽपि वैदिक एव आसीत् ।

काशिकायाः नामकरणे रचनास्थानविषयेऽपि च विद्वत्सु अनेके मतभेदाः सन्ति । "तत्र भवः" सूत्राधिकारे काश्यादिभ्यष्ठञ्ञिविति सूत्रेण ञिठ् प्रत्ययेन काशिकाशब्दस्य सिद्धिर्भवति । एतदभिलक्ष्यैव हरदत्तमिश्रः पदमञ्जर्यां काशिकायाः रचनां काश्यां स्वीकृत्य लिलेख—"काशिकेति देशतोऽभिधानम् । काशिषु भवा काशिकेति" । हरदत्तस्यैव पदानुगमनं कृत्वा विन्टरनित्स–श्रीशचन्द्रचक्रवर्ति-युधिष्ठिरमीमांसकादयः काशिकायाः काश्यामेव रचनां स्वीकृतवन्तः ।

किन्तु निम्नाङ्कित वस्तुनिर्देशात्मके मङ्गले—

इष्टयुपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था ।
व्युत्पन्नरूपसिद्धिः वृत्तिरियं काशिका नाम ॥

श्लोकेऽस्मिन् विवृतगूढसूत्रार्थेति विशेषणादानेन सूत्रार्थप्रकाशनमेव प्रकाशयति न तु काशिस्था काशिकेति ।

सृष्टिधराचार्योऽपि भाषावृत्त्यर्थविवृतौ ८।४।६२ तमे सूत्रे काशयति प्रकाशयति सूत्रार्थमिति काशिका इति विवृणोति ।

ग्रन्थकर्तुः भावनयापि विवृतसूत्रगूढार्था एव काशिका न तु काशिषु भवा, कश्मीरेषु एव रचना जाता। तौ जयादित्यवामैनौ कश्मीरनिवासिनौ अभूताम्। अथ च—

यजुर्वेदस्थान्युदाहरणानि दृष्ट्वापि कश्मीरेषु रचनापि जाता इत्येव प्रतीयते। पुरा यजुर्वेदस्य प्रचारः कश्मीरेषु एव आसीत्। विद्वांसः ऐतिहासिका एवं मन्वते। पञ्चाध्यायस्य लेखको जयादित्यः, अन्तिमानां त्रयाणामध्यायानां कर्ता वामनः अस्ति इति बहुषु स्थलेषु उदाहरणैः प्रतीयते।

उक्तश्लोके काशिका काशिकायाः वैशिष्ट्यं प्रतिपादयति। इयं काशिका इष्ट्युपसंख्यानवती। भाष्यकार इष्टिशब्दस्य व्याख्यानम् "इष्यते अनया इति इष्टिः" इति कृतवान्।

हरदत्तः पदमञ्जर्यां—सूत्रेणांसंगृहीतं लक्ष्यं येन संगृह्यते तदुपलक्षणमिष्ट्युपसंख्यानग्रहणम्। तेन वक्तव्यादीनामपि ग्रहणम्।" अयमाशयः—उपसंख्यानम्, वक्तव्यम्, वाच्यम् प्रभृतयः शब्दा येषु वाक्येषु स्युः तानि वाक्यानि इष्टयः, कुत्रापि इष्टिशब्दोपि प्रयुक्तो वर्तते। पाणिनिसूत्रागृहीतेषु वार्तिककारः, भाष्यकारः काशिकाकारवपि वा तानि तानि पदानि साधयितुं निर्मातः स्म इष्टीः, वार्तिकानि, श्लोकवार्तिकानि वा।

भाष्यात् पूर्वं लिखितासु वृत्तिषु माथुरादिषु इष्टयः नासन्। इयं काशिका इष्ट्युपसंख्यानवती इति वैशिष्ट्यमस्या, कात्यायनप्रणीतानि वार्त्तिकान्यपि वक्तव्योपख्यानबहुलान्येव सन्ति। पाराशरोपपुराणे वार्तिकस्य लक्षणम्—

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञाः मनीषिणाः॥

उद्योते नागेशोऽपि—उक्तानुक्तदुरुक्तचिन्ताकरत्वं वार्त्तिकम्, उक्तानुक्तदुरुक्तचिन्ता वार्त्तिकमिति शास्त्रभेदाः—राजशेखरः काव्यमीमांसायाम्।

पदमञ्जर्यां हरदत्तोऽपि—

यद् विस्मृतमदृष्टं वा सूत्रकारेण, तत् स्फुटम्।
वाक्यकारो ब्रवीत्येनं तेनादृष्टं च भाष्यकृत्॥

लक्षणं कृतवान्। कात्यायनप्रणीतेभ्यः वार्तिकेभ्यः पृथगपि काशिकारचितानि—उपसंख्यानवक्तव्यबहुलानि वाक्यानि सन्ति। इदं वैशिष्टयं काशिकायाः। काशिकाया अपरं वैशिष्ट्यम्—"शुद्धगणा" इयं काशिका पूर्ववृत्त्यपेक्षया। हरदत्तमिश्रस्तु पदमञ्जर्यां लिलेख—"वृत्त्यन्तरेषु गणपाठ एव नास्ति"।

अन्यत् वैशिष्ट्यं काशिकायाः विवृतगूढसूत्रार्था—"काशिका वैलक्षण्येन नैपुण्येन सूत्राणां गूढानभिप्रायान् प्रदर्शयाञ्चक्रे। हरदत्तस्तु गूढपदं सूत्रार्थमात्रस्योपलक्षणं स्वीकरोति यथा—"गूढग्रहणं सूत्रार्थमात्रस्योपलक्षणम् सूत्रार्थप्रधाना इत्यर्थः—अनेन वृत्तिलक्षणमुक्तम् इति पदमञ्जरी॥ सूत्राणां गूढाशयान् विस्फोरयितुमनेकानर्थान् अत्र प्रदर्शितमस्ति। अपरमपि वैशिष्टयम्– व्युत्पन्नरूपसिद्धिरिति विशेषणपदं प्रदर्शयति। व्युत्पन्नानां कठिनानां शब्दरूपाणां सिद्धिर्यस्यां सा। यद्यपि काशिका प्रक्रियाकौमुदी इव सिद्धान्तकौमुदीवत् वा नास्ति प्रक्रियाग्रन्थः, तथापि सूत्रार्थप्रकाशनेन सहैव व्युत्पन्नानां कठिनानां रूपाणां सिद्धिमपि करोति। यथा—न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु, द्विर्वचनेऽपि च, इत्यादिसूत्राणि दर्शनीयानि सन्ति। यथा कौ स्तः, यौ स्तः,

तानि सन्ति, यानि सन्ति। अप्सु यायावरः प्रवपेत पिण्डान्, शिषन्ति, पिबन्ति, जक्षतुः, जक्षुः, अक्षन्नमीमदन्त पितर आदीन्युदाहरणानि द्रष्टव्यानि सन्ति एवम्भूता काशिका नाम। निम्नाङ्कितोऽपि श्लोकः काशिकायाः वैशिष्ट्यं प्रकटयति—

वृत्तौ भाष्ये तथा धातुनामपारायणादिषु।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रहः॥

यस्मिन् ग्रन्थे सूत्रार्थस्य प्राधान्यं भवेत् स वृत्तिग्रन्थो निगद्यते। पाणिनीय-सूत्रेषु काशिकातः पूर्वमपि वृत्तिग्रन्थाः आसन्। यथाह—हरदत्तः—"सूत्रार्थप्रधानो ग्रन्थो वृत्तिः। अत्र पाणिनि-प्रणीतानां सूत्राणां कुणिप्रभृतिभिराचार्यैः विरचितं विवरणम्। तासु कस्यश्चिदाश्रयं जग्राह काशिका—"वृत्तौ इति" "भाष्ये" इति। हरदत्तः—"आक्षेपसमाधानपरो ग्रन्थो भाष्यम्। तच्च पतञ्जलिप्रणीतम्"। धातुप्रक्रिया सम्पादको ग्रन्थः धातुपारायणं नाम। माधवीयधातुवृत्तिवत् कश्चन ग्रन्थः आसीत्—काशिका यस्याश्रयमगृह्णात्। आदिपदेन शिक्षोणादिफिट्सूत्रकातन्त्रचान्द्रादीनां ग्रहणमस्ति। काशिकाप्रथमभागस्य तुरीयपृष्ठे लिखितम् "यत्र धातुप्रक्रिया तद् धातुपारायणम्। आदिशब्देन शिक्षोणादिफिषादेर्ग्रहणम्"। सायणपुरुषोत्तमदेवौ अपि पारायणिकानां नामानि संस्मरतुः। पूर्णचन्द्रकृतं धातुपारायणं लभ्यतेऽपि। तत्र विप्रकीर्णस्य तन्त्रस्य काशिकायां जयादित्येन सारसंग्रहः क्रियत इत्येषा प्रतिज्ञा।

सारश्चासौ संग्रहश्चेति कर्मधारयः, सम्यक् समन्ताद्वा गृह्यते लक्ष्यं लक्षणञ्चानेनेतिां संग्रहः। अस्मिन् पक्षे स्वयमेव इयम् काशिकावृत्तिः स्वस्मात् पूर्वं, विप्रकीर्णस्य तन्त्रस्य सिद्धान्तस्य तन्त्रं प्रधाने सिद्धान्ते चेत्यमरः"। सारसंग्रहः"—सारस्य संग्रहः इति षष्ठीतत्पुरुषे, संग्रहणं संग्रहः संक्षेपः, भावप्रधानस्य संग्रहपदस्यार्थः, स्वस्मात् पूर्वोक्तानां ग्रन्थानां सारस्य सिद्धान्तस्य संग्रहः संक्षेपार्थः क्रियते। पुल्लिङ्गस्य सारशब्दस्य उत्कृष्टता, नपुंसकस्य सारशब्दस्य निर्दोषतार्थकत्वम् कोशेषु प्रदर्शितम्।

तेनायम् प्रथमार्थः—वृत्तिभाष्यादिग्रन्थेषु वर्णितानां सिद्धान्तानामुत्कृष्टतया निर्दोषतया च सारसंग्रहः क्रियते। उक्ताकरभाष्यादिग्रन्थेषु वर्णितानां सिद्धान्तानां संग्रहः इति द्वितीयार्थः। भाष्यादिग्रन्थेषु या व्याकरणपरम्परा वितस्तार, तस्याः सारसंग्रहः क्रियते इति तृतीयार्थोऽपि गृह्यते। कात्यायनोक्तानां भाष्यप्रतिपादितानाञ्च चतुःसहस्राणां वार्त्तिकानां सारसंग्रहं सहस्रैकमात्रेषु वार्तिकेषु स्वीचकार संचिक्षेप च काशिका, इति महत् वैशिष्ट्यं काशिकायाः। व्याकरणवाङ्मयस्य सिद्धान्तानां साररूपेण संग्रहणेऽत्रध्यानमपि आसीत्। यत् सारसंग्रहेऽपूर्णतादि न स्यात् अत एवात्र लिखितम्—

व्याकरणस्य शरीरं परिनिष्ठितशास्त्रकार्यमेतावत्।
शिष्टः परिकरबन्धः क्रियतेऽस्य ग्रन्थकारेण॥

व्याकरणशास्त्रस्य कार्यं प्रयोजनं सुचारुरूपेण काशिकायां पूर्णतामगात्। पाणिनिसूत्राणि यदि व्याकरणस्य आत्मा तदा काशिका शरीरम् इत्युक्तौ नास्ति संदेहलवोऽपि। सूत्रात्मनः संरक्षणस्य काशिकाशरीरेण श्रेयः काशिकाकर्त्रोरेवास्ते इति कथनं समीचीनमेव। सत्यमेव व्याकरणस्य कार्यं काशिकायां समाप्तम्। दार्शनिकान्येव मतानि अवशिष्टानि। अत एवोक्तम्—"व्याकरणस्य शरीरम् परिनिष्ठितशास्त्रकार्यम् एतावदेव।

परिवर्तनं परिष्करणञ्च

यथा—पतञ्जलिकात्यायनप्रभृतिभिः वैयाकरणैः पाणिनितन्त्रं परिष्कृतं परिवर्धितं तथैव एनां परम्परां अग्रेसरीकुर्वन्तौ काशिकाकारावपि यत्र तत्र परिष्कृतवन्तौ। वृत्तिकारावपि जयादित्यवामनौ तान् शब्दान् समाधातुं सफलं प्रयासमकार्ष्टाम्। ये ये शब्दाः पाणिनितन्त्रेऽसमाहिताः आसन् तथा येषु शब्देषु वार्त्तिककारभाष्यकारयोः ध्यानमपि नासीत्—यथा भुवश्च ३।२।११८ इति सूत्रे काशिकाया-मुक्तं—"चकारोऽनुक्तसमुच्चयार्थः" भ्राजिष्णुना लोहितचन्दनेन भाष्यकारोऽत्र मौनं लेभे। काशिका कारौ अनेकेषां शब्दानां समाधानार्थमनेकेषां वार्त्तिकानामिष्टीनाञ्च निर्माणञ्चक्रतुः। यथा—

ईदूदेद्द्विवचनं प्रगृह्यम् सूत्रे—"इवादीनां प्रगृह्यत्वे मणीवादीनां प्रतिषेधो वक्तव्यः" इदं वार्त्तिकंतौ विहितवन्तौ। भाष्ये इदं नोपलभ्यते।

मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम। रोदसीव, दम्पतीव, जम्पतीव। महाभारतीयं श्लोकं दृष्ट्वा काशिकाकारावुक्तं प्रयासमकुरुताम्। भाष्ये वार्तिकाभावे—कैयटः काशिकाकारमतमचखण्डयत्। आह च "इवादीनां प्रगृह्यत्वे मणीवादीनां प्रतिषेधो वक्तव्य"—इत्यस्य भाष्यकारवार्तिककाराभ्यामपठितत्वात् अप्रमाणमेतत्। मणीवोष्ट्रस्येत्यादि प्रयोगस्तु वाशब्दस्योपमानार्थत्वात्। रोदसीवेत्यादि प्रयोगास्तु छान्दसाः। छन्दसि सर्वे विधयो विकल्प्यन्ते।"

दम्पतीव जम्पतीव अनयोः छान्दसत्वप्रकल्पनं कैयटस्य असमीचीनं प्रतिभाति। एवम् एङ् प्राचां देशे १।१।७५ इति सूत्रे भाष्ये सूत्रस्थं प्राचां पदं आचार्यनिर्देशार्थं स्वीकृतवान् पतञ्जलिः, किन्तु जयादित्यः देशस्य विशेषणं स्वीकृत्य एकं श्लोकमपि तदर्थं प्रास्तावीत्।

प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा।
विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती॥

शाकटायनोऽपि देशविशेषणमेव स्वीचकार। शरावती नाम नदी। तस्याः पूर्वः प्राग्देशः, उत्तरस्तूदीचः। उक्तञ्च काशिकायाम् "एङ् प्राचां देशे" सूत्रेऽभयनन्दिना यथा—"यस्याचामादिग्रहणमनुवर्तते। एङ् यस्यामचादिः तत् प्राचां देशाभिधाने वृद्धसंज्ञं भवति। एणीपचनीयः, भोजकटीयः, गोनर्दीयः। देश इति किम्? गोमत्यां भवाः मत्स्याः गौमताः।" इत्थम् "एनपा द्वितीया", "पृथक् विनानानाभिस्तृतीयान्यतरस्याम्" इत्यादिषु सूत्रेषु योगविभागेन शब्दानां सिद्धिं जयादित्यः प्रादर्शयत्। पृथग्विनानानाभिरिति योगविभागो द्वितीयार्थः।

यथाह—विना वातं विना वर्षं विद्युत्प्रपतनं विना।
विना हस्तिकृतान् दोषान् केनेमौ पातितौ द्रुमौ॥

एवम् "सर्वादीनि सर्वनामानि" इत्यत्र कथं यथासंख्यमनुदेशः समानाम्, समे देशे यजेत् इति? उत्तरितमिष्ट्या "समस्य सर्वपर्यायस्य सर्वनामसंज्ञेष्यते न सर्वत्र"। भाष्येऽस्मिन् विषये नास्ति विचारः। भट्टोजिदीक्षितेन "यथासंख्यमनुदेशः समानामित्यत्र ज्ञापकात् कार्यं चालितम्।

अव्ययीभावश्चेतिसूत्रे तिस्रः इष्टीः विद्यन्ते।

क—पुण्यसुदिनाभ्याहः क्लीबतेष्यते।

ख—पथः संख्याव्ययादेः क्लीबतेष्यते।

ग—क्रियाविशेषणानां च क्लीबतेष्यते।

भाष्ये एताः न प्राप्यन्ते ।

उदाहरणस्थलेष्वपि काशिकाया अधिकं योगदानं दृश्यते । लक्षणसूत्रेऽपि काशिकाकारद्वयस्या-पूर्वत्वं दृश्यते । यथा –"ल इत्येकं वर्णमुपदिश्य पूर्वमन्ते च णकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति त्रिभिः, अणुदित्सवर्णस्य चाप्रत्ययः, इत्यकारेण, इणकोः, इतीकारेण, इको यणचि यकारेण । इण् ग्रहणानि सर्वाणि परेण णकारेण, अण्ग्रहणानि तु पूर्वेण । अणुदित्सवर्णस्य चाप्रत्यय १।१।६९ । इत्येतदेकमनेन लण्सूत्रेण परेणेति भावः" ।

अत्रैव हकारादिष्वकार उच्चारणार्थः नानुबन्धः । लकारे त्वनुनासिकः प्रतिज्ञायते । तेन "उरण्रपरः" इत्यत्र प्रत्याहारग्रहणाल्लपरत्वमपि भवति ।

महाभाष्येऽस्य प्रत्याहारस्य विषयेऽत्र नास्ति संकेतः । केवलं तुल्यास्येति सूत्रे "लपरत्वं" वक्ष्यामीति लिखितम् । पश्चात् भर्तृहरिणा "ऌकारस्य लपरत्वं वक्ष्यामि" एतदाश्रयेण रप्रत्याहारस्य कल्पना कृता ।

अपरञ्च—"अत इञ्" इति सूत्रेण अकारान्तात् अपत्यार्थे इञ्विधानात्—दशरथस्यापत्यं दाशरथिः भवति—तथा प्रयोगोऽपि सैष दाशरथिः रामः, सैष राजा युधिष्ठिरः ।

किन्तु वाल्मीकीये रामायणे—प्रदीयतां दाशरथाय मैथिली । श्लोकेऽस्मिन् दाशरथाय प्रयोगं दृष्ट्वा समाधानमपि चकार ।

यथा—"कथं प्रदीयतां दाशरथाय मैथिली ? शेषविवक्षायां भविष्यति । इदं समाधानमुत्तर-वर्तिनः सर्वे वैयाकरणाः स्वीचक्रुः । एवम् "अच्प्रत्ययान्ववपूर्वात् सामलोम्नः" इति सूत्रे काशिका-कायाम्—

कृष्णोदपाण्डुपूर्वायाः भूमेरच् प्रत्ययः स्मृतः ।
गोदावर्याश्च नद्याश्च संख्यायाः उत्तरे यदि ॥

श्लोकं पठित्वा--पाण्डुभूमः, उदग्भूमः, पञ्चनदम्, पञ्चगोदावरम् ।

"भूमेरपि संख्यापूर्वायाः अच् प्रत्ययः इष्यते" द्विभूमः प्रासादः, त्रिभूमः, दशभूमकं सूक्तम् । अन्यत्रापि च इष्यते–पद्मनाभः, ऊर्णनाभः, दीर्घरात्रः, समरात्रः, अरात्रः । तदेतद् सर्वमिह—अच इति योगविभागं कृत्वा साधयन्ति । एते भाष्ये नोक्ताः । इतः पश्चात् काशिकाश्लोकमभिवीक्ष्य सिद्धान्त-कौमुद्याम्—क–कृष्णोदक् पाण्डुपूर्वायाः भूमेरजिष्यते ।

ख–संख्यायाः नदीगोदावरीभ्याम् च ।

इति द्वे वार्त्तिके रचिते । अच इति योगविभागादन्यत्रापि इति लिलेख भट्टोजिदीक्षितः ।

एवम् बहुषु सूत्रेषु काशिकायाः पाणिनिव्याकरणाय योगदानं दरीदृश्यते ।

माहेश्वरसूत्रेषु, अन्यत्र च सर्वत्रापि सूत्राणां पदच्छेदः, समास, उदाहरणानि प्रत्युदाहरणानि, अस्य सूत्रस्य कस्मिन् सूत्रे उपयोगः, एवंविधानि व्याख्यानानि च दृष्ट्वा मोमुदीति ।

'काशिका यदि कण्ठस्था वृथा भाष्ये परिश्रमः' इति वक्तुं मनः सोत्कं भवति । कौमुदी यदि कण्ठस्था वृथा भाष्ये—परिश्रमः, एषोक्तिस्तु असमीचीनैव प्रतिभाति । काशिकायाः गाम्भीर्येण सहैव यत्र-तत्र मनोरमान् श्लोकान् पाठं पाठं पाठकानां मनांसि अवश्यमेव रमन्ते ।

यथा—१–कामक्रोधौ मनुष्याणां खादितारौ वृकाविव ।

२–व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्तितस्य च ।
व्याधयो नोपसर्पन्ति, वैनतेयमिवोरगाः ॥

३–"कर्तुः क्यङ् सलोपश्च" सूत्रे—यत्र वार्तिककारेण "सलोपो वा", "ओजसोऽप्सरसो नित्यम्"

"एकत्र नित्यम् सलोपः, अन्यत्र विभाषया", लिखितानि । तत्रैव काशिकया मनोरञ्जिकया पद्धत्या पठितम्—

ओजसोऽप्सरसो नित्यं पयसस्तु विभाषया ।
सकारस्येष्यते लोपः शब्दशास्त्रविचक्षणैः ॥

श्लोकवार्तिकमुपन्यस्तमेतदपि भाष्ये न दृश्यते । काशिकायां—स्वमज्ञातिधनाख्यायां सूत्रे ज्ञातिप्रतिषेधः किम् ? उदाजह्ले—

धूमायन्त इवाश्लिष्टाः प्रज्वलन्तीव संहताः ।
उल्मुकानीव मेऽमी स्वा ज्ञातयो भरतर्षभ ॥

इति प्रस्तोतुमियेष ॥ एवं सत्स्वपि काशिकाया ह्रासस्य कारणं किम् ? यथोत्तरं मुनीनां प्रामाण्यमिति जुघोष भर्तृहरिः । भट्टोजिदीक्षितः अन्ये च वैयाकरणाः अधमर्णाः काशिकाकर्तु. । किन्तु एकमपि पद्यं प्रशंसायां नालिखन् इति चेखिद्यते चेतः ।

भट्टोजिदीक्षितस्य, अजन्तहलन्तादिसन्धिप्रकरणैः प्रत्ययानुसारिभिः स्त्रीप्रत्यय-कृदन्त-तद्धितान्ततिङन्तसमाससन्नन्तानामधात्वादिप्रकरणानां लेखनेन सौविध्यं जातम् । अनया सरण्या सूत्राणि सुज्ञेयानि जातानि । इमान्यपि कारणानि ह्रासत्वे काशिकायाः भवन्ति ।

गोष्पदी पाणिनिप्रोक्ता याभ्यामापादितो नदः ।
वन्दे मुनिवरौ नित्यं कात्यपुत्र-पतञ्जली ॥१॥
काशिकाबन्धरूपेण याभ्यां संयमितो नदः ।
कोविदं वामनाचार्यं जयादित्यं तथा नुमः ॥

इत्युक्त्वैव विरमाभि इति शम् दिक् च ।

सृष्टेर्मूलतत्त्वस्य यौक्तिकी समीक्षा

डा० रामेश्वरप्रसादत्रिपाठी

प्राध्यापकसंस्कृतविभागे राष्ट्रियस्नातकोत्तरमहाविद्यालयः गोरखपुरस्य

अनन्तकोटिब्रह्माण्डात्मकस्य निखिलप्रपञ्चस्यैकं तन्मूलभूतं तत्त्वं यद् रसपदाभिधेयम्— "रसो वै सः" इति श्रवणात्। रसपदञ्चानन्दबोधकं सुप्रसिद्धमित्यानन्दरूपतैव मूलतत्त्वस्यानया श्रुत्या प्रतिपाद्यते। यद्यपि मूलतत्त्वं निर्विशेषं निर्धर्मकं न केनापि शब्देनाभिलपितुं शक्यमिति सत्यम्, परं शब्दमन्तरेण बोधयितुमशक्यत्वात्कथंचित् कोऽपि शब्दः परिग्राह्य एवेत्यानन्दबोधको "रस" शब्द एवात्र परिगृहीतः। आनन्दस्य सर्वेषामीप्सितत्वादीप्सितत्वं तत्र बोधयितुं प्रयुक्तोऽयं रसशब्दः। आनन्दरूपता च तस्य मूलतत्त्वस्य निम्ननिर्दिष्टयुक्तिभिरुपपाद्या।

१. मूलतत्त्वं तद् ब्रह्म सर्वं जगज्जनयति, किन्तु स्वयं न हीयते। स्वयमक्षतस्य प्रपञ्चोत्पादनं विकास एव स्यात्। विकासश्चानन्द एव सम्भवति इति तस्यानन्दरूपतया रसत्वं सूपपादमेव।

२. जगति सर्वेषां पदार्थानां परस्परमुपकार्योपकारकभावो दृश्यते। परस्परं विरुद्धत्वेन भाव्यमाना अपि पदार्थाः परस्परं साहाय्येन जगच्चक्रं परिचालयन्ति। कालविशेषे ग्रीष्मर्तुप्रभृतिषु देशविशेषे वा उद्रिक्तमग्नेर्बलं जलेनाल्पीक्रियते। तथैव प्रवृद्धा जगत् प्लावयितुमुद्युक्ता आपोऽग्निना शोष्यन्ते। वायोरत्यर्थं प्रवृत्तां गतिं पार्थिवाः—पर्वताद्याः न्यूनीकुर्वन्ति, पृथिव्या जाड्यापरपर्यायामभिनवपदार्थोत्पत्तिप्रतिबन्धिकां चावाञ्छितां स्थितिं वायुर्विधूनयति। स हि पार्थिवानर्थान् जाड्यात् प्राच्याव्य चालयति। एवं विरुद्धाभ्यामपि समीक्रिया जन्यत इत्यनुभूयते। समीक्रिया च शान्तिः, प्रसादः, अक्षोभः इत्यादिनामभिर्व्यवह्रियते। तदेतदानन्दस्य रूपम्। द्विविधो ह्ययमानन्दः—शान्त्यानन्दः, समृद्ध्यानन्दश्चेति। अभिनवपदार्थप्राप्त्यात्मनस्तं स्वस्मिन् प्रवेशयितुं प्रसरणं समृद्ध्यानन्दः। अक्षोभावस्था, समीकरणं, प्रसाद इत्यादि पदवाच्यः शान्त्यानन्दः। सोऽयं शान्त्यानन्द एव मुख्यः। बलवदपि समृद्ध्यानन्दं विहाय शान्त्यानन्दे सुषुप्तौ सर्वेषामभिलाषदर्शनात्। तदेतज्जगत्यनुभूयमानशान्त्यानन्दरूपं कारणमस्यानन्दरूपतामनुमापयति।

३. एवं समृद्ध्यानन्दरूपतापि मूलतत्त्वस्य विचार्यताम्।

"यो वै भूमा, तत्सुखम्, यदल्पं तद्दुःखम्"

इत्याह श्रुतिः। अनुभव सिद्धं चैतत्। यदा कश्चिन्मनुष्यः कञ्चिदभिनवं पदार्थं गृहभूमिवस्त्रसंपदमासादयति, तदा तस्मिन्नपि पदार्थे स्वत्वबुद्धिरुपजायते तमप्यात्मपरिकरे प्रवेशयितुमस्माकं परिच्छिन्नत्वेनाभिमन्यमान आत्मा प्रसरतीति यावत्। बीजचितिः (कारणशरीरम्) देवचितिः (सूक्ष्मशरीरम्) भूतचितिः (स्थूलशरीरम्), प्रजा वित्तं चेति पञ्चसु परिव्याप्तो व्यावहारिकअन्तःकरणावच्छिन्न आत्मा। तस्मात् प्रसरणबलादेव तत्रानन्दप्रतीतिर्भवति लोकानामिति सर्वेषामनुभवगम्योऽयमर्थः। अस्मदायत्तेषु पदार्थेषु कस्यचिदपगमे तु तस्मादात्मा निवर्तते इति संकोचे दुःखानुभवो जायते। तदेवं प्रसरणे आनन्दः, संकोचे तु दुःखमिति सिद्धे यतः परं प्रसरणं नास्ति, तद् भूमपदाभिधेयं विभुत्वं परमानन्द इत्यत्र कः संशयीत ? भूमैव चात्मा-मूलतत्त्वमिति तस्यानन्दरूपता स्फुटमनुभवसिद्धा।

४. यत्र यावती शक्तिः, तावानेव तत्रानन्द इत्यनुभवेन श्रुत्या च सिद्धम्। पश्वाद्यपेक्षया मनुष्ये महती शक्तिरिति मनुष्यः पश्वादीन् यथेच्छमुपयुञ्जानः परमानन्दमनुभवति, घोटकपरिचालने, हस्त्यारोहणे, गवादिदोहने चानन्दस्यानुभूयमानत्वात्। मनुष्येष्वपि च यत्र ज्ञानशक्तिः प्रभुत्व-शक्तिर्धनशक्तिर्वा यावत्यां मात्रायामधिका, तेन तावानेवाधिक आनन्दोऽनुभूयते, तत एव तु तच्छक्ति-संग्रहणाय प्रवर्तन्ते सर्वेऽपि लोकाः।

देवयोनिषु च मनुष्यापेक्षयात्यधिका शक्तिरिति तत्राधिकमानन्दमनुमाय तद्योनिप्राप्तये यागाद्या अनुष्ठीयन्ते। तैत्तिरीयोपनिषद्यानन्दवल्यामपि चैवमेव श्राव्यते—विदुषः बलिष्ठस्य समृद्धस्य परमो मानुष आनन्दः; ततः शतशतगुणिताश्च गन्धर्वादीनामानन्दा इति समृद्धयानन्दस्य तारतम्यं तत्र श्रूयते। शान्त्यानन्दस्तु तैः सर्वैः समः सर्वाधिक इति। "श्रोत्रियस्य चाकामहतस्येति" सर्वैः सह पठ्यते। तदित्थं शक्तिविशेष एवानन्दाविर्भावक इति सिद्धे सर्वशक्तिमतो मूलतत्त्व-स्यानन्तानन्दरूपतायां को विवादावसरः।

५. मृत्युर्हि दुःखस्य पराकाष्ठा। सर्वं कथञ्चित् सोढुं सज्जोऽपि सर्वः प्राणी मृत्युनाम्नैव परमुद्विजते। नास्ति सत्तोच्छेदरूपान्मृत्योरधिकमनिष्टं किमपि जगति, दुःखं चानिष्टमिति परं दुःखं मृत्युः। तद्वैपरीत्येन जीवनपदाभिधेयायाः सत्ताया आनन्दरूपतोक्तप्राया। दुःखविपरीत एवार्थे आनन्द-व्यवहारात्, ततश्च सर्वादिसत्तारूपस्य सर्वत्र सत्तासमर्पकस्य सर्वसत्तानिधानस्य मूलतत्त्वस्य परमानन्द-रूपता कथं न सिद्धा? एवमेव पारतन्त्र्यं नाम परं दुःखम्, शुकसारिकादीनामपि सर्वभोगान् परित्यज्यापि पारतन्त्र्यापनयने प्रवृत्तिदर्शनात्। तथा च तद्विपरीतं स्वातन्त्र्यमानन्दरूपमिति स्फुटीभवत्येव। ततश्च द्वितीयस्य कस्याप्यभावात् पूर्णस्वतन्त्रं तन्मूलतत्त्वं कथं न स्यादानन्दरूपम्।

६. यतो वा इमानि भूतानि जायन्ते, यत्र जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति" इति ब्रह्मपदव्यवहार्यस्य मूलतत्त्वस्य तटस्थलक्षणं श्रावयति श्रुतिः। तदेतल्लक्षणमानन्दे एव घटमानं वीक्षा-महे। सति स्त्रीपुंसोरानन्दे गर्भस्थित्या सर्वेषां प्राणिनामुत्पत्तिदर्शनादानन्दादुत्पत्तिः सिद्धा। न च निरा-नन्दस्य जीवनं सम्भवति, यस्य प्राणिनो जीवने स्तोकोऽप्यानन्दो न स्यात्, तदैव स विपद्यते, आनन्द-लेशेनैव जीवनं धार्यते, अधिकेनानन्देन च जीवनं वर्धत इति यत्र जातानि जीवत्यप्यानन्द एव समन्वेति। किं च प्राणिनां सर्वेऽपि व्यापारा आनन्दप्राप्तय एव प्रवर्तन्ते। तेभ्यः संपदवाप्तिः, तया भोगसाधनानां सम्पादनम्, ततो भोगः, तत आनन्द इति आनन्दावाप्तौ व्यापाराः तत्साधनभूताः प्राणाः, इन्द्रियाणि मन इत्यादि सर्वं तत्रैवानन्दे निमज्ज्य लीनमिव भवति। ततः पुनरपरविधस्या-नन्दस्य प्राप्तये व्यापारः, तस्यापि प्राप्तौ तदर्थव्यापारादीनां पुनस्तत्र लयरूपा निवृत्तिरिति स्फुटं प्रत्यहमनुभूयते, किं नाम व्यापारा एव, व्यापाराविष्टः पुरुषोऽपि तस्मिन्नानन्दे निमग्नः निश्चेष्टप्रायो भवतीति आनन्दमेव प्रयन्त्यभिसंविशंतीत्यप्यनुभवसिद्धम्, ततश्च सर्वमूलब्रह्मलक्षणस्यानन्दे समन्व-यान्मूलतत्त्वमानन्दरूपमेवेति सुस्फुटं सिद्ध्यत्येव।

७. मूलतत्त्वमिदं सर्वस्यापि स्थावरजङ्गमात्मकस्य जगत आत्मभूतम्। "तत्सृष्ट्वा तदेवानु-प्राविशद्"ति श्रुत्युक्तादनुभवसिद्धात् न्यायात्। जीवोऽपि तद्व्यष्टिभूतस्तदात्मक एव। जीवाख्य-स्यात्मनश्चानन्दरूपता वेदान्तग्रन्थेषु प्रसाधिता। यत्सम्बन्धेनानन्दोऽनुभूयते, तत्रैव प्रियत्वदर्शनात्, प्रियत्वं तु सर्वोत्कृष्टमात्मन एव, आत्मसम्बन्धादेव कलत्रमित्रपुत्रादिषु गृहारामादिषु वा प्रियत्वं प्रसरति। अतएव यावत्येषामात्मानुकूल्यं नामात्मानुगामित्वं तावदेव प्रियत्वं स्थितम्, किञ्चिदपि

आत्मप्रातिकूल्यं कदाप्यनुभूतं चेत् तत्क्षणे एव प्रियत्वं निवर्तते। द्वेषस्तत्रैवानुवर्तते, गृहारामादिष्वपि चात्मसम्बन्धरूपस्य स्वत्वस्यापगमे निवर्तत एव प्रियत्वम्। तदेतद् विवृतं बृहदारण्यकोपनिषदि मैत्रेयीब्राह्मणे—

न वा अरे पत्युः कामाय पतिः प्रियो भवति,
आत्मनस्तु कामाय पतिः प्रियो भवति,
न वा अरे जायायाः कामाय जाया प्रिया भवति,
आत्मनस्तु कामाय जाया प्रिया भवति। इत्यादिना।
न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति,
आत्मनस्तु कामाय सर्वं प्रियं भवति॥

इत्यन्तेन ग्रन्थेन।

श्री विद्यारण्यस्वामिनाऽपि चानूदितं पञ्चदश्याम्–"तत्प्रेमात्मार्थमन्यत्र न त्वन्यार्थं इहात्मनि" इत्यादिना।

यत्तु केचिदाक्षिपन्ति—अत्यन्तं स्वार्थपराणां प्रवृत्तेरनुवादोऽयं श्रुत्यादिषु। वस्तुतस्तु प्रेमा तादृशं वस्तु, यद्वशतः स्त्रीमित्राद्यर्थे स्वात्मानं बलिमिवोपहरन्तो दृश्यन्ते बहवः प्रेमपाशनिबद्धाः। समाजप्रेम, देशप्रेम, मातृभूमिप्रेम वा येषु जागर्ति, तेऽपि स्वात्मानं तृणमिवार्पयन्ति। तदर्थं क्व तत्र स्वार्थगन्धः? ततश्चात्मार्थं सर्वमिति केवलं स्वार्थपराणां वच इति। तत्रेदं प्रतिवक्तव्यम्-स्थूलमिदं पश्यन्ति भवन्तः, न तु वैज्ञानिकीं पद्धतिमवलम्ब्यानुभवस्य विश्लेषणेऽवदधति। स्त्रीपुत्र-मित्राद्यर्थे किं तावद्बलीक्रियते। शरीरमेव ननु। तावता त्विदमेव सिद्ध्यति—यत्स्वशरीरापेक्षयापि कलत्रपुत्रादिषु आत्मानुकूल्यं तैरधिकं ज्ञायते। शरीरादान्तराणि इन्द्रियाणि इन्द्रियेभ्य आन्तरं मनः ततोऽभ्यन्तरीभूता बुद्धिः। यच्च यावदान्तरम्, तत्र तावदेव प्रियत्वं प्रसरति। मनसि हि शरीरा-दान्तरेऽधिकतरमात्मनः प्रियत्वम्। मनसश्च वृत्तिः स्नेहपुत्रमित्रकलत्रादिषु। स चेच्छरीरापेक्षया तत्राधिकस्तर्हि शरीरं तदर्थं त्यज्यते तस्मात्तदर्थं शरीरस्य बलीकरणं मनोवृत्त्यर्थमेवेति स्पष्टं फलति। मनसो वृत्तिः स्नेहातिशयो यदि न स्यात्, न कोऽपि तदर्थं शरीरं त्यजेन्नाम। तस्मादात्मनो यदति-सन्निकष्टं, तदर्थं विप्रकृष्टं त्यज्यत इत्यात्मसम्बन्धादेव प्रियत्वमनेन स्थिरीभवति, न तु विपरीतं किमपि। समाजदेशजन्मभूम्यादावपि येषां स्वशरीरापेक्षया स्नेहातिशयः, तदर्थं शरीरं बलीकुर्वन्ति तेसमाजदेशादीनां स्नेहरूपया मनोवृत्त्यातितरामात्मनः सन्निकर्षमाप्तत्वात्। प्रकारान्तरेण वा विचार्यताम्, विभुरयमात्मा अविद्यावशादेवास्माभिः शरीरमात्रे निबद्धः, तस्य क्रमेण विकासोपक्रमोऽयं प्रकृतिसिद्ध एव, यत्कुटुम्बिषु पुत्रमित्रकलत्रादिषु आत्मबुद्धिः, तदनु सर्वस्मिन् कुले, ग्रामे, देशे, सर्वस्यां जन्मभूम्यामन्ततः "उदारचरितानान्तु वसुधैव कुटुम्बकम्" इति न्यायेन सर्वत्र ब्रह्माण्डे आत्मबुद्धिरिति। अपरिच्छिन्नं हि परिच्छेदे नियमितमपरिच्छिन्नतामेव वाञ्छतीति प्रकृतिसिद्धोऽयं नियमः। ततश्च येषां कुटुम्बे, कुले, ग्रामे, देशेजन्मभूम्यां वात्मबुद्धिः प्रसृता ते तदर्थं स्वल्पं शरीरमात्र-मुत्सृजेयुरित्यत्र किं चित्रम्? यस्मादस्ति सर्वत्र स्वार्थबुद्धिरेव, स्वत्वं तैः परिच्छेदान्निस्सार्यं विस्तारं प्रापितमित्येव सूक्ष्मया दृशा दृश्यताम्। तदित्त्थं परमप्रेमास्पदीभूत आत्मा सर्वतः प्रिय इत्यानन्दरूपता तत्र सिद्धा। जीवात्मनश्चाप्यात्मभूतं मूलतत्त्वं परमानन्दरूपमित्यत्र न कोऽपि संशयस्तिष्ठत्।

८. अन्यच्च जागरे स्वप्ने च बाह्येनान्तरेण च प्रपञ्चेन तिरोहितस्वरूप इवायमात्मा सुषुप्तौ सर्वप्रपञ्चविनिवृत्तौ स्वरूपप्रतिष्ठ इति मन्यन्ते शास्त्राणि, अनुभूयते च तथैव। संस्कारशेषतैव तत्र मुक्ताद् विशेषः। सुषुप्तिश्चेयमानन्दरूपा सर्वत्र ख्याप्यते। उत्थितस्य सुखमहमस्वाप्समिति सौषुप्त-सुखपरामर्शात् अननुभूतस्य स्मृत्यसम्भवात्। किञ्च सुषुप्तिमिच्छन् जीवः सर्वपीडाकरपदार्थनिवृत्तये सुखकरसौरभपूर्णमृदुतमशय्यादिसम्पादनाय च यावद्विभवं सर्वोऽपि प्रवर्तते। तेन विषयानन्दमार्गेण परमानन्दरूपायां सुषुप्तौ गन्तुमिच्छतीति सुषुप्तेरानन्दरूपतानुमीयेतैव। सा च सुषुप्तिरात्म-स्वरूपस्यैवाभिव्यञ्जके आत्मानन्द एव तत्रानुभूयेत तेनाऽपि, तदात्मभूतस्य परतत्त्वस्यानन्दरूपत्वं स्पष्टं सिद्ध्यत्येव। इत्थमनेकाभिर्युक्तिभिर्मूलतत्त्वस्यानन्दापरपर्यायरसरूपता समर्थिता।

•

एकं सद्विप्रा बहुधा वदन्ति

प्रो० संगमलालपाण्डेयः

दर्शनविभागाध्यक्षः, इलाहाबादविश्वविद्यालयस्य

आसीत् पुरा दीर्घतमा औचथ्यो नाम ऋषिः। तस्यानुभावः ऋग्वेदे प्रथममण्डले चतुःषष्ट्यु-त्तरशततमे सूक्ते उपलभ्यते। तस्य सूक्तस्य एकं छन्दश्चेत्थम्—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुरिति।

तस्य भावोऽयम्—सद् एकमस्ति किन्तु मनीषिणो विद्वांसस्तस्य वर्णनं बहुप्रकारेण कुर्वन्ति। एकं सद्विप्रा बहुधा वदन्तीति श्रुतिः अद्वैतवादस्य, एकेश्वरवादस्य वा हृदयम्। सा च मानववादस्यापि बीजम्।

किमेकं किं सत् किं बहुवर्णनमिति अत्र प्रश्नत्रयम्। तत्र एकं नाम न संख्याविशेषः। कस्मात्? संख्या नाम कश्चन पदार्थः। किन्तु यत् सदस्ति न च तत् पदार्थः, सर्वात्मकत्वात् अविषय-त्वाच्च। अतः एकं सदिति श्रुतेः सतः यद् एकत्वं सिद्धम् तत् तस्य अद्वयत्वम्, अद्वैतत्वम्, अवि-भागत्वम् वा। यतश्च सतो विभागो नास्ति ततश्च अविभाग एव तस्य लक्षणम्। अविभागत्वाच्च पुनस्तस्य सकलपदार्थबाह्यत्वं सिद्धम्। परमार्थतः तत्पदेन सतः सुष्ठु वर्णनं क्रियते। अतः उक्तं भगवद्गीतायाम्—

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति। तत्पदेन सत्पदेन ओम्पदेन चेति त्रिविधः ब्रह्मनिर्देशः सन्निर्देशो वा। यत् सत् तदेव ओम् यत् तत् तदेव सत्। एवम् तत् सत् ओम् इति पदत्रयम् एकार्थकम्। प्रत्येकं सतो वाचकः।

किं सत् इति प्रश्ने जाते तस्य समाधानरूपेण तत्त्वमीमांसा समुपलभ्यते। यद्यपि तत्त्वमीमांसा विविधा भवति, दृष्टिभेदात्, अभिव्यक्तिभेदाच्च तथापि सा प्राधान्येन द्विविधा, निरपेक्षा सापेक्षा चेति। आद्या ब्रह्मविद्या। अपरा च आन्वीक्षिकी पदार्थमीमांसा वा।

तत्र सर्वं वस्तु सदपेक्षते सच्च न किमपि वस्तु अपेक्षते। सदेव अतो ब्रह्म उच्यते, बृहत्तम-त्वात्, पूर्णत्वादनन्तत्वाच्च। ततः इमानि भूतानि जायन्ते, तेन जातानि जीवन्ति, तत्प्रयन्त्यभि-संविशन्ति। तदेव तज्जलानिति छान्दोग्ये शाण्डिल्यविद्यारूपेण वर्णितम्। अतो निरपेक्षत्वात् सद् ब्रह्म। ब्रह्म च आत्मा। तस्य प्रत्यगात्मरूपानुभवत्वात्। न च ब्रह्म सद् वा इदन्तया वर्णयितुं शक्यते। अहन्तारूपेणैव तस्यानुभवो भवति।

किन्तु सापेक्षत्वात् सद् इन्द्रः, सन् मित्रः, सद् वरुणः, सदग्निः, सद् यमः, सन्मातरिश्वा, एवमादीनि वर्णनानि संभवन्ति। सत् देव उच्यते, दिव्यत्वात्। किं च देवा बहुप्रकारका इन्द्रादयः। परन्तु बहुत्वेऽपि तेषां देवत्वमेकम्। महत् देवानामसुरत्वमेकमिति श्रुतेः। अतएव यो

विष्णुः स एव शिवः। यश्च शिवः स एव विष्णुः। नास्ति भेदः विष्णुशिवयोः। एवं ब्रह्मादयो, इन्द्रादयो देवा अपि सदभिन्नाः। एवमेव रामकृष्णयोरैक्यं बुद्धमहावीरयोरैक्यं च। आराध्यतमत्वम् एकमेव स्वीक्रियते सवः। नेह नानास्ति किञ्चन।

अपरं च यथा देववाण्यां सतो विविधानि नामानि सन्ति तथैव अन्यासु भाषासु अपि सतो विविधानि नामानि लभ्यन्ते। तथा हि—अरबीभाषायां अल्लाह् इति, फारसीभाषायां खुदा इति आंग्लभाषायां गाड् इति, हिब्रूभाषायां योहोवा इति, गाथायाम् अहुरामज्दा इति पदानि जगदीश्वरस्य नामानि। जगदीश्वरश्च एक एव, जगदीश्वरद्वयस्य कल्पनाव्याघातत्वात्। अतो नामभिन्नत्वेऽपि-दैवतस्य सत्ता न भिद्यते। विविधधर्माः विविधदर्शनानि वा सत्प्रापका मार्गाः, तेषां गन्तव्यं चैकं सत्। अतएवोक्तं पुष्पदन्ताचार्यैः,

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रूचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इवेति॥

यथा सर्वा नद्यः सागरं समधिगच्छन्ति तथा सर्वे धर्माः सम्प्रदाया वा एकं भगवन्तं प्राप्नुवन्ति। सर्वे द्रष्टार ऋषय इदमेव मतं प्रतिपादयन्ति। ये चैकं न प्राप्नुवन्ति ते परस्परं विवदन्ते, कलहं च कुर्वन्ति। अतएव दादूभक्तैरुक्तम्—

जे पहुँचे ते पूछिए तिनकी एकै बात
सब साधो का एकमत, बिच के बारह बाट। इति

परमार्थतस्तु आत्मसाक्षात्कारकर्तृभिः ईश्वरलाभकर्तृभिश्च मतैक्यं संप्राप्तम्। इदमेव शंकराचार्यादयो दार्शनिकाः, कबीरादयो भक्ताः, अकबरादयो राजानः, गान्धीप्रभृतयश्च राजनेतारो वदन्ति। आधुनिकयुगे श्रीमदरविन्द-डाक्टरराधाकृष्णन्-डाक्टर-भगवानदास-डाक्टर-रामचन्द्रदत्तात्रेयरानाडेप्रभृतयो भारतीया दार्शनिका अनेनैव सर्वधर्मसमन्वयं सर्वधर्मैक्यं, सर्वधर्मसमभावं वा स्थापयन्ति। अमरीकादेशेषु योरोपदेशेषु च पालट्विचवेलमहाभागैरपि एकङ्कारः संस्थापितः। स च सम्प्रदायविशेषः एकत्वध्यानपरकः। एवं सम्प्रति संपूर्णजगति एकं सद्विप्रा बहुधा वदन्तीति दृष्टेर्महान् प्रचारोऽस्ति। प्राचीनैरपि चोक्तम्—

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्त्तेति नैयायिकाः।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं नो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिरिति॥

अतो धर्मसंघर्षो नोचितः। नासौ धर्मः यः परधर्मं प्रति द्वेषभावं प्रसारयति। यदि इस्लामधर्मावलम्बिनः हिन्दूधर्मं दूषयन्ति, हिन्दूधर्मावलम्बिनो वा इस्लामधर्मं दूषयन्ति, तर्हि ते सर्वे वस्तुतः स्वधर्मं सम्यक् न जानन्ति। परधर्माज्ञानात् सर्वे परधर्मं दूषयन्ति, ज्ञानाच्च तत्र स्वधर्ममेव पश्यन्ति, धर्मतत्त्वस्य सामान्यात् सर्वे धर्माः समानाः। एकं सदेव तेषां सर्वेषामाराध्यदेवः एकं जगत्, एकं मानवतत्त्वं एकश्चेश्वर इति आधुनिकधर्मदर्शनस्य मुख्यं मन्तव्यमस्ति। ये इदं न जानन्ति ते वस्तुतो नाधुनिकाः सन्ति, अपितु प्राचीनरूढिवादस्य ध्वंसावशेषाः विराजन्ते।

पुनः न केवलमेकसद्वादः सर्वदर्शनसमन्वयसूत्रम् सर्वधर्मसमन्वयाधारश्च। अत्र अन्येऽपि बह्वो समन्वयनियमा भारतीयदार्शनिकैराविष्कृताः। प्रथमम्, अधिकारिभेदाद् दर्शनभेद इति नियमाद् आलोकायत-वादवेदान्तपर्यन्तम् सर्वाणि दर्शनानि सर्वदर्शनसंग्रहे माधवाचार्यैः समन्वितानि। द्वितीयं च, यत्परः शब्दः स शब्दार्थ इति नियमात् विज्ञानभिक्षुमहाभागैः सांख्यप्रवचनभाष्ये सर्वदर्शनानां सार्थकता प्रतिपादिता। तृतीयं च, कार्यकारणव्याख्यानात् दर्शनभेद इति प्रस्थानभेदे आचार्यमधुसूदनसरस्वती आह। यथा क्रमेण अहेतुवादः स्वभाववादः हेतुप्रत्ययवादः, आरम्भवादः, परिणामवादः, विवर्तवादश्च कार्यकारणसिद्धान्ताः, तथा तेनैव क्रमेण लोकायतम् आर्हतम्, सौगतम्, न्यायवैशेषिकम्, सांख्यं, वेदान्तं च दर्शनानि। चतुर्थं च, अवस्थाभेदात् दर्शनभेदः। जाग्रतस्वप्नसुषुप्तितुरीयाश्च चतस्र अवस्थाः। प्रत्येकमपि जाग्रतस्वप्नसुषुप्तिभेदात् चतुर्विधम्। एवम् षोडश अवस्थास्तदनुसारतश्च षोडश दर्शनानि। पंचमं च यद्यपि सदेकमेवाद्वितीयमस्ति, तथापि तस्य मात्राभेदा भवन्ति। प्रायः सर्वे दार्शनिकाः सत्यप्रायतां प्राप्नुवन्ति, न सत्यम्, तस्य दुर्लभत्वात् परात्परत्वाच्च। यदि कदाचित् ते तत् प्राप्नुवन्ति तर्हि मौनमेव तैरङ्गीक्रियते। अतोऽवचनं बुद्धवचनमिति महायानबौद्धमतम् सर्वथा समादरणीयम् तत्त्वज्ञानिनः स्वानुभूतिं तन्वते। तस्या निर्वचने न तेषां रुचिः। पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत उपशान्तो हि अयमात्मा इत्यादीनि श्रुतिवाक्यानि अत्र प्रमाणम्।

इदानीं सतो बहुवर्णनं सुस्पष्टं जातम्। किन्तु किं सत् किञ्च वर्णनमिति मूलप्रश्नः पुनरायातः। वर्णनं सतो विकारो विवर्तोवेति अद्वैतवेदान्तिनः। वाचारम्भणं विकारो नामधेयमिति श्रुतेः। वर्णनं वस्तुतः शब्दयोजना अस्ति। शब्दयोजना च विकल्पजा विकल्पश्च शब्दजः। शब्दविकल्पौ मिलित्वापि न सत् स्पृशत इति भदन्तदिग्नागः। तथाहि—

विकल्पयोनयः शब्दाः विकल्पाः शब्दयोनयः।
कार्यकारणता तेषां नार्थं शब्दाः स्पृशन्त्यपि॥

इत्थं सद्वर्णनयोर्महद् अन्तरम्। सच्च परमार्थतोऽवर्णनीयमस्ति।

किन्तु अन्ये इदं न सहन्ते। वर्णनं सन्मूलमस्ति। सच्च वर्णनानुसारि भवतीति तेषां मतम्। तथाहि—शब्द एव ज्ञानकारकः। अत्यन्ते असत्यपि अर्थे शब्दः ज्ञानं करोति इति वाक्यपदीयकारो वदति। ऋषीणामपि यद् ज्ञानं तदपि आगमहेतुकमित्यपि तस्य मतम्। तेन आगमहेतुकं शब्दजन्यं वा सर्वं ज्ञानं भवति। अतोऽनिर्वचनीयत्वेऽपि सतो वर्णनमावश्यकम्। वादे वादे जायते तत्त्वबोध इति न्यायात् प्रत्येकं वर्णनं सत्स्वरूपं यत्किञ्चित् बोधयति। परमार्थतस्तु वर्णनस्य मूलं परा वाक् सा च सदभिन्ना सदात्मा। वैखरी, मध्यमा, पश्यन्ती परा चेति चतुर्विधा वाक्।

चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचं मनुष्या वदन्ति॥

वैखरी वाचं मनुष्या वदन्ति। तस्या बहवो भेदाः। तथापि परा वाक् एकैव। सैव सर्वभाषामूलम्। यथा फलेन मूलमाविष्क्रियते तथा वैखरीवाचा परावाक् ज्ञायते। अनेनैव मार्गेण दृश्यैः दर्शनं, विषयैः सत्, ज्ञेयैः ज्ञानं, देवैः दैवतं, मनुष्यैः मानवत्वं, अनेकैः एकं चाविष्क्रियन्ते।

इत्थं परमार्थतः एकं सत्, एकं दैवतं, एकं ज्ञानं, एकं दर्शनं एकं धर्मतत्त्वं, एकं जगत्, एकं भाषातत्त्वं, एकं मानवतत्त्वं, एकं चात्मतत्त्वमिति अस्माकं विशिष्टं मतम्। यादृशमेकमुपलक्ष्य उक्तमुपनिषत्सु।

इह चेदवेदीदथ सत्यमस्ति, न चेदवेदीत् महती विनष्टिरिति। एकत्वलाभ एव जीवितसाफल्यम्। एकविज्ञानेन सर्वविज्ञानं संभवति। एको भावः सर्वथा येन दृष्टः सर्वे भावाः सर्वथा तेन दृष्टाः। एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुक् भवति। एवमस्ति महिमा एकस्य। अतः तदेव सर्वथा ध्येयम्।

महाभारतदण्डनीतेः कौटिलीयार्थशास्त्रे विकासः

प्रो० अशोकशास्त्री

कलकत्ताविश्वविद्यालयस्य

महाभारते दण्डनीतेः प्राथमिकालोचनमुपलभ्यते। अर्वाचीने काले केषुचन राजनीतिशास्त्रेषु दण्डस्य वैशद्येनालोचनं परिदृश्यते। एषु कौटिल्यकृतमर्थशास्त्रमन्यतमम्।

महाभारते दण्डनीतेः पारिपाटी यथा दृष्टिपथमायाति तथा विश्लेषणमूलकमालोचनमपि विशेषतः शान्तिपर्वणि समुपलभ्यते। कार्त्स्न्येन त्यागो, दीक्षा, देशज्ञानमधिवासिनां भाषाभिः सद् परिचितिरिति सर्वमेव दण्डाधीनम्। यत्र दण्डो नास्ति तत्र वेदस्य न प्राथमिकता, धर्मस्यापि न प्रामाण्यम्। मानवानां निरवच्छिन्ना शान्तिश्चिरन्तनसमृद्धिश्च दण्डेष्वधीना एव। धर्मार्थकामा दण्डं विना साकल्येन स्थातुं न शक्नुवन्ति। किञ्च मोक्षमार्गोऽपि न सुकरो भवेत् यदि दण्डो न प्रचलति। अत एव महाभारतेषु दृश्यते—

सर्वस्य जीवलोकस्य राजधर्मः परायणम्॥
त्रिवर्गो हि समासक्ते राजधर्मेषु कौरव।
मोक्षधर्मश्च विस्पष्टः सकलोऽत्र समाहितः॥

तथा च सत्यत्रेतादीनां युगानां विभागोऽपि दण्डाधीनः। यदि दण्डो न पालयति तर्हि जनाः सर्वे अन्धे तमसि मज्जेयुः। चत्वार आश्रमा ब्रह्मचर्यगार्हपत्यादयः दण्डस्यैव भयात् स्वमतिरिच्य न गच्छन्ति। चतुराश्रमिणो दण्डस्य भयादेव स्वे स्वे वर्त्मनि स्थिताः। धान्यं धनं दण्डेनैव रक्ष्यते। दण्डस्य भयात् सर्वे पापात् विरमन्ति परस्परं च न खाद्यन्ते।

विद्यालाभेऽपि दण्डस्योपयोगित्वं महाभारते बहुधा स्वीकृतम्। यदि कश्चित् दण्डो न पालयेत् तर्हि मानवो विद्यां न प्राप्नुयात्। प्रेष्या वचनं न कुर्युः। बालकोऽपि न पालयेत्, युवती स्वमार्गे न तिष्ठेत्। कन्या उद्वहनं न गच्छेत्।

दण्डाभावे च केवलं मानुषाणामियं विश्रृङ्खला, परन्तु महाभारतकारैः दण्डस्याभावे पशूनामप्युच्चावचावस्था प्रदर्शिता। दृश्यते च—

पशूनां वृषणं छित्वा ततो भिन्दन्ति मस्तकम्।
वहन्ति बहवो भारान् बध्नन्ति दमयन्ति च॥

यदि दण्डो न पाल्येत तर्हि कल्याणी गौः न दुह्येत। उष्ट्रा, बलीवर्दा, अश्वा, अश्वतरा, गर्दभा युक्ता यानानि न वहेयुः। श्वा हविर्लिह्येत् यदि नात्र दण्ड उद्यतो भवेत्. काकः पुरोडाशं हरेत्. श्वापदानि यज्ञार्थानि हवींषि, पशून् मनुष्यांश्च अद्युः। पादपानामपि ईदृशी एव दुरवस्था। इमे अकाण्डे एव शुष्यन्ति। यत्र तत्र येन केनापि पुष्पफलादीनि एभ्यो नीयन्ते। जलस्थानगतं जलमपि शुष्कतां गच्छति।

महाभारते ईदृशं दण्डसम्बन्ध्यालोचनं दृष्ट्वा इदमनुमेयं भवति यत् तदानीं दण्डस्य न केवलमुत्पत्तिः समजायत परन्त्वस्य यथाकथञ्चित् परिपाट्यपि अवर्तत। महाभारते दण्ड इत्यस्य व्युत्पत्तिप्रसङ्गे इत्थं दृश्यते—

यस्माददान्त्यान् दमयत्यशिष्टान् दण्डयत्यपि।
दमनाद्दण्डनाच्चैव तस्माद्दण्डं विदुर्बुधाः॥

यद्यपि महाभारतात् प्राक् यास्कस्तस्य निरुक्ते प्राक्तनानामुपमन्यूनां मतमुद्धृत्य दण्डस्य व्युत्पत्तिं कृतवान् (दण्डो दमनादित्यौपमन्यवः) तथापि महाभारते कथं वा दमनं स्यात् केन वा को वा दण्डय इति वैशद्येन समीक्षितम्। प्रसङ्गेऽस्मिन् महाभारतस्य वैशिष्ट्यं स्वीकर्त्तव्यम्।

महाभारते ब्राह्मणादीनां चतुर्वर्णानां दण्डः केन प्रकारेणानुष्ठेयः तद्विषयकं व्याख्यानम् अस्य कानिचन वैशिष्ट्यानि प्रकटयति। ब्राह्मणानां वाचा एव दण्डः। क्षत्रियाणां च भुजार्पणं दण्डो नाम। वैश्यास्तु दानदण्डाः, तथा शूद्रः निर्दण्डः। नैलकण्ठीये दृश्यते—

भुज्यत इति भुजं भक्तं तन्मात्रार्पणं वेतनप्रदानमित्यर्थः। दानं राज्ञे द्रव्यार्पणम्।

निर्दण्डो दास्यमेव कारयेन्न त्वस्य दण्डोऽपि, "शूद्रं तु कारयेद्दास्यमिति" मनूक्तेः।

एतच्चाल्पापराधे ज्ञेयम्॥

महाभारतकारो दण्डाभावे यथा नैराज्यं स्पष्टीकृतवान् तथा दण्डधराभावेऽप्यस्य चिन्तनं स्फुटं वर्तते। तत्रास्ति—

दण्डश्चेन्न भवेल्लोके विनश्येयुरिमाः प्रजाः।
जले मत्स्यानिवाभक्ष्यन् दुर्बलान् बलवत्तराः॥

व्याख्याकृतामयमाशयः—प्रबलनिर्बलविरोधे निर्बलबाधा मात्स्यन्यायावतारः, अयं प्रायः इतिहासपुराणादिषु दृश्यते। तथा हि वाशिष्ठे प्रह्लादाख्याने तत् समाधिं प्रस्तुत्य उक्तम्—

एतावताथ कालेन तद्रसातलमण्डलम्।
बभूवाराजकं तीक्ष्णं मात्स्यन्यायकदर्थितम्॥

यद्यपीदृशो मात्स्यन्यायो महाभारतात् प्राक् शतपथब्राह्मणे समुल्लिखित आस्ते (तद् यथा—मत्स्य एव मत्स्यं गिलति) तथाप्युल्लेखमात्रमेकं, विस्तृतमालोचनं चान्यत्। शतपथब्राह्मणे मनुमत्स्यकथाप्रसङ्गे मात्स्यन्यायव्याख्या नास्ति, किन्तु महाभारतेऽस्य विश्लेषणं महते सौकर्याय कल्पते। मनुसंहितान्तर्गतं वचनमपि जले बलवत्तरा मत्स्या नाम मत्स्यान् भक्षयन्ति इति महाभारतोक्तिवत् न मात्स्यन्यायं स्पष्टं व्याख्याति। अस्मिन् प्रसङ्गे मनुराह—

यदि न प्रणयेद्राजा दण्डं दण्डेष्वतन्द्रितः।
शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः॥

महाभारते दण्डस्य स्वातन्त्र्यम्, मनोः राज्ञः। महाभारते दण्ड एव कर्त्ता (स्वतन्त्रः कर्त्ता इति नियमात्), मनोः तु नृपस्य एव कर्त्तृत्वमित्यनयोर्महान् भेदः। महाभारतकारस्य यथा दण्डे दृष्टिर्न तथा मनोः। वयं तु मन्यामहे अत्र महाभारतस्यैव प्रभावाः परवर्तिषु स्पष्टं प्रतीयन्ते। पद्मपुराणस्य स्वर्गखण्डस्य बङ्गीये संस्करणे वयं पश्यामः—

परस्परं च खादन्ति सर्वे सर्वमराजकम् ।
न राजा चेन् महाराज पृथिव्यां दण्डधारकम् ॥
शूले मत्स्यानिवापश्यन् दुर्बलं बलवत्तराः ।
अराजकाः प्रजाः पूर्वं विनेशुरवनीपते ।
परस्परं भक्ष्यमाणा जले मत्स्याः कृशानिव ॥

तथा सति दण्डाभावे भिन्नवर्त्मनो जगतः परम्परामिषतया परिध्वंसी मात्स्यो न्यायः प्रवर्तते । प्रसङ्गेऽस्मिन् बंगालदेशस्य पालवंशीयानां कुले जातस्य भारतविख्यातधर्मपालस्य खलिमपुरताम्रलेख उदाहरणत्वेनोपस्थाप्यते । आङ्ग्लीये दशमे शतके बङ्गदेशे दण्डाभावाद् दण्डधराभावाच्च अतीव दुरवस्था समजनि । मात्स्यन्यायः प्रावर्तत । तद्दूरीकरणाय सर्वाः प्रकृतयः समं मन्त्रयित्वा धर्मपालपितरं गोपालमेव तेषां रक्षकरूपेण प्रतिपाद्य घोषयामासुः । उक्तं च तत्र—

मात्स्यन्यायमपोहितुं प्रकृतिभिर्लक्ष्म्याः करं ग्राहितः
श्रीगोपाल इति क्षितीशशिरसां चूडामणिस्तत् सुतः ।
यस्यानुक्रियते सनातनयशोराशिर्दिशामाशये
श्वेतिम्ना यदि पौर्णमासरजनी ज्योत्स्नातिभारश्रिया ॥

दण्डसंक्रान्तं सूत्रं महाभारतादादाय कौटिल्यस्तस्यार्थशास्त्रे विशदीकृतवान् । तन्मते दण्डो यथा शासनं, तथा शासकोऽपि । यद्यपि महाभारते स्पष्टोल्लेखो न लभ्यते तथापि अस्येदृगेवाभिप्राय आसीत् । कौटिल्यमते दण्ड आन्वीक्षिक्यादिविद्याभिर्वर्जितं रक्षतीति तस्यानन्यं गुरुत्वं राजनीतिशास्त्रे तथोक्तं—आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनो दण्डः, तस्य नीतिर्दण्डनीतिः । अलब्धलाभो योगः, लब्धपरिरक्षणं च क्षेमः । अतो दण्डनीतिः "अलब्धलाभार्था लब्धपरिरक्षणा, रक्षितविवर्धनी, वृद्धस्य तीर्थेषु प्रतिपादनी च" इति कौटिल्यस्याशयः । तथा च 'पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्य्यैः प्रस्थापितानि, प्रायशस्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम्' इति । तत्र पृथिव्या इत्यस्यार्थंस्तु चतुर्वर्णाश्रमवत्या हिमवत्समुद्रान्तरवर्तिन्या भूमेरिति । तदुक्तं 'यस्य प्रसराद् भुवनमित्यादिकश्लोकव्याख्यायां जयमङ्गलायां—'भुवनं चतुर्वर्णाश्रमो लोकः' इति ।

एतावद् भूक्षेत्रमेव चक्रवर्तिक्षत्रत्वेन व्यवह्रियते इत्यपि बोध्यम् । 'लाभे पालने च' अत्र नूनं निमित्तार्थकसप्तमी । ईदृशं निमित्तत्वमर्थशास्त्रस्य लाभपालनयोश्च वर्तत इति 'लाभे पालने' च इति सप्तम्या बोध्यते । अर्थादेतदर्थशास्त्रमनुष्ठानपर्यवसायितया चिन्तितं चेत् श्लाघामुत्पाद्य स्थायिलोकसम्मतिलाभपुरःसरं पृथिव्या लाभपालनोपधायकं भविष्यति । अर्थशास्त्राभावे तु व्यापकाभावात् व्याप्यभाव इति न्यायेन लाभपालने न भविष्यतः । तदुक्तं कौटिल्येन—

आन्वीक्षिकीत्रयीवार्ता सती विद्या प्रचक्षते ।
सत्योऽपि हि न सत्यस्ता दण्डनीतिस्तु विप्लवे ॥

लाभो हि करादिग्रहणाद्युपयोगिसत्त्वोत्पादः । पालनं तावत् चतुर्वर्णाश्रमाणां मनस आकर्षणानुकूलो भयनिवृत्तिपोषणादिव्यापारः । तदर्थमिति सप्तम्यर्थः । तस्यार्थशास्त्रमित्यनेन सम्बन्धः । ननु वर्धनं सत्पात्रप्रतिपत्तिश्चार्थशास्त्रे फलत्वेन निर्दिष्टोऽस्ति । तदुक्तं नीतिसारे—

न्यायेनार्जनमर्थस्य वर्धनं रक्षणं तथा ।
सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधम् ॥

तद्ग्रहणं कौटिल्येन कुतो न कृतमिति चेन्न। वर्धनस्य लाभे सत्पात्रप्रतिपत्तेश्च पालनेऽन्तर्भावात्, तदुक्तं नीतिसारव्याख्यायां जयमङ्गलायां 'तस्यार्जनं त्रिविधं नवं भूतपूर्वं पित्र्यं च'। रक्षणमपि द्विविधं—स्वेभ्यः परेभ्यश्च। ननु रक्षितविवर्धनं वृद्धस्य तीर्थंप्रतिपादनमपि गुणवति पुत्रे निक्षेपो वाश्वमेधादौ विनियोगो वा। तदुभयमपि सर्वथा रक्षणमेव। मनुरप्याह—

अलब्धमिच्छद् दण्डेन लब्धं रक्षेदवेक्षया।
रक्षितं वर्धयेद् वृद्धया वृद्धं दानेन निक्षिपेत्॥

किन्तु दण्डस्य तारतम्यप्रसङ्गे महाभारतकारो यद्यपि मौनमेव अवलम्बते कौटिल्यस्तु दण्डस्य भागनिरूपणे तारतम्ये च यथोपयुक्तां दृष्टिं दत्तवान्। स तस्य सुचिन्तितमभिमतमभिव्यनक्ति—तीक्ष्णदण्डो हि भूतानामुद्वेजनीयः, मृदुदण्डः परिभूयते, यथार्हदण्डः पूज्यः इति। सर्ववर्णाश्च दण्डाभावे दुष्येयुरिति तस्याशयो महाभारतानुसारी एव। किन्तु सर्वसेतवो भिन्देरन् इत्यादिकं नूतनमिव प्रतिभाति। किमिमे साधारणसेतवो नद्या उपरि यानादिगमनागमनार्थं निर्मीयन्ते, अथवा कामक्रोधादीनां बन्धनाय काचन मानसिकी शैली विरचनीया इति तस्य संकल्प इति सन्देहो जायते। यतो हि कामक्रोधादीनां जये निराकरणे एव कौटिल्यस्य न लक्ष्यं, परन्तु एतेषां यथोपयुक्तसन्मिश्रीकरणेन पार्थिवसुखादीनि लभ्यन्त इत्यत्र कौटिल्यस्यौदासीन्यं नास्ति। वयं जानीमहे—'धर्मार्थकामाः सममेव सेव्याः, यो ह्येकसक्तः स जनो जघन्यः' इति। दण्डाभावे एषां यस्य कस्याप्येकस्य प्राबल्ये सुखं दुरापहतं शान्तिश्च व्यपगता भवेत्।

कौटिल्यो महाभारतात् बीजं गृहीत्वा तत् द्रुमरूपेण स्थापयति स्म। दण्डस्य ज्ञानेनैव हि इष्टसिद्धिर्जायेत। शास्त्रादीनामध्ययनमात्रेण राज्ये महत् फलं नावलोक्यते; किन्तु दण्डस्य यथावद्भावेन प्रयोगोऽप्यत्रापेक्ष्यते। यथा दण्डनीतेरध्ययनेन प्रयोजनं तथा दण्डविद्यायाः प्रयोगोऽपि महते इष्टाय कल्पते। अत एव कौटिल्येनोक्तम्—"सुविज्ञातप्रणीतो हि दण्डः प्रजा धर्मार्थकामैर्योजयति।" अत्र सु इत्युपसर्गस्य न केवलं विज्ञातमित्यनेन सहान्वयः करणीयः, परन्तु देहलीदीपन्यायेन प्रणीत इत्यत्रापि अस्योपयोगो विद्यते। दण्डो यथा सुविज्ञातो भवेत् तथा सुप्रणीतोऽपि स्यात्। एतेनैव प्रजानां मङ्गलमिष्टसाधनञ्च। महाभारते दण्डस्य ज्ञाने यादृशं महात्म्यं व्याख्यातं, न तथा अस्य सुष्ठुप्रयोगे। अस्य ज्ञानस्योपयोगित्वं बहुधा आलोचितं तत्र। दण्डनीत्यां प्रणीतायां सर्वे सिध्यन्त्युपक्रमाः' (शान्ति-२५/२६) केवलमत्रैव दण्डप्रणयनस्योल्लेखः। तथापि नात्र सुप्रणयनस्यावयवः दुष्प्रणयने दोषा वा कीदृशा इत्यत्रापि महाभारते स्पष्टतया नोल्लिखितम्। किन्तु अस्मिन् प्रसङ्गे कौटिल्यः स्वमतं स्पष्टं व्याख्यातवान्—

'दुष्प्रणीतः कामक्रोधाभ्यामज्ञानाद्वानप्रस्थपरिव्राजकानपि कोपयति, किमङ्ग पुनर्गृहस्थान्।' अत्र दुष्प्रणीतेन दण्डेन यथा गृहस्थाः कुप्यन्ति तथा परिव्राजकानामपि कोपः। वस्तुतस्तु गृहस्थाः कामक्रोधासक्ताः। दुष्प्रणीतात् दण्डात् तेषां कोपः स्वाभाविक एव। किन्तु परिव्राजकाः सर्वत्यागिनः रागद्वेषविनिर्मुक्ताः दण्डे दुष्प्रणीते तेषामपि कोपः। आदौ कौटिल्येन दण्डस्य सुविज्ञातत्वं सुप्रणीतत्वं निर्णीतम्। अधुना ज्ञानस्य दुर्विज्ञानस्य वा यद्यपि नोल्लेखस्तथापीदमवश्यमेवानुमातव्यम्। अर्थात् ज्ञाने प्रयोगे दण्डस्य सर्वतः शान्तिः अज्ञानपूर्वके दुष्प्रयोगे मात्स्यन्यायावतारः।

अतोऽस्माकमयमाशयः—महाभारतीया या दण्डनीतिरङ्कुररूपेण परिदृश्यते तस्याः कौटिलीये अर्थशास्त्रे समृद्धिः विकासश्च प्रतीयते। यत्र कुत्रापि अनयोर्वैमत्यमत्र स्पष्टतया विश्लेषणपूर्वकं व्याख्यानमेव कारणं नान्यत्।

नाशुभः कोऽपि वासरः

आचार्यहरिहरपाण्डेयः

मनोबलम्—मनोबलादेवार्यावर्तवासिनोऽस्मत्पूर्वजास्त्रिविष्टपचीनब्रह्मदेशवियतनामयवद्वीप-सुमात्राचम्पानगरीश्यामदेशेण्डोनेशियादिपर्यन्तमार्यसंस्कृतेः प्रसारं कृत्वा समेषां पूज्या अभूवन्। मनोबलादेवाल्पभटोपेता विदेशीयाः सिकन्दरगोरीगजनवीतैमूरनादिरबाबरपुर्तगीजडचफ्रांसीसी-अङ्ग्रेजप्रभृतयो वैदेशिकाः सुदूरदेशात् समुद्रांस्तीर्त्वा पर्वतानुल्लंघ्यात्रागत्यास्माकं देवप्रियाणां ब्राह्मणानां दिग्विजयिनां क्षत्रियाणां धनाधीशवैश्यादिकानां चासंख्यशिरांसि छित्वा धर्मपरिवर्तनं कृत्वा देव-मन्दिराणि विनाश्य चिराय शासनं कृतवन्तः। मनोबलादेव राणाप्रतापसिंहो नूत्नास्त्रशस्त्रैः सुसज्जि-ताया एकलक्षासन्नमुगलसेनाया मध्ये प्रविवेश। मनोबलादेव शिवाजीरणजीतसिंहादयो महावीरा अल्पतमसैनिकान्विता एव विशालशत्रुसेनोपरि विजयं प्राप्तवन्तः। मनोबलादेव शस्त्रास्त्रविहीना तिलकगांधीलाजपतसुभाषरासविहारीभगतसिंहचन्द्रशेखरादयो महामानवाः समग्रभूमण्डले विख्याता-नाङ्ग्लान् भारतभूमितो निष्कासितवन्तः। मनसः क्लिष्टवृत्तीर्निरुध्य मनोबलादेव योगिनो योगसिद्धी-राप्नुवन्ति, नेन्द्रियबलात्। अत एव भगवता गीतायामुक्तं—इन्द्रियाणां मनश्चास्मि। वदन्ति च विपश्चितः—

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
मन के हारे हार है मन के जीते जीत॥

मनसः शुद्धिं विना कस्यापीन्द्रियस्य धनादिपदार्थानां च शुद्धिर्न संभवति। मनःशक्तिविषये श्रीमद्भागवते (११।२३) योगेश्वरेण भगवता श्रीकृष्णेन द्विजमुखादुक्ता इमा महत्त्वपूर्णा उक्तयः प्रतिपदं चिन्त्याः सन्ति।

नायं जनो मे सुखदुःखहेतुर्न देवतात्माग्रहकर्मकालाः।
मनः परं कारणमामनन्ति संसारचक्रं परिवर्तयेद् यत्॥
मनो गुणान् वै सृजते बलीयस्ततश्च कर्माणि विलक्षणानि।
शुक्लानि कृष्णान्यथ लोहितानि तेभ्यः सवर्णाः सृतयो भवन्ति॥
अनीह आत्मा मनसा समीहता हिरण्मयो मत्सख उद्विचष्टे।
मनः स्वलिङ्गं परिगृह्य कामान् जुषन्निबद्धो गुणसंगतोऽसौ॥
दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि।
सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मनसः समाधिः॥
समाहितं यस्य मनः प्रशान्तं दानादिभिः किं वद तस्य कृत्यम्।
असंयतं यस्य मनो विनश्यद् दानादिभिश्चेदपरं किमेभिः॥
मनोवशेऽन्ये ह्यभवंश्च देवा मनश्च नान्यस्य वशं समेति।
भीष्मो हि देवः सहसः सहीयान् युञ्ज्याद् वशे तं सहि देवदेवः॥

तं दुर्जयं शत्रुमसह्यवेगमरुन्तुदं तन्न विजित्य केचित् ।
कुर्वन्त्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून् विमूढाः ॥
ग्रहा निमित्तं सुखदुःखयोश्चेत् किमात्मनोऽजस्य जनस्य ते वै ।
ग्रहैर्ग्रहस्यैव वदन्ति पीडां क्रुध्येत कस्मै पुरुषस्ततोऽन्यः ॥
कालोऽस्ति हेतुः सुखदुःखयोश्चेत् किमात्मनस्तत्र तदात्मकोऽसौ
नाग्नेर्हि तापो न हिमस्य तत् स्यात् क्रुध्येत कस्मै न परस्य द्वन्द्वः ॥

मनो दैवं, हृत्प्रतिष्ठं, ज्योतिषां ज्योतिः, प्रज्ञानस्वरूपं, अमृतं ज्योतिः, त्रिकालज्ञं, सर्वज्ञं, सर्वयज्ञरक्षकं, जविष्ठं, अजिरादिकं चास्ति । तेन सर्वं भूतवर्तमानभविष्यं सम्यग् गृहीतमस्ति, रथनाभौ अरा इव तस्मिन् सर्वे वेदाः प्रतिष्ठिताः सन्ति, तस्य निर्बलत्वे मनुष्यो नैकमपि महत्कर्म कर्तुं शक्नोति । अत एव वेदा इमान् मनसोऽद्भुतगुणान् वर्णयन्तस्तस्य शिवत्वं वाञ्छन्ति । तत्र मन्त्राः—

यज्जाग्रतो दूरमुदैति दैवं····दूरंगमं ज्योतिषां ज्योतिः, यस्मिन्नृचः सामयजूंषि, यस्मिन् प्रतिष्ठिता रथनाभाविवाराः, यस्मिंश्चित्तं सर्वमोतं प्रजानां, यदपूर्वं यक्षमन्तः प्रजानां, यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु, येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वं, यस्मान्न ऋते किंचन कर्म क्रियते, सुषारथिरश्वानिव यन्मनुष्यान्नेनीयते, हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ।

'अभयं सत्त्वसंशुद्धिः' इति वदता भगवता श्रीकृष्णेन गीतायां (१६।१) दैवी सम्पदां मध्येऽभयं प्रथमः सर्वश्रेष्ठश्च गुणः कथितः । भगवती श्रुतिरपि नृणामभ्युदयाय तस्य नितरामावश्यकत्वं मनुते । अत एव मानसं बोधयति—

यथा द्यौश्च पृथिवी च न बिभीतो न रिष्यतः । एवा मे प्राण मा बिभेः । यथाऽहश्च रात्री च न बिभीतो न रिष्यतः । एवा मे प्राण मा बिभेः । यथा सूर्यश्च चन्द्रश्च न बिभीतो न रिष्यतः । एवा मे प्राण मा बिभेः । यथा ब्रह्म च क्षत्रं च न बिभीतो न रिष्यतः । एवा मे प्राण मा बिभेः ॥ (अथर्ववेद २।१५।४)

वेदोपनिषद्गीतादिविज्ञानग्रन्थव्रजोऽद्वैतवादश्च भूयो भूय उद्घोषयति यत्त्वं साक्षात् शिवोऽसि । तस्मात्तुच्छपदार्थेभ्यो मा बिभिहि—

ईशावास्यमिदं सर्वं, ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति, येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि, शिवोऽहं, सोऽहम् । योगवासिष्ठो ब्रवीति—

सर्वस्यैव जनस्यास्य विष्णुरभ्यन्तरे स्थितः ।
भोक्तारं सर्वभोगानां देहस्थं चिन्तयेच्छिवम् ॥

तथापि दौर्भाग्यात् साम्प्रतमस्माकं दैवानि, प्रज्ञानस्वरूपाणि, शिवानि, अमृतानि, अभयानि, शिवस्वरूपाणि मनांसि आसुराणि, मूढानि, विषाक्तानि, विविधभयाक्रान्तान्यशिवानि च संजातानि सन्ति । अस्माकं मनःसिंहा मूषकेभ्यो बिभ्यति । न ह्येतावदेव, शिवस्वरूपा वयं तेभ्यः काल्पनिकपदार्थेभ्योऽपि विभीताः स्मो येषां त्रिलोक्यां कुत्रापि सत्तैव नास्ति । यैरुत्तममध्यमाधमवरुणपाशैर्निबद्धाः सन्तो विभीताः स्मस्तेषामेकमस्ति होराशास्त्रम् । तत् काल्पनिकमपि, वैदेशिकमपि,

निराधारमपि, वेदविरुद्धमपि मोहादस्माभिर्वेदाङ्गं मत्वा कण्ठे निबद्धमस्ति। तद्विषये श्रीवराहमिहिराचार्योऽवादीत्।

म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्।
ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद् द्विजः॥

होराशब्दोऽस्मत्संस्कृतकोशेषु कुत्रापि नो लभ्यते। जानन्ति च विपश्चितोऽमुं HOUR संज्ञकाद् यवनशब्दादुत्पन्नम्। सन्त्यस्य शास्त्रस्य प्राणसमाः क्रियताबुरिजितुमलेयजूककौर्प्याकोकेरोदुफालिदुरुष्फानफासुनफाप्रभृतयोऽनेके शब्दाः। तस्मात्तस्य परकीयत्वं स्पष्टम्।

उदारचरिता महात्मानः सम्पूर्णां वसुधां कुटुम्बं मत्वा सर्वेषां ज्ञानं सादरमङ्गीकुर्वन्ति। अस्माभिरपि तथैव रेलमोटरप्रेसविद्युत्कम्प्यूटरादयो गृहीताः परञ्च दुर्दैवतो वैदिकं ज्योतिषपीयूषं परित्यज्य प्रत्यक्षविरुद्धं विदेशीयहोराहालाहलमपि तथैवादृतमस्ति यथा महाशय, तात, मातः, भ्रातः, स्वसः, वत्स, वत्से, भद्रे, कल्याणिप्रभृतिसुसम्बोधनानि तिरस्कृत्य सर, मैडम, सिस्टर, पापा, मम्मी, गुड्डू, गुड्डी, पिंकू, पिंकी, प्रभृतीनि कुचोद्यानि समादृतानि सन्ति।

भारते पूर्वं सूर्यादयो वासरा नासन्। प्राचीनग्रन्थेषु रामकृष्णबुद्धादीनां जन्मकालीनमासपक्षतिथिनक्षत्रयामादयः सर्वत्र लिखिताः सन्ति किञ्च वासरः कुत्रापि नोदितः। परन्तु वयमेतर्हि तेजोनिधेः शुक्रग्रहस्य वासरे पश्चिमदिशि गमनेऽतितरां बिभीमः। तस्य दिक्शूलत्वात्। होराभक्तानामस्माकं मनःस्वेषा दृढा प्रतीतिः संजातास्ति यत् शुक्रे पुरः स्थिते दक्षिणस्थे वा पतिगृहं गता वनिता वन्ध्या भविष्यति, गर्भिण्या गर्भपातो भविष्यति, सपुत्रायाश्च पुत्रो नूनं मरिष्यति। सा महिला शुक्रस्य विपरीतदिगभिमुखी गृहकार्यं करोति, नदीं आपणं विद्यालयं वा याति तदा तां शुक्रो न बाधते परञ्च पतिगृहगमने केवलं हिन्दूनां वनिताः पीडयति। शुक्रं प्रत्यहमाकाशस्य प्रदक्षिणां कुर्वन्तं दृष्ट्वापि वयं तमेकस्यां दिशि ध्रुववत् दशमासपर्यन्तं स्थिरं मनुमहे।

'प्रत्यक्षं ज्यौतिषं शास्त्रं' इत्युद्घोषयद्भिर्वैदिकज्योतिर्विद्भिः वर्षायनगोलर्तुमासपक्षतिथिनक्षत्रादिकानि तान्येव कालमानानि स्वशास्त्रे व्यवहृतानि येषामाकाशेन सह प्रत्यक्षसम्बन्धो वर्तते। अत एवाऽस्मत्प्राचीनग्रन्थेषु प्रभूतज्यौतिषप्रसङ्गसत्त्वेऽपि वाराणां राशीनां च नामानि न सन्ति।

'तदानीं कस्मिंश्चिदपि कालमानेऽशुभत्वभयं नासीत्' एतं पूर्वपक्षं संक्षेपादुपपाद्य वारमीमांसां करिष्ये।

वयं साम्प्रतं कृतयुगं नितरां शुभमन्यानि च त्रीणि युगानि क्रमशोऽशुभतराणि मन्यामहे परं च वैदिकसाहित्ये युगानां वर्षात्मकं कालपरिमाणं नास्ति। युगान्यस्माकं मनःसु तिष्ठन्ति। उक्तञ्चैतरेयब्राह्मणे, भागवते, रामायणे च—

कलिः शयानो भवति संजिहानस्तु द्वापरः।
उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरन्। चरैवेति॥
सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः।
कालसंचोदितास्ते वै परिवर्तन्त आत्मनि॥
प्रभवन्ति यदा सत्त्वे मनोबुद्धीन्द्रियाणि च।
तदा कृतयुगं विद्याज्ज्ञाने तपसि यद् रुचिः॥

यदा कर्मसु काम्येषु भक्तिर्भवति देहिनाम् ।
तदा त्रेता रजो वृत्तिरिति जानीहि बुद्धिमन् ।।
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः ।
कर्मणां चापि काम्यानां द्वापरं तद् रजस्तमः ।।
यदा मायाऽनृतं तन्द्रा निद्रा हिंसा विषादनम् ।
शोको मोहो भयं दैन्यं स कलिस्तामसः स्मृतः ।। (भागवत १२।३)

अस्यानुवादः—

नित युगधर्म होहि सब केरे । हृदय राममाया के प्रेरे ।
शुद्ध सत्त्व समता विज्ञाना । कृत प्रभाव हरषित मन जाना ।।
कछु रज अधिक सत्त्व रतिकर्मा । सब विध सुख त्रेता कर धर्मा ।।
बहुरज स्वल्प सत्त्व कछु तामस । द्वापर हर्ष शोक भय मानस ।।
तामस बहुत रजोगुण थोरा । कलि प्रभाव विग्रह चहुँ ओरा ।।

पश्यामश्च कृतादिष्वपि मनुजादान्, हिरण्याक्षरावणकंसादीनथ च प्रभूतराक्षसान् । कलौ च बुद्धशंकरसदृशाननेकान् साक्षात् धर्ममूर्तीन् मानवान् । आधुनिकहोराशास्त्रे षष्टिसंवत्सरात्मकयुगस्यार्धाधिको भागोऽशुभोऽस्ति । क्वचित् क्वचिद् द्वित्रिचतुःसंवत्सरा निरन्तरमशुभाः सन्ति परं च पञ्चसंवत्सरात्मकस्य वैदिकयुगस्य न कोऽपि संवत्सरोऽशुभो वर्तते । ब्राह्मणग्रन्थानामुपनिषदां च मते सम्पूर्णो वत्सरो वत्सलः प्रजापतिरस्ति, तस्य दक्षिणोत्तरयाने ब्रह्मणो देहस्य दक्षिणवामपार्श्वे स्तः, ऋतवश्चाङ्गानि सन्ति । राशीनामभावात् तत्र खलमास शब्द एव नास्ति, न च हरिश्चतुरो मासान् शेते । १. मधुमाधवादीनां २. चैत्रवैशाखादीनां ३. वाजप्रसवादीनां ४. केशवमाधवादीनां ५. अरुणारुणरज आदिकानां मासानां षष्टिभारतीयनाम्नां मध्ये नैकमपि अभद्रं वर्तते (द्रष्टव्यं वाजसनेयिसंहितायां महीधरभाष्यम्) ।

गीतायामयनविषये यदुक्तं तत्रेदं चिन्त्यं—अग्निर्ज्योतिर्धूमादयः शब्दा न कालवाचकाः । दक्षिणायनेऽपि शुक्लपक्षा दिवसाश्च सन्ति । उत्तरायणेऽपि कृष्णपक्षा निशाश्च तिष्ठन्ति । उभयोरयनयोः प्रकाशस्य तमसश्च पलान्यपि समानानि भवन्ति । तस्मान्नास्ति दक्षिणायनमशुभं न च कृष्णपक्षो निषिद्धः उभयोः पक्षयोः प्रकाशतमसोः समानत्वात् ।

होराशास्त्रे सूर्यः पापग्रहस्तस्य वासरश्च पापवासर उक्तः परञ्च वेदपुराणमते सूर्य एव विष्णुः । वेदो ब्रवीति—इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । भागवतं ब्रूते—

एक एव हि लोकानां सूर्य आत्मादिकृद्धरिः ।
सर्ववेदक्रियामूलमृषिभिर्बहुधोदितः ।।
मध्वादिषु द्वादशसु भगवान् कालरूपधृक् ।
लोकतन्त्राय चरति पृथग् द्वादशभिर्गणैः ।।

अतः कस्मिंश्चिदपि मासेऽशुभत्वाशङ्का होराशास्त्रस्याज्ञानमेव ज्ञेयम् । द्वादशमासानां रक्षणे ह्येते द्वादशादित्या नागा यक्षा ऋषयो गन्धर्वादयश्च नियुक्ताः सन्ति (भागवतं १२।७) ।

मासानां संरक्षकाः

मासाः	सूर्याः	अप्सरसः	राक्षसाः	नागाः	यक्षाः	ऋषयः	गन्धर्वाः
मधुः	धाता	कृतस्थली	हेतिः	वासुकिः	रथकृत्	पुलस्त्यः	तुम्बरुः
माधवः	अर्यमा	पुंजिकस्थली	प्रहेतिः	कच्छनीरः	अथौजाः	पुलहः	नारदः
शुक्रः	मित्रः	मेनका	पौरुषेयः	तक्षकः	रथस्वनः	अत्रिः	हाहा
शुचिः	वरुणः	रंभा	चित्रस्वनः	शुक्रः	सहजन्यः	वसिष्ठः	हूहू
नभः	इन्द्रः	प्रम्लोचा	वर्यः	एलापत्रः	श्रोता	अङ्गिरा	विश्वावसुः
नभस्यः	विवस्वान्	अनुम्लोचा	व्याघ्रः	शङ्खपालः	आसारणः	भृगुः	उग्रसेनः
इषः	त्वष्टा	तिलोत्तमा	ब्रह्मापेतः	कम्बलः	शतजित्	जमदग्निः	धृतराष्ट्रः
ऊर्जः	विष्णुः	रंभा	मखापेतः	अश्वतरः	सत्यजित्	विश्वामित्रः	सूर्यवर्चाः
सहस्	अंशुः	उर्वशी	विद्युत्शत्रुः	महाशङ्खः	तार्क्ष्यः	कश्यपः	ऋतसेनः
सहस्यः	भगः	पूर्वचित्तिः	स्फूर्जः	कर्कोटकः	ऊर्णः	आयुः	अरिष्टनेमिः
तपः	पूषा	घृताची	वातः	धनंजयः	सुरुचिः	गौतमः	सुषेणः
तपस्यः	पर्जन्यः	सेनजित्	वर्चाः	ऐरावतः	क्रतुः	भरद्वाजः	विश्वः

द्रष्टव्यानि चैतानि मासस्याङ्गानि—तैत्तिरीयब्राह्मणे वर्षस्य द्वादशशुक्लपक्ष–द्वादशकृष्णपक्ष-नामानि—पवित्रं पवयिस्यन् पूतो मेध्यो यशो यशस्वानायुरमृतो जीवो जीविष्यन् स्वर्गो लोकः। सहस्वान् सहीयान् ओजस्वान् सहमानो जयन्नभिजयन् सुद्रविणो द्रविणोदा आर्द्रपवित्रो हरिकेशो मोदः प्रमोदः। नात्रैकमपि नाम निन्द्यम्। तस्मान्न कोऽपि पक्षोऽस्त्यशुभो न च मासः।

वेदमते न कापि तिथिरशुभा, न कोपि दिवसो मुहूर्तश्च भयावहोऽस्ति। अस्य प्रबोधायैतानि नामानि चिन्त्यानि। शुक्लकृष्णपक्षीयत्रिंशद्दिवसाः—संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत् संकल्पमानं प्रकल्पमानमुपकल्पमानमुपक्लृप्तं क्लृप्तं श्रेयोवसीय आयत् संभूतं भूतम्॥ प्रस्तुतं विष्टुतं संस्तुतं कल्याणं विश्वरूपं शुक्रममृतं तेजस्वि तेजः समृद्धमरुणं भानुमन्मरीचिमदभितपत्तपस्वत्॥

त्रिंशद्रात्रिनामानि—दर्शा दृष्टा दर्शता विश्वरूपा सुदर्शना आप्यायमाना प्यायमाना प्याया सूनृतेतरा आपूर्यमाणा पूर्यमाणा पूरयन्ती पूर्णा पूर्णमासी॥ सुता सुन्वती प्रसुता सूयमानाभिषूयमाणा पीती प्रपा सम्पा तृप्तिस्तर्पयन्ती कान्ता काम्यायुष्मतीकामदुघा॥

तस्मादुपपन्नं—गणेशरामशिवानामवतारतिथयो ४,९,१४ न रिक्ताः, न च कामदुघाऽमावास्या निन्द्या, न चान्या काऽपि तिथिरशुभा। तैत्तिरीयब्राह्मणेनास्योपसंहारे लिखितम्—

"यो ह वाऽहोरात्राणां मासानामर्धमासानां च नामधेयानि वेद, स नैतेष्वार्तिमार्च्छति। य एवं वेद।"

नूतनहोराशास्त्रमते सुरज्येष्ठस्येन्द्रस्य नक्षत्रं ज्येष्ठा, देवदेवस्य शम्भोर्नक्षत्रमार्द्रा तीक्ष्णं दारुणं चास्ति। अग्निदेवस्य नक्षत्रं कृत्तिका (यस्माद् वेदे नक्षत्रारम्भो भवति) सर्वशुभकर्मसु गर्हितमस्ति। इन्द्राग्न्योः प्रियाया राधाया अपीयमेव स्थितिः। देवगुरोर्नक्षत्रे पुष्ये विवाहो न भवति। भगवसुवरुणादीनां नक्षत्राण्यप्यशुभानि सन्ति। भरण्यार्द्राभद्रा अपि अभद्राः संजाताः सन्ति। परञ्च वस्तुतो दक्षकन्या द्विजराजस्य सोमस्य भार्या अस्माकं मातरः सर्वास्तारा: शुभाः सन्ति (कालो निराकारो भवति परं च मुहूर्तचिन्तामणिपीयूषधारायां भद्राया भीषणाकृतिः प्रदर्शितास्ति) जिज्ञासुभिः सत्यज्ञानार्थं सायणभाष्योपेततैत्तिरीयसंहिताब्राह्मणयोः स्वाध्यायः कर्तव्यो नक्षत्रविषये।

वारसमीक्षा

सूर्यचन्द्रयोरुदयं किंवा रात्रौ केवलमाकाशं विलोक्य सामान्योऽपि ज्योतिर्विद् गोलमयनमृतुं मासं पक्षं तिथिं, ग्रहाणां नक्षत्राणि च ज्ञातुं शक्नोति परञ्च महापण्डितोऽपि न वारान्। तेषां गगनेन सह सम्बन्धाभावात् काल्पनिकत्वाच्च। चन्द्रमाः सप्तविंशतिदिवसैर्नक्षत्रमण्डलस्यैकां प्रदक्षिणां करोति तस्माद् भारतीयमुनिभिः २७ नक्षत्राणि स्वीकृतानि। चन्द्रमसः पूर्णत्वं क्षयत्वं च पञ्चदश पञ्चदशदिवसैरायाति तस्मादेकस्मिन् मासे ३० तिथयः स्वीकृताः। एकस्मिन् सौरवर्षे चन्द्रो १२ वारं पूर्णो भवति तस्मात् द्वादशमासाः स्वीकृताः परञ्च 'वासराः किमर्थं सप्त' नास्त्यस्य प्रश्नस्यैकमपि युक्तियुक्तमुत्तरम्।

पाश्चात्येभ्यो वारग्रहणावसरे दूरदर्शिभिरस्मन्मुनिभिः फ्रेयावेडनप्रभृतिपाश्चात्यदेवीदेवान् हित्वा वारेभ्यो ज्योतिःपुञ्जजानां मञ्जुलानां पूज्यानां च सप्तग्रहाणामभिधानानि प्रदत्तानि।
तस्मादादौ नासीत् कोऽपि वासरः पापः। प्राचीनकाले भारतीयाः पाश्चात्याश्च ज्योतिर्विदो शनिः
ग्रहसंस्थानविषये एतन्मन्यन्ते स्म यत् चन्द्रबुधशुक्रादयोऽनेन क्रमेण भूमिं परितो गुरुः
भ्रमन्ति। पाश्चात्यैरेकस्मिन्नहोरात्रे चतुर्विंशतिहोराः कल्पिताः परञ्चास्यां संख्यायां भौमः
कश्चिन्महत्त्वपूर्णो हेतुर्न वर्त्तते। शनिवासरे प्रथमहोरायाः स्वामी शनिः स्वीकृतः। सूर्यः
अग्रे द्वितीयाया गुरुस्तृतीयाया भौमः सप्तम्याश्च चन्द्रः स्वामी कथितः। एवं शुक्रः
शनिवासरे १४, २१ होरयोरपि चन्द्रः। २२, २३, २४ होराणां शनिगुरुभौमाः बुधः
स्वामिनो भवन्ति। ततो द्वितीये दिवसे प्रथमा होरा रवेर्भवति। तस्माच्छनेरनन्तरं चन्द्रः
रविवासर आयाति। एवमेव चन्द्रादय आयान्ति। पृथ्वी

मनसो विकृतत्वात् कालान्तरेऽस्मद्देशे रविभौमशनिग्रहास्तेषां वासराश्च पापाः संजाताः। चन्द्रोऽर्धपापश्च। अत्र प्रश्नाः—

(१) वेदेषु सूर्य एव विष्णुर्जगतः सविता चोक्तः तस्यामृतप्रदपूषणसहस्रांशुकर्मसाक्षित्रयीतनु जगच्चक्षुर्लोकबन्धुभगतेजोनिधिहिरण्यरथदिवाकरद्युमणिविभावसुग्रहपतिप्रभृतीनि बहूनि पुण्याभिधानानि सन्ति। वेदास्तमेवं स्तुवन्ति—चित्रन्देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्राद्यावापृथिवी अन्तरिक्षं **सूर्य आत्मा जगतस्तस्थुषश्च**। बण्महानसि सूर्य बडादित्यमहानसि। बट् सूर्य श्रवसा महानसि सत्रा देव महानसि।

अस्यैव भासा बुधगुरुशुक्रा भासन्ते। तेषु शुभग्रहेषु स्वकीयः प्रकाशो नास्ति। तर्हि जगतस्तस्थुष आत्मा सूर्यः पापः कथं संजातः।

(२) पापग्रहप्रकाशात् प्रकाशवन्तश्चन्द्रबुधगुरुशुक्राः शुभग्रहाः कथं संजाताः। (३) द्विजाः सन्ध्योपासनायां पापतमाय सूर्यायार्घ्यं किं ददति। (४) विष्णुपत्न्या जगन्मातुर्भूमेः पुत्रो भौमो यदि पापस्तर्हि महर्षिभिस्तस्मै मंगल इति नाम कथं प्रदत्तम्। (५) शनेः पापत्वे को हेतुः। 'समागतिस्तु योजनैर्नभःसदां सदा भवेत्' इति भास्करोक्तेर्न स मन्दो न च बुधादल्पद्युतिमान्। सर्वेभ्य उपरिष्ठः 'उच्चस्थितो व्योमचरः सुदूरे नीचस्थितः स्यान्निकटे धरित्र्याः' इति भास्कराचार्योक्तेश्च स पापो नीचश्च न सिद्धयति। (६) रविवासरे यदि सर्वेषां ग्रहाणां समानसंख्याका होराः सन्ति तर्हि तत्र रवेः प्राधान्यं पापत्वं च कथमायातम्। शुक्रवासरे सर्वेषां ग्रहाणां समसंख्याका होराः सन्ति तर्हि तत्र शुक्रस्य प्राधान्यं च कथं स्वीकर्तव्यम्! (७) किं रविवासरे उष्णत्वस्य, सोमवासरे शीतलताया, भौमे क्रूरताया, बुधे सौम्यत्वनपुंसकत्वयोः, गुरुवासरे प्रतिभायाः, शुक्रे सौन्दर्यस्य, शनिवासरे च नपुंसकत्वमन्दत्वयोर्गगने नृणां देहे च वृद्धिर्भवति। (८) किं रविवासरस्य प्रथमहोरायां सूर्यस्य, द्वितीयायां शुक्रस्य, तृतीयायां बुधस्य प्रभावो दृश्यते। एकस्मिन्नहोरात्रे २३ वारं स्थितिः परिवर्तते ?

वाराणां प्रभावविषये सन्त्येतादृशाः बहवः प्रश्नाः परञ्च गगने शशशृङ्गवद् वाराणामस्तित्वाभावात् नास्त्येकमपि युक्तियुतमुत्तरम्। कल्पनाचार्यैः पश्चाद् वारेषु चतुर्घटिका (चौघड़िया) संज्ञा उद्योगचरादयो द्विविधा, नक्षत्रेशसंज्ञका रुद्रसर्पादयश्च मुहूर्ताः प्रक्षिप्ताः। तेन शुभवारा अपि प्रायेणाशुभाः संजाताः परञ्च मुहूर्तानां शुभत्वाशुभत्वविषये काल्पनिकत्वात्तेषां त्रयाणां मतानि मिथो नितान्तभिन्नानि सन्ति।

	बुधः	गुरुः	शुक्रः
कुलिकः	८	६	४
कालवेला	२	१४	१२
यमघण्टः	४	२	१४
कण्टकः	१४	१२	१०

शुभवारा कैश्चिच्छुभैर्मुहूर्तैर्युता अपि अत्यन्तं भीषणा संजायन्ते। तदेवम्

वेदमते दिवसस्य नैकोपि भागो मुहूर्तो वाऽशुभोऽस्ति। अस्य प्रबोधाय तैत्तिरीयब्राह्मणोक्तानि एतानि मुहूर्तानां षष्टिपुण्यनामानि चिन्त्यानि।

शुक्लपक्षे दिवसमुहूर्ताः—चित्रः केतुः प्रभानाभान् संभान् ज्योतिस्मांस्तेजस्वानातपंस्तपन्नभितपन् रोचनो रोचमानः शोभनः शोभमानः कल्याणः।

रात्रिमुहूर्ताः—दाता प्रदातानन्दो मोदः प्रमोदः आवेशयन् निवेशयन् संवेशनः संशान्तः शान्तः आभवन् प्रभवन् संभवन् संभूतो भूतः।

कृष्णपक्षे दिवसमुहूर्ताः—सविता प्रसविता दीप्तो दीपयन् दीप्यमानो ज्वलन् ज्वलिता आतपन् वितपन् सन्तपन् रोचनो रोचमानः शम्भूः शुम्भमानो वामः ?

रात्रिमुहूर्ताः—अभिशास्तानुमन्तानन्दो मोदः प्रमोदः आसादयन् निषादयन् संसादनः संसन्नः आभूर्विभूः प्रभूः शंभूर्भूः।

अन्ते चोक्तं—य एषां मुहूर्तानां नामधेयानि वेद नैतेष्वार्तिमाच्छंति । य एवं वेद । परं चाधुना वैदिकैरेतानि शुभनामानि सर्वथा विस्मृतानि सन्ति । इदानीं ते शुभतिथिनक्षत्रैरुपेतान् शुभवारानपि भीषणान् जानन्ति । तस्य संक्षिप्तमेकं चक्रमिदम् ।

बुधवारः	गुरुवारः	शुक्रवासरः	
धनिष्ठा	उ.फा	ज्येष्ठा	दग्धनक्षत्रम्
मूलं	कृत्तिका	रोहिणी	यमघण्टयोगः
चित्रा	ज्येष्ठा	अभि.	कालदण्डयोगः
स्वाती	मूल	श्रवण	धूम्रयोगः
ज्येष्ठा	अभिजित्	पू.भा.	ध्वांक्षयोगः
उ.षा.	शत	अश्विनी	वज्रयोगः
रेवती	रोहिणी	पुष्य	उत्पातयोगः
अश्विनी	मृग.	आश्लेषा	मृत्युयोगः
पुनर्वसु	पू.फा.	स्वाती	रोगयोगः
आश्लेषा	हस्त	अनुराधा	राक्षसयोगः
अभिजित्	पू.षा.	रोहिणी	अभद्रयोगः
९	८	७	अधमातिथिः
३	६	८	दग्धातिथिः
२	८	९	विषतिथिः
८	९	१०	हुताशनतिथिः

होरामते विभिन्नराशीनां विभिन्नाः घातवाराः सन्ति । विभिन्नदिक्षु यात्रायां ते शूलवन्मारका भवन्ति ।

गर्भाधाने शनिबुधौ नपुंसकत्वात्, रविभौमौ पापत्वात्, सोमशुक्रौ स्त्रीत्वान्निषिद्धौ स्तः । गुरुवारोऽतिपवित्रत्वान्नास्मिन् मलिनकर्मण्युपयुक्तः । केषांचिच्च प्रतिकूलोऽस्ति । वारपरत्वेन संक्रान्तीनां घोरा, ध्वांक्षी महोदरी राक्षसीत्यादि नामधेयानि संजातानि सन्ति परंच संक्रान्तावधुना २३ दिवसानां त्रुटिरस्ति । २३ दिसम्बरे एव सूर्योदय उत्तरस्यामपसरति परंच वयं मकरसंक्रान्तिं १४ जनवर्यां मनुमहे । वारकथाऽस्ति विस्तृततमा, परं च ग्रहाणां यस्य कक्षाक्रमस्याधाराद् वारा उत्पन्नाः स साम्प्रतं वैज्ञानिकैः प्रत्यक्षविरुद्ध उपपादितः । तस्याङ्गीकारे एते प्रश्ना उद्भवन्ति । १. यदि सर्वे ग्रहाः पृथिवीं परितो भ्रमन्ति तर्हि सूर्यचन्द्रौ कथं न वक्रिणौ भवतः । २. कस्यापि वृत्तस्य मध्ये स्थितो नरो वृत्ते भ्रमन्तं पदार्थं वक्रिणं कथं द्रक्ष्यति । ३. ग्रहस्य गतिः शून्या अत्यधिका च कथं भविष्यति । ४. पूर्वपश्चिमयोरस्तकाले मात्राविभेदो कथं भविष्यति । सन्त्यत्रान्येऽपि बहवः प्रश्नाः तस्माद् वाराणां राशिस्वामिनां च मूलाधार एव निरस्तः । अत एव वदन्ति धीराः—

शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंऽघ्रियुगं स्मरामि ॥

अहञ्च निवेदयामि

ह्वयामि प्रियाणां निधीनां गणानां पतिं भक्तचेतस्तमो भास्करं त्वाम् ॥
वसुं सिद्धिबुद्धीशमिज्यं कवीनां शिवं शंकरं क्षेमलाभाकरं त्वाम् ॥ १ ॥
शरीरे स्थितं देवपुर्यष्टमूर्तिं समीरेऽम्बरे शम्बरे कौ चरं त्वाम् ॥
सुधांशौ रयिं भास्करे प्राणरूपं शिवं शंकरं नौमि वैश्वानरं त्वाम् ॥ २ ॥
भजे सर्वदिग्देशकालस्वरूपं सदाऽग्रेसरं पृष्ठगोर्ध्वाधरं त्वाम् ॥
अवाच्युत्तरं नौमि पूर्वापरस्थं शिवं शंकरं बाह्यमाभ्यन्तरं त्वाम् ॥ ३ ॥
त्वया वास्यमस्तीह सर्वं जगत्यामृतुं वेद्मि मासं विभो वासरं त्वाम् ॥
प्रभां सूर्यचन्द्रेज्यशुक्रारुणादेः शिवं शंकरं नौमि संवत्सरं त्वाम् ॥ ४ ॥
भरण्यार्द्रचिन्ताम्बिका भद्रकाली शिवा मंगला भद्रदा यत्र माता ॥
कुतस्तत्र भीर्यत्र दाता च पाता शिवः शंकरो विश्वनाथो विधाता ॥ ५ ॥
कविः शुक्रतो ऽमंगलो भालधर्माद् विधुश्चेतसोऽर्को दृशो यस्य जातः ॥
नमामीन्दुमौलिं बुधानां गुरुं तं शिवं शंकरं यः शनेस्ताततातः ॥ ६ ॥
स्मृतः श्रद्धया योऽपवित्रं पवित्रं करोत्याशुतोषो दयायाः समुद्रः ॥
भवेद्दुर्भगः को विहायेदृगीशं शिवं शंकरं तच्चरेर्ष्वर्थिमुद्रः ॥ ७ ॥
खरीं दोग्धि सत्यां गृहे कामधेनौ स्थिते सत्पतौ याति कुस्त्रीव जारम् ॥
बहूपासको बालिशो भाति हित्वा शिवं शंकरं त्वां विपद्भ्योऽवितारम् ॥ ८ ॥
तिथीनामुडूनां च योगादिकानां फलं वासराणां च जानाम्यसारम् ॥
शिवास्नेहयोगं विजाने सुयोगं शिवं शंकरं त्वां शुभानामगारम् ॥ ९ ॥
भ्रमन्त्यर्ककोटिप्रकाशप्रभावा असंख्येयताराग्रहा व्योम्नि तेषाम् ॥
न शक्यं फलं मिश्रितं ज्ञातुमस्मात् शिवं शंकरं नौमि बीजं समेषाम् ॥१० ॥

क्षितौ सन्ति कुत्रापि या भीतयो नो
विभीतान् सुतांस्ताभिरस्मानबुद्धान् ।
बलं हृत्सु दत्वा द्रुतं रक्ष मातः
शिवे तात शम्भो कृपाशैर्निरुद्धान् ॥ ११ ॥

विश्वेऽस्मिन् संस्कृता द्विधा

आचार्यमधुसूदनशास्त्री

(भूतपूर्वसाहित्यविभागाध्यक्षः का० हि० विश्वविद्यालयस्य)

गोह्यं नु सन्दिशे विद्भ्यो
न कूर्यां विफलं वचः।
विश्वेऽस्मिन् संस्कृता वाणी
नरदेवभिदा द्विधा॥

अयि ! पीतपातञ्जलाः ! आचान्तपूर्वापरमीमांसाशास्त्रवारिधयः ! कुक्षीकृताक्षचरणकणभक्षवाणी-सुधाः ! साङ्ख्यसंख्यासंख्यावन्तः ! योगाभियुक्ताः विद्यादधयः चक्रयो विदुष्मन्तः ! उपसर्वस्मिन् तत्र भवतां भवतां बिन्दुत्वम् यतः श्रेयोऽनुशासनं वाणीसमुपासिनो भवतो नु। ततस्तादृशानुशासकेभ्यः पुरस्तादेष सेसिम्यते सविस्तरम्।

तत्र का वाक् वागिति कः पदार्थः तथा सा संस्कृता इति किम्। किमु असंस्कृता अपि सा। इति विचारणायां संप्रत्याययामि।

सृष्टेः प्रागारम्भकाले सृष्ट्यर्थं, 'प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायये' ति गीतादिशा आत्मीयया योगमायया सम्भवन् स भगवान्, 'तदैक्षत' इति श्रुतेरीक्षणात्मिका बुद्धिं तनुते। तदनु 'एकोऽहं बहु स्यामि' ति सङ्कल्पते। एवं सङ्कल्पेन स्पन्दनात् कम्पनात् सर्वं जगत् कम्पनस्वरूपं लहर्यात्मकमित्यर्थः। लहरी च द्विविधा ध्वन्यात्मिका नाम शब्दात्मिका रूपात्मिका च। तत्र शब्दात्मिका सा श्रवणविवरं प्रविशति रूपात्मिका सा दर्शनपथमायाति। लह्यर्योश्च क्रमान्यत्वं परिणामान्यत्वे हेतुः (यो० वि० पा० १५) जात्यन्तरपरिणामः प्रकृत्यापूरात् (यो० कै० पा० २) इति सूत्रयोः प्रतिपादितसिद्धान्ततो रूपात्मिकायाः ध्वनिरूपशब्दात्मनि तद्विपर्ययेण शब्दात्मिकाया द्रव्यस्वरूपे परिणमनं परिवर्तनं सुशकम्।

एवं यद् द्रष्टव्यं तच्छ्तव्यं यच्छ्तव्यं तद् द्रष्टव्यम्। यथा, 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इति श्रुतौ द्रष्टव्योऽपि आत्मा श्रोतव्यः, श्रोतव्योऽपि आत्मा द्रष्टव्य इति। शब्दो वा भवतु अर्थो वा भवतु, द्रष्टव्यत्वं श्रोतव्यत्वञ्चोभयमुभयत्र। अत एव शब्दार्थयोस्तादात्म्यमभेद इति प्रसिद्धो राद्धान्तः शाब्दिकानाम्।

तत्रायं शब्दः 'वाग् हि ब्रह्म' 'वाग् वै ब्रह्म' इति श्रुत्योः ब्रह्मैव। अत एवोद्घुष्यते—

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥

इदं शब्दाख्यं ब्रह्म, 'तत्त्वमसि' इति श्रुतौ तत्पदवाच्यम्। तच्च त्यच्च इति श्रुतेः। तनु विस्तारे इति धातोः कर्तरि क्विपि 'तत्' इति सिद्धः प्रयोगः। अस्यार्थः विस्तारवत् व्याप्तिमत्। यत् सर्वेषु देशेषु कालेषु सामान्येषु विशेषेषु च वस्तुषु सर्वासु अवस्थासु व्याप्तं तद् ब्रह्म अतो ब्रह्मैव तत्पदस्यार्थः। तस्मादयं शब्दः सर्वत्रानुस्यूतः व्यापकः सर्वविषयाणां चिन्तने अनन्यः उपायः। तं विना चिन्तनमेव

दुःशकम् । यदि शब्दो न स्यात् तदा चिन्तनकार्यमधिकमग्रे सर्त्तुं न प्रभवेत् । शब्दाख्यं शास्त्रमेव चिन्तनं प्रसूते । यो यस्यां वाण्यां कुशलः तस्य तस्यामेव वाण्यां चिन्तनं भवतीति श्रुतिस्मृतियुक्तिस्वानुभूतिभिः सिद्धम् । यस्माज्ज्ञानमेव शब्दरूपेण परिणमते यदुक्तम् —

'वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।' अत एव, 'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते' इति, 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि ।'

अस्त्वेवं शब्दः ब्रह्म । परन्तु ब्रह्म अखण्डं शब्दश्च इयं प्रकृतिः अयं प्रत्यय इति प्रकृतिप्रत्ययविभागवान् । तत्रापि न केवला प्रकृतिः प्रयोक्तव्या न च केवलः प्रत्ययः इति समयमुल्लङ्घते च सः । यत्र प्रकृतिनिमित्ता प्रत्ययनिवृत्तिस्तत्र अप्रत्ययिकायाः प्रत्ययरहितायाः केवलायाः प्रकृतेः प्रयोगो भवति यथा सम्प्रति, अग्निचित् सोमधुक् इति । यत्र च प्रत्ययनिमित्ता प्रकृतिनिवृत्तिस्तत्र अप्रकृतिकस्य केवलस्य प्रत्ययस्य प्रयोगो भवति । यथा अधुना इयान् इति । एवं सखण्डः सः ।

ब्रह्म एकरूपं, शब्दस्तु 'ध्वनिवर्णाः पदं वाक्यमित्यास्पदचतुष्टयम् ।' वाण्या इति दिशा सा अनेकरूपा ।

ब्रह्म निर्धर्मम् । शब्दः पुनः लोपागमादेशवर्णविकाररूपधर्मवान् । ब्रह्म केवलं शुद्धं, शब्दः पुनः अशुद्धोऽपि दुष्टोऽपि । 'दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाहे'ति महाभाष्यमाह । इति चेदद्धा, बोधयामि रीयस्व ।

येयमुपरिष्टात् प्रतिद्वन्द्वितायाः कथा श्राविता सा अव्यवहरणीयव्यवहरणीययोः शब्दयोर्वर्तति । इदानीं त्रैलोक्ये वा सप्तलोक्ये वा चतुर्दशभुवने वा संवसद्भिः सामान्यैर्देवैः आदित्यादिभिर्गणदेवैः विद्याधरादिभिर्देवयोनिभिर्विशेषैर्देवैः असुरैश्च तथा नरैश्च व्यवहरणीयस्य संस्कारवत्त्वाद् व्यवहर्त्तुं योग्यस्य लौकिकस्य तस्य कथा संश्राव्यते । तत्रात्र संस्कारवान् संस्कृतः शब्दः संस्कृता वाणी । संस्कारस्य च निसर्गकृत्रिमभेदेन द्वैतत्वात् निसर्गसंस्कारवान् प्रयुक्तसंस्कारवान् इति दिशा द्विविधा सा वाणी ।

ननु लौकिकस्यैव शब्दस्य कथा प्रस्तूयते इति किम् । किमन्ये शब्दा न सन्ति ? प्रतिपाद्यन्ते तु अन्येऽपि ते । तद्यथा पातञ्जले महाभाष्ये—अथ शब्दानुशासनम् । केषां शब्दानाम् । लौकिकानां वैदिकानाम् । इति । पुरा कल्पे एतदासीत् । इदानीन्तु वेदमधीत्य त्वरिता वक्तारो भवन्ति । वेदात्तु वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः । इति च । एवं वैदिका अपि तदन्ये शब्दाः सन्ति । किं तेषां शब्दानां कथां न प्रस्तोष्यते इति चेद्विद्धि ।

सच्चिदानन्दस्वरूपब्रह्मातिरिक्तस्य सकलस्यापि विश्वस्य लोकपदार्थत्वाद्वेदस्यापि लोकान्तर्गतत्वमेव । अतो वेदे विदिता भवा वा वैदिका शब्दा अपि लौकिकशब्देभ्यो बहिर्भूता न इत्यत पृथक्कथा तेषां नोपयुज्यते ।

एवमेव मीमांसादर्शनेऽपि १ अध्याये २ पादे शब्दैक्याधिकरणे ३० त्रिंशत्तमे प्रयोगचोदनाभावादर्थैकत्वमाविभागादिति सूत्रे य एव लौकिकाः शब्दास्त एव वैदिकाः । त एवैषामर्थाः । कुतः, प्रयोगचोदनाभावात् । एवं प्रयोगचोदना सम्भवति । त एव शब्दास्त एवार्थाः । इतरथा शब्दान्यत्वे

---

१. अमरकोशे प्रथमे स्वर्गवर्गे ।

२. अ० प्र० स्व० व० ।

त एवैषामर्था इति न प्रतीयते। अत्र तु तथा प्रतीयते। तस्मादेकशब्दत्वमिति। उच्यते। प्रयोजनमिदम्। हेतुर्व्यपदिश्यताम्। इति ततो हेतुरुच्यते अविभागादिति। न तेषां वैदिकानामेषां लौकिकानाञ्च विभागमुपलभामहे। अत एवैकशब्दत्वं तांश्चस्तांश्चार्थानवगच्छामः। अतो नान्यत्वञ्च वदामः। इति सूत्रतच्छाबरभाष्याभ्याम्।

लोके येष्वर्थेषु प्रसिद्धानि पदानि तानि तदर्थान्येव जैमिनिसूत्रेष्विति अवगन्तव्यम्। इति अथातो धर्मजिज्ञासेति सूत्रस्य शाबरभाष्येण च समर्थ्यते।

यद्यपि एवं वैदिकानामपि शब्दानां लोके भवत्वाल्लौकिकत्वमिति चेत्तर्हि किमर्थं वैदिकानामिति पृथगुच्चारणं क्रियते। उच्यते—ब्राह्मणा आयाता वशिष्ठोऽप्यायात इति। अत्र यथा ब्राह्मणेषु वशिष्ठ वैशिष्ट्यस्य बोधनार्थं तस्य पृथगुपादानं तथैव लौकिकवैदिकशब्दयोः वैदिकशब्दानां वैशिष्ट्यं विलक्षणत्वं च ख्यापनीयमिति पृथक् तेषामुपादानं कृतम् इति। तथापि यथा भूरिति व्याहरद्भुवमसृजदिति दिशा यद् व्याहृतं तदेव सृष्टम्। तथैव यद् यादृशं देवैर्व्याहृतं देवानां मुखान्निःसृतं तादृश एव शब्दः स्वभावतो व्यवहरणीयः निसर्गसंस्कारवान् वेद इति। प्रथितः यः शब्दः लोके कृषिरिति उच्यते स एव शब्दो वेदे कार्षिरित्युच्यते, न केवलं कार्षिरपि तु कारेषिरिति सहस्रशीरेषेति। एवमेव लोके—करोति, वेदे कृणोति। लोके—विश्वानि भुवनानि, वेदे—विश्वानि भुवना, लोके—विश्वानि काव्यानि, वेदे—विश्वानि काव्या (ऋचि ८।४१।६) लोके ब्रह्म एतत्। वेदे—ब्रह्मेतत् (श्वेता० १।२) लोके—कर्णैः। वेदे—भद्रं कर्णेभिः। लोके—गृह्णामि, वेदे—गृभ्णामि ते सौभगत्वाय हस्तम्।

वेदे शब्दस्योच्चारणप्रक्रियाबोधनार्थं शिक्षा प्रातिशाख्यञ्चाचार्यैः निर्दिष्टे निर्मिते च।

तैत्तिरीयोपनिषदि शिक्षाध्यायः। यथा—अथातः शीक्षां व्याख्यास्यामः (लोके शिक्षेति ह्रस्व + इकारघटितः शब्दः वेदे तु शीक्षेति दीर्घ + ईकारघटितः सः) वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तानः। वर्णोऽकारादिः चतुःषष्टिसंख्यात्मक उभयत्र लोके वेदे समानः। स्वर उदात्तादिः वेदः एव विशेषार्थप्रतिपत्तिकृत्। यथेन्द्रशत्रुः स्वरतोऽपराधात्। मात्रा अज्विषये कालतो भवन्ती ह्रस्वः दीर्घः प्लुतः इत्येवमुभयत्र व्यवह्रियते। बलं स्थानप्रयत्नानुदानतः उभयत्र समानम्। सामगुणदोषयोः सद्भावाभावाभ्यां साम्यम्। सन्तानश्च संहितापदंक्रमजटाघनादिश्च वेदे देवैर्निरुक्तंपदमिति कृत्वा तदर्थंनिर्वचनकारि शास्त्रमपि निरुक्तमित्युच्यते। यत्रार्थनिर्वचनमेव भवति न तु साधनिका यथा देवरः कस्मात् द्वितीयो वरः यस्मात्। पुत्रः कस्मात् पुरु त्रायते इति अथवा पुन्नाम्नो नरकात् त्रायते इति। अत्र निरुक्तमेवोपयुज्यते न व्याकरणम्। तत्तु निरुक्तात् पृथगेव षडङ्गेषु। व्याकरणं शब्दप्रधानत्वात्साधनिकाप्रधानम्। निरुक्तमर्थप्रधानं शब्दस्तु तत्र गुणः।

कल्पे मन्त्राणां विनियोगश्चिन्त्यते। तच्च चिन्तनं मन्त्राणामर्थाभिधानवशेन भवति। यो मन्त्रः यमर्थमभिधानेन संस्कर्तुं समर्थः स मन्त्रस्तत्र विनियुज्यते। तदुक्तम्—अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः (अङ्गत्वं) स्यात्। ३।२।१ इत्येवं निरुक्तम् निर्वचनमेव करोति। तेनैव तदर्थावगतिर्न व्याकरणेन। व्याकरणं शब्दप्रधानमत एवाह महाभाष्यकारः शब्दप्रमाणका वयं अतः शब्दो यदाह तदेवास्माकं प्रमाणम्। अयं द्विजातिभिरेव व्यवहरणीयो न तु शूद्रम्लेच्छान्त्यजैः। यद्विषये शूद्रः संस्कृतां नोच्चरेद्गिरं स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा शास्त्रज्ञानाम् इति समुद्घोषः।

अत एव शूद्रस्य पृण्वतोऽध्ययने, रथ्यायां सञ्चरतोऽध्ययने, चन्दनघर्षणादिकार्यान्तरव्यापृतस्याध्ययने, स्थानप्रयत्नानुदानविरहिताध्ययने, आत्मनोऽशुचित्वे अशुचिदेशे काले चाध्ययने पूर्वंसवर्णविलोमेनाध्ययने, गलोपलम्बितश्लिष्टास्पष्टत्वादिकरणादक्षरव्यक्तिहीनतयाध्ययने प्रायश्चित्तीयते द्विजः। यः अन्तरचित्तवृत्तिवशादेव परिरक्षणरूपेण विशिष्टेन प्रयत्नेन उच्चारणीयः पठनीयः। यत्र तादृशरक्षणाभावस्तत्र आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतोमिष्टिं निर्वपेदिति नियमनात्।

महामहोपाध्यायो वर्द्धमानोऽपि चेतयते अध्येतॄन् अध्यापयितॄन् अध्येष्यमाणान् अध्यापयिष्यमाणान्। यथा—

लौकिकव्यवहारेषु यथेष्टं चेष्टतां जनः।
वैदिकेषु तु मार्गेषु विशेषोक्तिः प्रवर्त्तताम्॥ इति।

यः शब्दः या वाक् पाणिनिना स्वोपज्ञाष्टाध्याय्यां छन्दःपदेन व्यवहृता। या वाक् मन्त्रः कल्पो ब्राह्मणम् इति व्यवहारपदमारोहति। यस्या विषये कालिदासः कुमारसम्भवे सर्गे १२ श्लोके—

उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्।
कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिरामिति॥

या निसर्गसंस्कारवत्त्वात् संस्कृता वाणी पुराकल्पत इदानीं यावद् देववाणी-सुरभारतीत्याख्यया प्रथमाना सर्वैः समादृता व्यवह्रियमाणा च विराजते। इयं प्रतीची वाक्।

यद्यपीयं पाणिनेः प्राक् प्रकृतिप्रत्ययबोधनदिशां स्वीकृत्य संस्कारवतो अर्थात् केनापि व्याकरणेन व्याकृता नासीत् परं पाणिनिना तदनुयायिवार्तिककारेण च परःशतानि सूत्राणि महाभाष्यकारेण वार्तिकानि नियमनानि च मिमिरे संस्कारार्थम्। ततः प्रभृति प्रयुक्तसंस्कारवतीत्यपि समाख्यां दधौ।

अतः परा पराची वाक्। यां पाणिनिः भाषा इति पतञ्जलिः लौकिकः शब्द इति व्याजह्राते।

तत्र लौकिकवैदिकशब्दयोरयं लौकिक एव शब्दः प्रधानभूतः। तथाहि अनेकार्थाभिधाने यत्नं कुर्वता लोकः पृष्ठतोऽनुगन्तव्यः केष्वर्थेषु लौकिकाः कान् शब्दान् प्रयुञ्जन्ते इति महाभाष्यकारः सम्बभाषे सरूपाणामिति सूत्रे १।२।६३–६४।

लोकाधीनावधारणो हि शब्दार्थयोः सम्बन्धः इति वाचस्पतिमिश्रोऽपि विममृशे। शास्त्रमपि मीमांसाख्यम्—लोकावगतसामर्थ्यः शब्दो वेदेऽपि बोधकः—इति दिशा लोकावलोकितां पदशक्ति पदार्थयोग्यताञ्च मञ्जरीकृत्य प्रचरति, इतरथा आदित्यो यूपः (तै० ब्रा० २।१।५) यजमानः प्रस्तरः (तै०स० १।४।७) इत्यादिवाक्यस्तोमस्य यथाश्रुतेऽर्थे प्रामाण्यापत्तेः। वैदिक्याः क्रियायाः समक्षक्षयितया पारत्रिकफलकरणान्यथाऽनुपपत्तयालपूर्वाङ्गीकरणानुपत्तिश्चऽलोके इदं रजतमित्यत्र शुक्तिव्यक्तितत्वाभिव्यक्तौ अपनीयमानस्य आरोपितस्य रजतस्य सम्बन्धे मिथ्यादृष्टौ, तद् दृष्टान्तावष्टम्भेन आत्मतत्त्वसाक्षात्कारविद्यापनोद्यस्य आविद्यकस्य बन्धस्य मिथ्यात्वानुमननसम्भवात्।

एवं वैदिकशब्दाश्रयस्य अत एव प्रधानस्य लौकिकशब्दस्य संस्कारपदवेदनीयानुशिष्टवशादियं प्रकृतिः अयं प्रत्ययः इति प्रकृतिप्रत्ययविभागप्रयुक्तसंस्कारवत्त्वसद्भावाद् द्वितीयत्वं तेन संस्कृता वाक् द्विविधेति प्राप्तम्।

ते इमे द्वे विधे। तयोः द्विजातिमात्रभाषणीया एका वाक् इति, सर्वमानुषसाधारणी मानुषी द्वितीया वाक् इति चैवं वाल्मीकिकविनिबद्धेन वक्त्रा हनुमता वाल्मीकिरामायणे सुन्दरकाण्डे विश्राविते अपि।

तथाहि–सीतायै कैः शब्दैः स्वसंस्तवः संग्रहणीय इति पुरस्ताद् यच्चिन्तितं तच्चिन्तनावसरीयौ द्वौ श्लोकौ स्तः तयोरेको यथा—

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्।
रावणं मन्यमाना मां सीता भीता भविष्यति॥ इति प्रथमा वाक्।

परस्ताच्चिन्तितः श्लोको द्वितीयो, यथा—

वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम्। इति द्वितीया वाक्।

तथा कालिदासेनापि स्वप्रबन्धे कुमारसम्भवे ७ सर्गे ९० श्लोके यथा—

द्विधा प्रत्युक्तेन च वाङ्मयेन
सरस्वती तन्मिथुनं नुनाव।
संस्कारपूतेन वरं वरेण्यं
वधूं सुखग्राह्यनिबन्धनेन॥

संस्कारवत्येव गिरा मनीषी सम्पूज्यतेऽथात्र विभूष्यते च—वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते। इति च। एवं सुरभारतीति गीर्वाणवाणीति दैवीवागिति मनुष्यवागिति नरभारतीति मानववाणीति प्रथितामुभयविधां वाणीं ब्रह्मणा वदन्ति। तद्यथा—

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥

वाक्परिमिता (अत्र षष्ठीसमासः) वाचः परिमितानि पदानि चत्वार्येव न पञ्चमं पदमस्ति। तानि पुनः ये मनीषिणः मेधाविनः ब्राह्मणाः सन्ति ते विदुः। तेषां पदानां मध्ये त्रीणि पदानि गुहा गुहायां निहिता निहितानि। अत एव तानि पदानि नेङ्गयन्ति न वेदयन्तेऽर्थम्। तत्र तुरीयं चतुर्थं-भागं वाचो वाण्याः परस्परं ज्ञानार्थं परस्परं व्यवहारार्थं मनुष्या वदन्ति व्यवहरन्ति।

प्रश्नः–कतमानि पुनस्तानि चत्वारि पदानि तत्रोत्तरं व्याख्याति यास्काचार्यः। नामाख्याते च उपसर्गनिपाताश्चेति वैयाकरणाः। तत्र चतुर्षु अप्रसिद्धत्वादाख्यातोपसर्गनिपातपदानि अर्थं वेदयन्ते। नामानि तु प्रसिद्धार्थत्वाद् गवाश्वादीन् अर्थान् वेदयन्ति।

एवं मन्त्रः कल्पो ब्राह्मणश्चतुर्थी व्यावहारिकीति याज्ञिकाः। अत्रापि व्यावहारिक्येव तु वेदयतेऽर्थम्। ऋचो यजूंषि सामानि चतुर्थी व्यावहारिकी। अत्रापि व्यावहारिक्येवार्थं वेदयते। सर्पाणां वाक् वयसां वाक् क्षुद्रस्य सरीसृपस्य वाक् चतुर्थी व्यावहारिकी वाक् इत्येके अधिभूतविदः। अत्रापि व्यावहारिक्येव वेदयतेऽर्थान् नेतराः।

पशुषु तूणवेषु (जीवविशेषेषु) मृगेषु आत्मनि च इत्यात्मवादाः आत्मानं प्रवदन्ति ये आचार्यास्ते आत्मप्रवादाः। अत्र तूणः तूणी तूणीरम् इति त्रयोऽपि तरकम् इत्याख्यस्य वाचकाः शब्दा यं योद्धारौ युद्धकाले स्वपृष्ठभागे धारयन्ति। तद्वाति गन्धनं सूचनं ददाति अथवा प्रकाशनं करोति। वा गतिगन्धनयोरिति धातोर्डप्रत्यये तूणवः। तूणस्य प्रकाशको निर्माता। उत्साहनं च हिंसायां सूचने

चापि गन्धनम् इत्यमरः। गन्धनं सूचनोत्साहहिंसनेषु प्रकाशने इति विश्वः। ततश्च सूचनादायकः जीवविशेष एवेति।

अन्यच्च पशुरपि जीवः मृगोऽपि जीवः आत्मापि जीवात्मा। अत एषां साहचर्यात् तूणवोऽपि अप्रसिद्धनामा कश्चिज्जीवविशेषः। अथापि ब्राह्मणं भवति। सा वै वाक् सृष्टा चतुर्धा व्यभवत्। एष्वेव लोकेषु त्रीणि (तिस्रः) पशुषु तुरीयम्। तदेतदभिव्यक्तार्थमेव। या वाक् पृथिव्यां साग्नौ सा रथन्तरे। यान्तरिक्षे सा वायौ सा वामदेव्ये। या दिवि सादित्ये सा बृहति सा स्तनयित्नौ। अथ पशुषु। ततोऽर्थात् एभ्यः या वाक् अत्यरिच्यत अतिरिक्ता आसीत् तां ब्राह्मणेषु अदधुः तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति या देवानां या च मनुष्याणाम् इति।

अत्र ब्राह्मणपदं द्विजातिमात्रोपलक्षणार्थं द्विजातिना छन्दसः श्रुते भाषायाश्च व्यवहरणात्। द्विजात्यतिरिक्त एकजातिः शूद्रस्तु पाणिनिना भाषापदेन व्यवहृतां प्रयुक्तसंस्कारवतीमेव संस्कृतां वाचं व्यवहरेत्।

यस्या वाल्मीकिरामायणे ऋषिणा—

पठन् द्विजो वागृषभत्वमीयात्, स्यात् क्षत्रियो भूमिपतित्वमीयात्।
वणिग्जनः पण्यफलत्वमीयात्, जनश्च शूद्रोऽपि महत्त्वमीयात्॥

एवमेव महाभारतेऽपि विष्णुसहस्रनामस्तोत्रस्य विषयेऽपि, प्राप्नुयुर्मानवाः शुभम्। किं जपन् मुच्यते जन्तुर्जन्मसंसारबन्धनात्। स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः। स्तवैरर्च्चेन्नरः सदा। यश्चापि परिकीर्तयेत्। वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत्। वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात्। इत्येवं मानवमात्रस्य कृते पठनाधिकारः समर्थितः।

गीताया अपि पठनार्थं सर्वविधस्य भावस्य कृते अधिकारः प्रबोधितः भगवता स्वयम्—

निराहारस्य देहिनः (२।५९)। तस्माद्यस्य महाबाहो····तस्य प्रज्ञा प्रतिष्ठिता (२।६८)। संत्यक्त्वा करोति यः। लिप्यते न स पापेन (५।१०)। यो यो यां यां तनुं भक्तः····तस्य तस्याचलां श्रद्धाम् (७।२१)।

मां च यो व्यभिचारेण भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते (१४।२६)॥

एवं मानवमात्रकृते पठनाधिकारं समर्थयन् भगवान् पर्यन्ते १८ अध्याये कथयति—

अध्येष्यते च य इमं धर्म्यं संवादमावयोः।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥ इति।

महाभाष्येऽपि पतञ्जलिऋषिणा रथिसारथिसंवादेन एषोऽर्थः चतुर्णां वर्णानां लौकिकसंस्कृत-पठनाधिकारः सिद्धान्तितः।

न वेदव्यवहारो यं संश्राव्यः शूद्रजातिषु। स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा। इति भारतमाख्यानं कृपया मुनिना कृतम्। इति, अनेनापि वैदिकसंस्कृताध्ययनाधिकारं निषिध्य लौकिक-संस्कृताध्ययनाधिकारः अनुमोदितः समर्थितः साधितश्च। ननु भोः यथा गायत्रीमन्त्रस्तकारेण आरभ्यते यादित्यनेन समाप्यते तथैव वाल्मीकिरामायणमपि तपःस्वाध्यायेति दिशा तकारेण प्रारभ्य

ईयादितिप्रकारेण यादित्येवं समाप्तिं नीतम्। तस्मात् वैदिकसंस्कृतेनाग्रथितस्यापि रामायणस्य वेदसम्मितत्वेन शूद्रकर्तृकपठनानर्हत्वमेवेति चेच्छृणु।

निषादस्थपत्यधिकरणदिशा निषदस्थपतिं याजयेत् इत्यत्र निषादश्चासौ स्थपतिश्चेति कर्मधारयो वा, निषादानां स्थपतिरिति षष्ठी तत्पुरुषो वा, निषादः स्थपतिः बृहस्पतियजनकर्ता शिल्पी यस्येति बहुव्रीहिर्वेति त्रिविधं समासं विकल्प्य गुरुत्वेन बहुव्रीहिं षष्ठीतत्पुरुषं परित्यज्य कर्मधारयं स्वीचकार। तत्र यद्यपि निषादानां शूद्रत्वाद्वेदाध्ययनानर्हतया वैदिकमन्त्रोच्चारणपूर्वकं यजनकरणकारणयोरप्राप्तिस्तद्यपि परमाप्तमुनिवचनप्रामाण्येन शूद्रस्यापि निषादाभिन्नस्थपतेर्यजनयाजने स्वीकृते। तद्वदेव प्रकृतेऽपि परमप्रमाणाप्तभूतऋषिवचनप्रामाण्येन शूद्रस्यापि रामायणमहाभारतादिपठनाधिकारः सुसाध्यते। वर्षासु रथकारोऽग्नीनादधीत इति श्रुतेः प्रामाण्येन मीमांसकैः शूद्रस्यापि काष्ठतक्ष्णो रथकारस्य अग्न्याधानं, तदुपयोगिवेदाध्ययनं मन्त्रोच्चारणपूर्वकं हवनञ्च स्वीकृतानि। अतो लौकिकसंस्कृतायां भाषायां ग्रथितानां रामायण-महाभारतपुराणेतिहासानां स्मृतिधर्मशास्त्रज्योतिषायुर्वेदधनुर्वेदगन्धर्ववेदाद्युपवेदानां गृह्यसूत्रश्रौतसूत्रव्याकरणन्यायादिषड्दर्शनानां श्रव्यपठ्यदृश्यलिप्ये। चित्र्येतिचतुर्विधकाव्यानां तथालङ्कारशास्त्राणां बौद्ध-जैनसाहित्यानाञ्चाध्ययने चतुर्णां वर्णानां म्लेच्छान्त्यजानां च समानोऽधिकारः।

संस्कृताया भाषाया इदं स्वीयं वैचित्र्यं यदस्यां प्रयुक्तानां शब्दानामन्वर्थता ओतप्रोता विराजते। एतादृशं गौरवं कयाऽपि भाषया न प्राप्तम्। यथा कश्चिदपि आंग्लो विद्वान् केनापि पर्यनुयुज्येत यदिदं वस्तु। इति कुतः कथ्यते तदा स मूक एवावतिष्ठेत्। न किञ्चिदपि वक्तुं पारयते। यदि अस्मान् स पृच्छेत्तदा वयं वक्ष्यामः यदिन्धनार्थं छेदनीयः स वृक्षः औव्रश्च छेदने धातोर्निष्पन्नत्वात्। किमेवमस्ति-अन्यस्यां कस्यामपि भाषायां स्थितिः? अन्यभाषाविदोपि न विज्ञा एतादृशव्युत्पत्तेः। सर्वास्वपि स्वदेशीयविदेशीयभाषासु लौकिकसंस्कृताया अस्मदीयभाषाया महान् प्रभाव एतस्या एव सर्वास्ताः निःसृता इति भारतपताकया दोधूयताम्। जोघुष्यतां ब्रह्मदेशादारभ्य आयर्लेण्डप्रभृतिप्रदेशेषु सर्वेषु साधारण्येन प्रचलितासु सप्तविंशतिभाषासु संस्कृतायाः समानार्थप्रतिपादकत्वम्, अनन्यसाधारणत्वं सर्वदेशव्यापकत्वम् इतरदेशीयव्यवहारबोधनक्षमत्वम्। इतरदेशीयैः सौलभ्याध्ययनयोग्यत्वञ्चेति।

ऋग्वेदः सम्पूर्णे विश्वे प्रथमो ग्रन्थ इति सर्वैः प्राचीनैरर्वाचीनैरनुकूलैः प्रतिकूलैश्च स्वीकृतम्। यत्र कोकूयते यद्—

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति। (ऋ० ८।१००-११)

देवा इन्द्रादयः देवीं देदीप्यमानां द्योतयन्तीं वाचमजनयन्त सर्वसाधारणेषु प्राकाशयन्। तां विश्वरूपाः पशवः अष्टभिर्घृणादयादिभिः पाशैर्वेष्टिताः वदन्ति उच्चारयन्ति। इति। स्मृतिष्वपि सर्वमान्यायाः केनापि न प्रतिषेध्यायाः मनुस्मृतेरपि इयमेव कथा। सापि कथयति यदियं संस्कृता आदिभाषा। यथा-सर्वेषां स तु नामानि कर्माणि च पृथक्-पृथक्। वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे। इति। अतो वेदोदिता इयं भाषा आदिभाषा आसीत् अस्ति स्थास्यति च। नात्र विवादः अपि तु सर्वेषां पण्डितानामैकमत्यम्।

ये ते विदेशीयचाकचिक्येनान्धा अथवा अल्पज्ञाः शास्त्रीयदृष्टिरहिता आत्मानमेव बहुमन्वानाः सम्प्रदायविदो न सन्ति ते प्रकृते न चर्चनीयाः नार्चनीया अपि तु वर्जनीया एव दूरतः। यः सर्व-शास्त्राविदपि असम्प्रदायावपि स मूर्खवदुपेक्षणत्यइतिभाष्योक्त।

इदं स्पष्टं-स्पष्टं सम्भालयन्तु यद् अखिलेऽस्मिन् विश्वे यावन्त्यो भाषाः सन्ति तासु सर्वासु सरला विस्तृता सुगमा सुपूरा अन्वर्थशब्दमयी भाषा यदि काचिदस्ति तद्धि संस्कृता एव। यस्यामुच्चारण-विधेः शिक्षा प्रतिवर्णं समयमयी विराजते। नान्यत्र एतादृशी सांसिद्धिकी मूलतत्त्वसंरक्षिणी उच्चारण-प्रकृतिः। अत एवात्र त्रिषष्टिः ६३ चतुःषष्टिर्वा ६४ वर्णाः शम्भुमते मताः। नान्यस्यां कस्यामपि भाषायामियन्त ईदृशाश्च वर्णाः। अन्यासु भाषासु लातिनीहिब्रूभाषायां २० विंशति वर्णाः। फ्राँसिसी-यायां तस्यां २५, आंग्लायां तस्यां २६, स्पेनीयायां तस्यां २७, तुर्काणामरबाणाञ्च तस्यां २८, पारसी-कानां तस्यां ३१, रूसीयायां तस्यां ३५ सन्ति। तेन स्वयं निभालयन्तु विचारयन्तु पण्डिताः कथं वर्णानामभावे पदानि स्युः। तदभावे कथं वाक्यानि भवेयुः। वाक्यानाञ्चाभावे कथमर्थज्ञानं स्यात् कथं ग्रन्थरचनञ्च स्यात्।

जगति आन्ध्यमेव प्रसज्येत। अतोऽन्याः भाषा वर्णानामभावे अपूर्णाः इयञ्चास्माकं संस्कृता भाषा सुपूरा। अत्र तु समुचिता उपयुक्ता एव वर्णा न न्यूना नाधिकाश्च।

एवं हि बोध्यम्। अर्थविषये माने अर्थं ज्ञापयितुं पदस्य वाक्यस्य वा प्रयोगः। तस्मात् पदं वाक्यञ्चार्थे प्रयुज्यते। तत्र विभक्त्यन्तं पदं पदकदम्बञ्च वाक्यम्। अनयोः स्वरूपमाश्रयणीयम्। स्वरूपनिग्रहैश्च नान्तरेण वर्णप्रयोगमतः ६३, त्रिषष्टिः ६४ चतुःषष्टिर्वा वर्णाः समुचिता आवश्यका-श्चेति कथ्यम्।

ननु प्रकृते कतिपयाः घड़ा घोड़ा थोड़ा कपड़ा आत्रादौ बिंन्दुसम्पृक्तौ डकारः दौजख इत्यत्र तादृशी जकारखकारौ उच्चार्यन्ते। परन्तु संस्कृतवर्णमालायाम् इतरभाषापेक्षया वर्णानामाधिक्येऽपि तादृशवर्णानामभावो न्यूनतैवेति चेन्न।

अत्रेदं बोध्यम्। सर्वंनिसर्गं ईदृशः यत् प्रतिदशक्रोशमुच्चारणं विपरिवर्त्तते। ध्वनिर्भिन्नो भिन्नो भवति। ध्वनिभेदात् स एव शब्दो विभिन्न इव अनुभवसीम्नि समागच्छति। अतः साधारणा अप्रबुद्धा एव न प्रबुद्धा अपि कथयितुमारेभिरे यदयं शब्दः भिन्नः। तद्देशीयः एतद्देशीय इति। यथा जञोः संयोगेन ज्ञ इति वर्णो भवति उत्तरप्रदेशीया एनं गकारयकारयोः संयोगेन निष्पद्यमानः ग्य इति उच्चारयन्ति, गुर्जरप्रान्तीयाः ज्न इति नकारघटितम् उच्चारयन्ति वस्तुतस्तु ज्ञ इत्युच्चारणीयः सः। यथा मालवीयः शब्दः। एनं वाङ्गा उत्कलाश्च मालव्य इत्युच्चारयन्त श्रूयन्ते। एषामाशयः शब्दभेदं कर्त्तुं नास्ति। परं ते किं कुर्युः। यतः तेषामुच्चारणस्य शैली एव तादृशी सांसिद्धिकी। कः शीलं प्रसह्य परिवर्तयेत्। शीलन्तु शैलेयम् शिलावद् दृढं भवति।

अन्यच्च वाग्विकल्पनां पुरुषभेदादानन्त्यमत एव अनेयत्यञ्च। तेन अनियतेषु तेषु यथा शास्त्र-व्यवस्थाभेदो न भवति अविकल्पः परिगृह्यते। तेषु उच्चारणविकल्पोऽप्येकः सर्वे मानवा सामान्यतः हिङ्गु हिङ्गः इति वदन्ति परं प्राच्यदेशीया हींग इति प्लुतादपि तारस्वरेण उच्चारयन्ति। तत्र स्वभाव एव शरणम्।

साहित्यशास्त्रस्य वेदमूलकत्वम्

आचार्यः डॉ० गजाननशास्त्रिमुसलगाँवकरः

(भूतपूर्वं मीमांसा-धर्मशास्त्रविभागाध्यक्षः, काशी-हिन्दू-विश्वविद्यालये,

शास्त्रचूडामणि प्रोफेसर, गंगानाथ झा केन्द्रीय संस्कृतविद्यापीठ, इलाहाबाद)

करुणारससरसानां यन्नयनान्तावलोकितानां द्राक् ।
वाचा चरितमतीतो विलसति महिमा पुनातु सा देवी ॥

क्षणं सुनिपुणं पर्यालोच्यतां यदिह भगवत्यां वसुमत्यामवाप्तजन्मनः प्राणिनः किं वा वर्तते प्रधानं विधेयमिति । नूनमिदमेवान्ततः सङ्कलयेयुर्यद्विज्ञानसम्पादनमेव मानुषाणां प्रधानतया कर्तव्य-किरीटकोटिमाटीकत इति, एतद्धि चतुर्वर्गसाधनसाधीय उपायभूतं प्रभूतं महिमानमावहति परम-पदार्थोपलम्भसम्भावनायाम् । इदमेव चान्ततः सम्पादयति पूरुषस्य दुर्गमभूमिकारोहदुरूहमान्तर-ज्योतिर्विलासम् । यद्विषये—

"पृथुशास्त्रकथाकन्थारोमन्थेन वृथैव किम् ।
अन्वेष्टव्यम्प्रयत्नेन तत्त्वज्ञैर्ज्योतिरान्तरम् ॥"

इति समुचितमुक्तवान् विद्वदग्रेसरः श्रीमान् क्षेमेन्द्रः । एवं महिम्नश्चास्य सम्पादनसाधन-भूताश्च पूर्वतः पुरातनशास्त्रनिचया एवेति त्वपरोक्षं प्रेक्षावताम् । तत्राप्युपदेशविषयेषु त्रैविध्योप-पादनेन भेदत्रितयमिदमापतति । प्रभुसम्मितं, सुहृत्सम्मितं, कान्तासम्मितञ्चेति । तत्र प्रभुसम्मितो-पदेशदैशिकाः श्रीमन्तो भगवन्तो वेदाः, येषां हि तत्तद्विधिषु विधेयाः सर्वेऽपि । सुहृत्सम्मितोपदेशमयश्च पुराणाख्यानादिर्यो हि हिताहितविवेकाय दर्शितानवद्यदृष्टान्तसन्तानः सन्तनोति मर्त्यानामकण्टके पथि समुपरूढमभिनिवेशम् । तृतीयश्च कान्तासम्मितोपदेशकुशलं निर्भरहर्षारम्भसम्भवं साहित्यं नाम, यद्धि सरस-सरसैर्वाग्विलासैर्मानसमभिप्रसाद्य शिक्षानिक्षेपदक्षिणानि तानि बोधयतितमामुपदिदिक्षित-वस्तूनि । यद्यादृशः कोऽप्युपदेशविषयोरीकाराऽविचक्षणः पुरुषोऽप्यमुष्य सुधामधुरिमावधीरण-धौरेयाणि वचांसि समाकर्ण्य, अमन्दानन्दसन्दोहमेदुरान्तरः प्रायः प्रवर्तते दर्शितोपदेशविषयया-ऽविषमया दिशा ।

तदिदं साहित्यशास्त्रं सरसमधुरानुकूलैर्वचोभिः परमपदार्थसार्थबोधनाऽनुपममाहात्म्यं मानवानां नितरामेवोपकारसम्भारमावहतीति सिद्धैवैतावता समुपादेयताऽमुष्य ।

युक्तमुक्तं केनचित्

"स्वादु काव्यरसोन्मिश्रं वाक्यार्थमुपभुञ्जते ।
प्रथमालीढमधवः पिबन्ति कटुभेषजम् ॥" इति ।

अस्य च शास्त्ररत्नस्य कदात्वेऽभूद्भूमिवलये भूयान् प्रचार—इति विचारे तु वेदमूलकत्वा-च्चिरन्तन एवामुष्य प्रचार इति निर्विचिकित्समुपन्यस्यामः । यतो हि वेदेषु प्रतिपदमुपलभ्यन्ते साहित्यमूलभूता रूपकोपमोत्प्रेक्षादयोऽलङ्काराः ।

तथाहि

ऋग्वेदस्य प्रथममण्डले चतुर्विंशत्यधिकशततमे सूक्ते दैर्घतमसः कक्षीवत आर्षी उषस्ये क्रतौ प्रातरनुवाके विनियुक्ता त्रैष्टुभी ऋक् प्रथमा—

"अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् ।
जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः ॥"

अस्याः सायनभाष्यानुसार्यर्थः—

उषाः अभ्रातेव भ्रातृरहिता योषिदिव पुंसः पित्रादीन् प्रतीची प्रत्यावर्तमाना एति प्राप्नोति भ्रातरि सति तु भ्रातैव तामन्नवस्त्रादिना तोषयति, परं तदभावे योषिद् यथा स्वोचितं वासोऽलङ्करणादिलाभार्थंम्पित्रादीन् एति, तथा उषा अपि प्रकाशलाभार्थं पितृस्थानीयं सूर्यं प्रत्यागच्छति । तथा उषा धनानां सनये प्राप्तये गर्तारुगिव गर्ता रोहिणीव गर्तमिति न्यायालयैकस्थानम् । तत्र यथा न्यायार्थिनी स्त्री आरोहति ततश्च न्यायकारिणो राजपुरुषा अक्षादिभिः सन्ताड्य यदियं रिक्थं स्यात् तत्तस्यै समर्पयन्ति, एवमियमुषाः स्वप्रकाशलाभार्थमन्तरिक्षदेशमारोहति तथा पत्ये उशती कामयमाना सुवासाः शोभनवस्त्रादिभूषिता जाया इव यथापूर्वं मलिनवस्त्रापि शोभनवसनविभूषिता सती पतिं भोगाय काङ्क्षमाणा भार्या पत्य उपतिष्ठते तथा इयमपि प्रकाशरूपेण शोभनवस्त्रेण भूषिता पतिस्थानीयाय सूर्याय कामयमाना उपतिष्ठते, तथा हस्रेव हसन्ती योषिदिव अप्सः निरिणीते, यथा पत्या सङ्क्रीडन्ती युवती हसन्ती अप्सइद्व दन्तान् प्रकाशयति एवमियमपि दन्तस्थानीयान् श्वेतादिवर्णान् पदार्थान् प्रकाशयति ।

अत्र च यास्काचार्यश्चतस्र उपमा इति स्पष्टमेवोपनिबद्धवान् । किञ्च करतलाऽऽमलकायितनिगमनिवहार्थेन भगवता यास्काचार्येणाऽपि निघण्टुभाष्यस्य (निरुक्तस्य) पूर्वषट्कस्य चतुर्थेऽध्याये 'अथात उपमाः' इत्यादिना ग्रन्थेन वैदिकमुपमाप्रकरणं स्फुटमेवोपवर्णितम् । तत्र खलूपमाभिधानस्य अस्यालङ्कारस्य पूर्णोपमालुप्तोपमाप्रभृतयो भूयस्यो भिदाः प्रदर्शिता लौकिकोपमालङ्कारे, वैदिके चामुष्मिन्नलङ्कारे तु परस्परमेतावानेव प्रत्यपाद्यत भेदो यद्धि लौकिकालङ्कारविषये, साहित्यागमनदीष्णाः श्रीमद्वामनाचार्यादयो नूनमुत्कृष्टगुणवत्तया सम्भाव्यमानेन वस्तुनाऽपकृष्टगुणवत्तया सम्भाव्यमानं वस्तूपमीयत इत्युपन्यभान्त्सुः काव्यालङ्कारसूत्रादिष्वात्मीयनिबन्धेषु, यथा 'चन्द्रवन्मुखम्' इत्यादौ रमणीरमणीयाननापेक्षया श्रीमति रोहिणीरमणे भूयांसः सुधानिधानत्वादयः प्रशस्ततमा गुणा इति चन्द्रोऽत्रोपमानमाननञ्चोपमेयमिति सिद्ध्यति निःशेषनिष्कर्षः । वैदिकेऽमुष्मिन्नलङ्कारे तूत्कृष्टभूयोगुणगणजुष्टेनापकृष्टन्यूनगुणः, अपकृष्टन्यूनगुणेनापि, उत्कृष्टभूयोगुणविशिष्ट उपमीयत इति श्रीमतो यास्काचार्यस्य वर्णनप्रकारः । भूयोगुणविशिष्टेन न्यूनगुणस्योपमाप्रकारः 'अभ्रातेव पुंस एति प्रतीची' इत्याद्यास्वृक्षु प्रसिद्धः, स च पुरस्तात् प्रदर्शित एव । अपकृष्टन्यूनगुणजुष्टेन साकमुत्कृष्टभूयोगुणविशिष्टस्योपमाप्रकारस्तु निरुक्ते पूर्वषट्कस्य चतुर्थाध्याये उपमाप्रकरणे स्पष्टमुपनिर्दशितः । तथाहि—"तस्कराविव वनर्गू बाहू रशनाभिरभ्यधीताम्" इत्यादि । अर्थश्चास्य बाहू (इमौ वर्ण्यदेवताया भुजौ) वनर्गू वनगामिनौ तस्कराविव चौराविव रशनाभिः अङ्गलिभिः अभ्यधीताम् निबध्नीयाताम् इति । अयमभिप्रायः—यथा गहनचारी चौरः शून्यमुपलभमानः पन्थानमुपागच्छन्तं पान्थं लुलुण्ठिषया रज्ज्वादिभिर्बध्नाति एवमिमौ बाहू अङ्गलिभिर्बध्नीयाताम् । अमुष्मिन् विषये च यास्काचार्येण "ज्यायाँस्तत्र गुणोऽभिप्रेतः" इति स्पष्टमेवोक्तम् । तत्र उपमेये बाहौ

(उपमानभूततस्करापेक्षया) ज्यायान् श्रेष्ठो गुणोऽभिप्रेत इति तद्वाक्यार्थः। निरुक्तभाष्यकारः— श्रीमान् दुर्गाचार्योऽप्युपमानभूतेषु कुत्सितकर्मकरत्वादिकारणजालमुपन्यस्यन् उपमेये बाहौ ज्यायांसं गुणमुपातिष्ठिपत्। उपमायाश्चास्याः 'इव', 'न', 'आ', चिदि'त्यादयो निपाताः, 'भूते' त्यादयः शब्दाश्च प्रज्ञापका इत्यन्यदेतत्। अन्यान्यान्युपमोदाहरणानि लुप्तोपमायाश्चोदाहरणानि च निघण्टुभाष्यमभ्यालोचयद्भिरञ्जसैवावसेयानीति वेदेषु सिद्धोऽस्माकमुपमालङ्कारः। अथाप्युपलभ्यते वेदेषु भूयो रूपकालङ्कारः। दृश्यताममूष्वृक्षु। तथाहि—"सप्त युञ्जन्ति रथमेकचक्रमेकोऽश्वो वहति सप्तनामा। त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाऽधितस्थुः॥" अयमस्याः परिष्कृतोऽर्थः— सप्त-सप्तसंख्योपेताः सर्पणाः (सर्पणक्रियायोग्याः) वा रश्मयः आत्मना रथं रंहणमादित्यं युञ्जन्ति योजयन्ति। यतो ह्ययमादित्य उद्यन्नेव रश्मिभिर्युज्यते। कीदृशमादित्यं योजयन्ति एकचक्रं एकचारिणं—एक एवासावादित्योऽन्तरिक्षे चरति ज्योतिरन्तराणि तु स्वतेजसा नाशयति। पुनश्चायमादित्यः, एकोऽश्वः—एक एव अश्वः सर्वभूतानां व्यापनः, अथ च सप्तनामा सप्तस्तुतिः, अथवा सप्तऋषयः एनं स्तुवन्तीति सप्तनामा। अथवा सप्तसंख्याका रश्मयोऽस्मै अभिसन्नामयन्ति रसानिति सप्तनामा। इदृश आदित्यो वहति गच्छति। ततश्च संवत्सराभिनिर्वर्तकोऽसावादित्यः पूर्वार्द्धर्चेन स्तुतः। अथाऽभिनिर्वर्त्यं संवत्सरमभिष्टौति परार्द्धर्चेन।

त्रिनाभिचक्रं ऋतुत्रयनाभिसंयुक्तं कालचक्रं अजरं अजरणधर्माणं अनर्वं अन्यस्मिन् अप्रत्यृतं अनाश्रितमिति यावत्। ईदृशं संवत्सरमभिष्टौति। यत्र यस्मिन् संवत्सरे विश्वा भुवनानि सर्वाणि भूतानि अधितस्थुः अभिसन्तिष्ठन्ते। संवसन्ति भूतान्यस्मिन्निति संवत्सर-निरुक्तिः। अत्र संवत्सरविषये ऋतुत्रयमेव त्रिनाभिस्थानीयम्। (द्वौ द्वौ ऋतू समानस्वभावाविति ऋतुषट्त्वेऽपि त्रित्वमुक्तम्) अथ संवत्सरे चक्रघटनोपजीवकमवयवविभागमुपपादयति। तथाहि—"पञ्चारे चक्रे परिवर्तमानः" इत्यनेन पञ्च ऋतव एवारस्थानीया उक्ताः। यतः खलु संवत्सरे पञ्च ऋतवो भवन्ति। हेमन्तशिशिरयोः समासेन पञ्चत्वं ऋतूनामुपपन्नम्। अथर्तूनां षट्त्वमभिप्रेत्य "षडर आहुरर्पितम्" इति षड्तूनामरस्थानीयत्वमुक्तम्। "अरा हि नाभौ प्रत्यृता भवन्ति। "द्वादशारं नहि तज्जराय। द्वादशप्रधयश्चक्रमेकम्" इति द्वादशमासा एव प्रधिस्थानीयाः। संवत्सरे द्वादशमासा भवन्तीति समुपपन्नं द्वादशप्रधित्वम्। "तस्मिन् साकं त्रिशता शङ्कवोऽर्पिताः षष्टिर्नचलाचलासः" इत्यहोरात्राणां शङ्कुस्थानीयत्वमुपपादितम्। यतो हि संवत्सरे षष्ट्युत्तरत्रिशतानि अहोरात्राः सम्भवन्ति। अमुष्यां खल्वृचि ऋतुमासाहोरात्राणां अरप्रधिरूपारोपणस्य प्रकटमुपपादिततया रूपकालङ्कारः स्फुटमेव प्रतीय इति विदाङ्कुर्वन्तु साहित्यमार्मिकाः प्रतिभावन्तः। एवमुपमारूपकयोरलङ्कारेषु प्रधानीभूतयोर्वैदिकत्वनिरुक्त्या छत्रिन्यायेन अन्येऽपि चाप्तोक्तलक्षणा अलङ्काराः स्वभावत एव सत्कविनिर्मितिषु सङ्ग्रथ्यमाना वाचां भूषणरूपतया वर्तमाना भूषणविज्ञानसहृदयैकवेद्याः सर्वास्वेव वाक्ष्वप्रयुज्यमाना अपि नाप्रामाण्यं तासूपक्षिपन्ति। अतस्तेषां सर्वेषां वैदिकत्वोन्नयनायासो व्यर्थ इति विरम्यते तस्मात्।

अथ रसस्य वैदिकत्वमाचक्ष्महे—

रसस्तु वैदिक एवेति निर्विवादम्। तथाहि—"रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति" इति च तैत्तिरीया आमनन्ति। "पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः सामरसः साम्न उद्गीथो रसः स एष रसानां रसतमः परमः परार्द्धोऽष्टगो य उदगीथः" इति च छन्दोगाः समामनन्ति। तेन रसस्वरूपस्य परब्रह्मणः प्रतिपादकं वाक्यं प्रमाणम्।

अन्यन्नीरसं रूक्षमनाप्तोक्तपारुष्यादिदोषलक्षणलक्षितमाप्तलक्षणलक्षितवाग्गुणोद्रेकसमुद्भूतवाग्रसानन्दपरिपूर्णप्रमाणप्रकर्षमर्मज्ञगोष्ठीषु अप्रमाणमिव भवतीति। यश्च वेदतदनुकूलशब्देभ्यो बहिर्भूतः प्रतिकूलो वाऽर्थः स तु अप्रमाणभूत एवेति तत्रैव 'काव्यालापांश्च वर्जयेदि'ति शास्त्रीयो निषेधः। एवं शब्दस्वरूपविचारः वृत्तित्रयविचारस्तत्र च व्यञ्जनाविचारस्तत्रैव च ध्वनिविचार इति—ब्राह्मणादिग्रन्थेषु तत्तच्छिक्षादिवेदाङ्गग्रन्थेषु च सुनिपुणमुपलभ्यते। रीतयस्तु विदर्भादिदेशनामभिः प्रसिद्धाः शब्दबन्धविशेषाः सहृदयैः सत्कविभिराप्तैः सारस्वतसारोद्धृता इति न नीरसप्रमाणवादितीक्ष्णदृक्पातस्यापि योग्या। एवं शब्दार्थध्वनिरसगुणालङ्काररीतिलक्षणलक्षितं किल साहित्य-काव्यादिशब्दाभिधेयं वेदवेदाङ्गस्मृतिदर्शनपुराणतन्त्रतदनुकूलग्रन्थैः प्रमितं परमाप्तसहृदयसत्कविशिष्टपरिगृहीतं प्रमाणतममित्यत्र न लेशतोऽपि सन्देहः। तेन साहित्यं विषयिजनमनोरञ्जनमात्रं कालयापनसाधनमात्रमिति वदन्तो मनुष्याकाराः पशव एवेति नादरणीयाः। इत्थं काव्यवाङ्मयचिरन्तनताप्रमितौ पुलाकनयतः श्रुतयोऽभिदर्शिताः।

सम्प्रति साहित्यशब्दार्थमभिदध्महे—साहित्यशब्दः सहितस्य भावः साहित्यमिति भावे विहितेन ष्यत्रा निष्पाद्यते। अस्यार्थाः प्रकरणानुरोधाद् भूयांसो भवन्ति। ते यथा—साहित्यं (१) मेलनम्, (२) 'परस्परसापेक्षाणां तुल्यरूपाणां युगपदेकक्रियान्वयित्वं' इति श्राद्धविवेके, (३) 'तुल्यवदेकक्रियान्वयित्वं बुद्धिविशेषविषयित्वं वा' इति शब्दशक्तिप्रकाशिकायाम्, (४) मनुष्यकृतश्लोकमयग्रन्थविशेषः, (५) वाङ्मयम्। एवमनेकार्थमप्येतत्प्रकृते निर्दोषशब्दार्थगुणालङ्काररसरीतिप्रभृतीनां यत्रैकस्मिन्नेव धर्मिणि सहावस्थानं दृश्यते तदेव काव्यापरपर्यायरूपं साहित्यं नाम। तच्च लक्ष्य-लक्षणप्रदर्शनपुरस्कारेणानुशासकमेकं, केवललक्ष्यात्मकमपरं चेति द्विविधम्। आद्यं भरतसूत्रकाव्यप्रकाशदशरूपकसाहित्यदर्पणध्वन्यालोकरसगङ्गाधरादि केवलं साहित्यशास्त्रत्वेनैव सम्प्रति प्रायो व्यवह्रियते। द्वितीयन्तु श्रीमद्वाल्मीकिरामायणरघुवंशकुमारकिरातमाघनैषधादि केवलं काव्यपदेन।

वस्तुतस्तु उभयस्यापि साहित्यपदाभिधेयताऽस्त्येव, 'सहितस्य भाव' इति प्राग्दर्शिताया अवयवव्युत्पत्तेरुभयत्र सत्त्वात्। अथ पुरुषार्थसाथर्समर्थकस्यापि वेदशास्त्रादेरतिदुरूहतया कुशाग्रीयधियामेव तत्राधिकारितया न नाम मृदुलमतयो यदृच्छया प्रवर्तन्ते, काव्यादीनां चात्यन्तमधुरतयाऽन्ततो गत्वा पुरुषार्थदानपर्यवसायित्वाच्च 'अक्के चन्मधु विन्देत किमर्थं पर्वते व्रजेत्' इति भवति प्रायः सर्वस्यापि यादृच्छिकी प्रवृत्तिः। उक्तञ्च 'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च। करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्'॥ अग्निपुराणेऽप्युपश्लोक्यते काव्यम्, यथा—'नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा। कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा' 'त्रिवर्गसाधनं नाट्यम्' इति च। विष्णुपुराणेऽपि 'काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च। शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः' इति। 'काव्यालापांश्च वर्जयेदित्यादिनिषेधकवाक्यन्तु—असत्काव्यपरमिति व्यवस्थापितं प्राचीनैः। अत्र विषये केनापि कविना एवमुक्तम्—'स्त्रीगीतय इति वन्द्यैः कैश्चिदधन्यैर्बुधम्मन्यैः। काव्यान्यवहेल्यन्ते अथवा परिहासकेल्यन्ते'॥

ननु काव्यं कर्तव्याऽकर्तव्यद्वारा कृत्याऽकृत्यप्रवृत्तिनिवृत्त्योरस्तु कारणं, परं त्रिवर्गसाधनं तत् कथमिति चेदत्रेदमवधेयम्। 'एकः शब्दः सुष्ठु प्रयुक्तः सम्यग् ज्ञातः शास्त्रान्वितः स्वर्गे लोके च कामधुग् भवति' इत्यादिवाक्येभ्यः काव्यस्य धर्मफलरूपायाः स्वर्गप्राप्तेः साधनत्वमिति धर्मसिद्धिः। अर्थप्राप्तिरपि महाराजस्तवादिना प्रत्यक्षसिद्धैव। 'धर्मादर्थस्ततः कामः कामात्सुखसमुन्नतिः' इति स्मरणाद् विषयोपभोगरूपकामस्याप्यर्थसाध्यत्वात्कामसिद्धिरप्यनेनैव। मोक्षप्राप्तिश्च सर्वलोकोपकार-

काद्यभिनवकृतिजन्यधर्मफलाननुसन्धानात्तत्तत्काव्याद्यध्ययनजनितदृढव्युत्पत्तितया ब्रह्मप्रतिपादकोपनिषदर्थावगमाच्चेत्याद्यवगन्तव्यम्। अन्यान्यपि काव्यफलानि दर्शितान्यभियुक्तैः। यथा—'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे'।

तदिदं श्रुतिषु दरीदृश्यमानमूलमतिसुकुमारमतिरसिकततिभिरास्वाद्यमाननिस्सामान्यसुख-विशेषमखिलकृत्याकृत्याद्युपदेशपेशलं जगज्जीवातूयमानं चतुर्वर्गसाधनं सत्काव्यमाप्तवाक्यं स्मृति-सदाचारवत्परं प्रमाणमादेयं भवतीति सिद्धम्।

तत् किं स्वरूपमिति विविदिषायां श्रीमन्तो वाग्देवतावतारा मम्मटभट्टाः स्वकृतकारिकया तज्ज्ञापयन्ति। तथाहि—'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति अदोषौ, सगुणौ, अनलङ्कृती शब्दार्थौ तत् काव्यमित्यर्थः। तच्छब्देन काव्यपरामर्शः, काव्यस्यैव प्रकृतत्वात्। तेन शब्दार्थयुगलं काव्यमित्यर्थः। यद्यपि न हि केवलः शब्दोऽर्थमन्तरेण दृष्टः, अर्थो वा ऋते तस्मादिति शब्दार्थयोरन्यतरोपादानेनापि द्वयोर्बोधः सिद्धस्तथापीह कण्ठरवेण द्वयोरुपादानं, तयोर्द्वयोरपि काव्ये प्राधान्यप्रख्यापनायेति ज्ञेयम्। किञ्च आस्वादव्यञ्जकस्योभयत्राऽप्यविशेषाल्लक्ष्यतावच्छेदकस्योभय-वृत्तित्वाच्च 'काव्यं पठितं श्रुतं गीतं रचितं, काव्यं बुद्धमित्युभयविधव्यवहारदर्शनाच्च तथा 'शब्दार्थौ' इत्यत्र शब्दस्य अर्थाश्रयत्वात् प्रागुक्तिः। अत एव 'नामरूपे व्याकरवाणि' इति वेदे, 'सिद्धे शब्दार्थ-सम्बन्धे' इति पातञ्जलमहाभाष्ये, 'वागर्थाविव सम्पृक्तौ' इति महाकविप्रयोगेषु च शब्दस्य प्राथम्यं दृश्यते। शब्दस्तु अर्थवानकारादिवर्णसमुदायो बोध्यः। अर्थवानिति स्वरूपविशेषणं, यथा कीदृशो हरिश्चतुर्भुज इति सामान्यतो निरर्थकताव्यवच्छेदकं काव्यलक्षणनिरूपणेनैव तस्या निरस्तत्वात्। वर्णसमुदाय इत्यप्युपलक्षणम्। एकवर्णद्विवर्णयोरपि शब्दत्वात्। सोऽयं शब्दो बहुविधः। तथाहि—कश्चिद् व्यक्तैकार्थावयवः, यथा 'घट' इति। अत्र हि घकारादयो वर्णा व्यक्ताः सम्भूय कञ्चन कम्बुग्रीवादिमन्तमेकमर्थमाहुः। कश्चिद् व्यक्तपृथगर्थावयवः, यथा 'अस्ति भवतीत्यादिः', अत्र अकारादयो वर्णा व्यक्ताः पृथगर्थाश्च, यतो हि अत्र धातुना क्रियाऽभिधीयते, प्रत्ययेन तु कर्ता। कश्चिद् व्यक्तैकार्थावयवः' यथा 'अव रक्षणे' इत्यस्मात्सम्पदादिक्विपि 'ऊः' इति पदम्, अवनमित्यर्थः। अत्राकार-वकारयोः स्थाने 'ज्वरत्वर' (६।४।२०) इत्यनेन ऊठि कृते क्षीरनीर-वदेकात्मभावेऽपि अवनक्रियारूप एक एवार्थः। कश्चिदव्यक्तपृथगर्थावयवः, यथा 'इण् गतौ'—इत्यस्मात् कर्तरि लङि सिपि 'ऐः' इति रूपम्। अत्र अकारैकारौ पूर्ववदेकीभूतौ आगतिक्रियामाहतुः। सकारश्च रुत्वविसर्गादिना अव्यक्तीभूतो युष्मदर्थं कर्तारमेकत्वं चाऽऽह। एवमनेकविधता शब्दस्य। यद्वा द्रव्यजातिक्रियागुणवाचित्वेन तथात्वं समर्थनीयम्। द्रव्यशब्दा एकव्यक्तिवाचिनो हरि-हर-डित्थ-कपित्थादयः। जातिशब्दा गो-महिष्यादयः। ते हि व्यक्तिभेदेऽपि सर्वत्र समानतया स्थितां गोत्वादिकां जातिमाहुः। क्रियाशब्दाः पाकादयः, ते हि साध्यरूपं कञ्चन वस्तुधर्ममाहुः। गुणशब्दा शुक्लादयः, ते हि विशेषाधानहेतुं सिद्धं कञ्चन वस्तुधर्ममभिदधाना गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्तयन्ति। अन्ये तु वक्रोक्तियमकानुप्रासश्लेषैः शब्दस्य नैकविधतामाद्रियन्ते। शाब्दिकास्तु सुप्-तिङन्तरूपतया द्विभेदं मन्यमाना दृश्यमानानपरान् भेदान् सुप्स्वेव अन्तर्भावयन्ति। आलङ्कारि-कास्तु नामाख्यातनिपातोपसर्गकर्मप्रवचनीयभेदेन तमिमं पञ्चधा प्राहुः। तत्र वस्तुवाचि पदं नाम। क्रियाप्रधानं तिङन्तमाख्यातम्। नामाख्यातयोः समुच्चयाद्यर्थप्रख्यातिनिमित्तं निपाताः। क्रिया विशेषार्थाभिव्यञ्जका उपसर्गाः। क्रियानिरूपितसम्बन्धविशेषद्योतकाः कर्मप्रवचनीयाः। मेधाविरुद्र-प्रभृतिभिरालङ्कारिकैस्तु कर्मप्रवचनीयानुपसर्गेष्वेवान्तर्भाव्य चतुर्विध एव शब्दोऽङ्गीकृतः। तदेतत्परे

